Chapter-4

# ☆ चतुर्थपरिच्छेदः(कालिदासकृतिषु पर्यावरणनिदर्शनम्)☆

पृष्ठानि

(४) चतुर्थपरिच्छेदः......( कालिदासकृतिषु पर्यावरणनिदर्शनम्)............१४९ तः २९०

( यथाक्रमानुसारेण)

(१) रघुवंशमहाकाव्ये पर्यावरणम् ।........................................................................१४९ तः १६९

(२) कुमारसंभवमहाकाव्ये पर्यावरणम् ।................................................................१७० तः १९६

(३) मेघदूतखण्डकाव्ये पर्यावरणम् ।......................................................................१९७ तः २१३

(४) ऋतुसंहारे पर्यावरणम् । ................................................................................२१४ तः २३६

(५) अभिज्ञानशाकुन्तलनाटके पर्यावरणम् ।...........................................................२३७ तः २६१

(६) विक्रमोर्वशीये नाटके पर्यावरणम् ।....................................................................२६२ तः २८०

(७) मालविकाग्निमित्रनाटके पर्यावरणम् ।...............................................................२८१ तः २९०

# चतुर्थपरिच्छेदः (महाकवेः कृतिषु पर्यावरणनिदर्शनम्)

## (१) रघुवंशमहाकाव्ये पर्यावरणम्।

महाकविः कालिदासेन संस्कृतजगति सुप्रसिद्धबृहत्त्रयीकाव्येषु स्थानप्राप्तरघुवंशमहाकाव्ये भारतवर्षस्यभौतिक तथा सांस्कृतिकस्वरूपस्य सजीवचित्रणंकृतमस्ति। रघुवंशस्य सम्पूर्णा वृत्तयोजना भारतभूम्याः प्रतिकणे व्याप्त नैषर्गिकसुषमायाः निदर्शनद्वारा अखिलभारतीय पर्यावरणं संश्लिष्टतया साकारं करोति, तथा च भारतीय संस्कृतेः बहुमूल्यनिधेः निदर्शनं कृत्वा पर्यावरणसम्पदा वर्धयितुं मार्गदर्शनमपि ददाति। एकोनविंशतिसर्गात्मकमहाकाव्यं पर्यावरणदृष्ट्याऽध्ययनार्थ सुकराय त्रिधा विभक्तुं शक्यते। यथा–

- **रघुखण्डः सर्गः १ तः ८/२७ पर्यन्तम्।**
- **रामखण्डः सर्गः ८/२८ तः १५ सर्गसमाप्तिपर्यन्तम्।**
- **वंशखण्डः १६ सर्गातः १९ सर्गसमाप्तिपर्यन्तम्।**

व्यञ्जनाशक्तिसम्पन्नः कालिदासस्य वर्णितकथासंयोजना प्रकृतिरञ्जनकारणात् राज्यसमृद्धिः, प्रकृतिहिंसायाकारणाच्च राज्यस्य सर्वनाशसन्देशः अतीव प्रभावशालीरीत्या सामाजिकानामग्रे उपस्थापयति। रघुवंशे कोशलेश्वरा इक्ष्वाकुवंशीयशासकानां कथा वर्तते। तथाऽपि अस्य पर्यावरणचित्रणं महाकोशलः वा उत्तरकोशलपर्यन्तं सीमितं नास्ति। यथा– वाल्मीकि रामायणे–

**कोशलो नाम मुदितः स्फीतो जनपदो महान्।**

**निविष्टः सरयूतीरे प्रभूतधनधान्यवान्।।**[१]

अन्यच्च– रघुवंशे –

**न मे ह्रिया शंसति किञ्चिदीप्सितं, स्पृहावति वस्तुषु केषु मागधी।**

**इतिस्म पृच्छत्यनुलमादृतः, प्रियासखीरुत्तरकोसलेश्वरः।।**[२]

**तेषां सदष्वभूयिष्ठास्तुङ्गाद्रविणराशयः।उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम्।।**[३]

१. वाल्मीकि रामायण– ५/५, २. रघुवंश – ३/५, ३. – ४/७०

अपितु अस्यान्तर्गतः सम्पूर्णभारतीयपर्यावरणस्याऽपि समावेशो विद्यते। रघुवंशस्य रघुवंशीय पर्यावरणचित्रणस्य विवेचनार्थं दिलीपस्य वशिष्ठाश्रमगमनम्, रघोः दिग्विजययात्रा, इन्दुमतीस्वयंवरे राज्यानां वर्णनं, अजस्य साकेततः विदर्भपर्यन्तस्य यात्रा, दशरथस्याऽरण्यविहारं, रामस्य लंकातः अयोध्यापर्यन्त पुष्पकविमानयात्रा, कुशकृत अयोध्याजीर्णोद्धारादि प्रसंङ्गेषु उल्लिखितानां विभिन्नस्थानानां सम्यक् पर्यवेक्षणं कृत्वा पर्यावरणपरितन्त्रस्यैकत्रसमन्वयद्वारा भारतभूमेः विविधतापूर्णपर्यावरणस्य सम्पूर्णरुपेण चित्रणं भवतीति।

## १. पर्यावरणदृष्ट्या दिलीपस्य वशिष्ठाश्रमगमनचिन्तनम्।

उत्तरकोशलेशः दिलीपःराज्यभारःसचिवान् समर्प्य सन्तानहेतोः समुचिताऽनुष्ठानार्थ सुदक्षिणादिलीपो गुरुवशिष्ठस्याश्रमं जग्मतु। यथा–

**अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।**

**तौ दम्पति वशिष्ठस्य गुरोर्जग्मतुराश्रमम्।।**[१]

अर्थात् – पुत्रप्राप्त्युपायजिज्ञासया सुदक्षिणादिलीपौ ब्रह्माणमभ्यर्च्य स्वकुलगुरोर्दिव्यचक्षुषो वसिष्ठस्याश्रमं जग्मतुः।

कालिदासस्य रघुवंशे प्रायः दिलीपस्य राजनगर्य्याः नामोल्लेखो नैव मिलति, तस्य स्थाने राजधानी, आदि शब्दानां प्रयोगो दृश्यते। यथा–

**प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।**

**तौ दम्पति स्वां प्रति राजधानीं प्रस्थापयामास वशी वशिष्ठः।।**[२]

अन्यच्च– **पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः।**

**भुजेभुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।।**[३]

रघुवंशस्य कतिपतयप्रसङ्गैः सूर्यवंशी नृपाणां राजधानी कोशलजनपदस्य अयोध्या साकेतनगरीवाऽस्तीति सुविदितो भवति। यथा– वाल्मीकि रामायणे–

---

१. रघुवंश – १/३५,  २. –२/७०,  ३. – २/७४,

अयोध्यानाम नगरी तत्रासील्लोकविश्रुता।

मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्।।वा.रा.५/६।।

SMT. HANSA MEHTA LIBRARY
The M. S. University

रघुवंशेऽपि यथा–

अथपति गमयित्वा क्लृप्तरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पः।

पुरमविशदयोध्यां मैथिलीदर्शनीनां कुवलयितगवाक्षां लोचनैरङ्गनानाम्।।रघु.११/९३।।

अयोध्या साकेतनगनरी एव वर्तते। यथा रघुवंशस्य पञ्चमसर्गे–

जनस्यसाकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्धसत्त्वौ।

गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च।।[१]

अन्यच्च– स्पष्टीकरणम्। यथा–

साकेतः स्यादयोध्यायां कोसलानन्दिनी च सा।।[२]

वशिष्ठाश्रमस्य स्थितिः आबूपर्वतः सरस्वतीनद्याः तटे अथवा अयोध्या तः प्रायः द्वौ कोशौ उत्तरे अनुमन्यते। किन्तु कालिदासवर्णित वशिष्ठस्याश्रमः हिमालये गङ्गायाः पर्वतीयप्रवाहक्षेत्रे सम्बद्धो ज्ञायते। यथा–

अन्येद्युरात्माऽनुचरस्यभावं जिज्ञासमाना मुनिहोमधेनुः।

गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश।।[३]

अर्थात्– यज्ञसाधनभूता नन्दिनी दिलीपस्य भक्तिपरीक्षार्थं गङ्गाप्रपातसमीपवर्तित्वेन प्रचुर तृणशप्यां हिमालयस्य गुहायां प्रविष्टा। अत्र परितःपर्यावरणशोभा दरीदृश्यते। सुदक्षिणादिलीपौ अयोध्यातः रथेन प्रस्थानं कृत्वा यज्ञीयग्रामेषु, आभीरपल्लिषु च किञ्चित्समयं विश्रामं कृत्वा, श्रान्तरथाः परिश्रमेण क्लान्तौ आश्रमे आगच्क्षतः।यथा–

---

१. रघुवंश – ५/३१,  २. यादवः,  ३. रघुवंश –२/२६,

ग्रामेष्वात्माविसृष्टेषु यूपचिन्हेषु यज्वनाम्।

अमोघा प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः। ।रघु.१/४४ ।।

अर्थात्– पथि प्रयान्तौ सुदक्षिणादिलीपौ विधिनेष्टवद्भ्यो विप्रेभ्यो यूपलक्षणेषु ग्रामेषु तत्रत्यानां तेषामाशिर्वादानर्घ्यस्वीकारानन्तरं प्रतिगृह्णन्तौ जग्मतुः। अन्यच्च–

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।

नामधेयानिपृच्छन्तौ वन्यानां मार्गशाखिनाम्। ।रघु.१/४५ ।।

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।

सायं संयमिनस्तस्य महर्षेर्महिषि सखः। ।रघु.१/४८ ।।

अर्थात्– अन्यदुर्लभकीर्तिः सुदक्षिणासहितो दिलीपः सन्ध्यासमये वशिष्ठाश्रमं दूरं प्रापत्। अतः आश्रम – अयोध्ययोर्मध्ये पर्याप्तदूरं भवितव्यम्।

आश्रमबद्धवने विचरन् दिलीपेन सक्षिता गौ गङ्गाप्रपातस्थलस्य समीपे हिमालयस्य गह्वरे प्रविशति। यत्र सिंहराजेन सह तस्या सा क्षात्कारोभवति। एतत् स्थानं वशिष्ठाश्रमस्य मुख्यपरिसरतः दूरं प्रतीयते, यतः आश्रमे प्राप्तं खेदः अपेक्षितोऽस्ति। परन्तु नन्दिनी दिलीपभक्त्या प्रमुदिताःश्रान्ते सत्यपि परिश्रमं विना हैमवत् प्रदेशतः आश्रमं समागच्छति। यथा–

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव।

तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण।।

अर्थात्– इत्यं दिलीपेन निवेदिता नन्दिनी, पूर्वं केवलं प्रीता, सम्प्रति तु अधिकतरं प्रसन्ना सतीवसिष्ठाश्रमंप्रत्याजगाम।

"एतद्विवरणं गङ्गाप्रवाहक्षेत्रसम्बन्धी हिमालयस्य चरणश्रेण्यां वसिष्ठाश्रमस्य स्थितेः द्योतकोऽस्ति। यत्र नन्दिनी काऽपि उन्मतास्थानवर्ती हिमगिरिकन्दरायां गच्छति। अयोध्यातः वसिष्ठश्रमयात्रा हिमालयस्थ पर्यावरणस्य संक्षिप्तचित्रं प्रस्तौति।"[१]

१. कालिदास की कला और संस्कृति' त उद्धृतः लेखकः –शर्मा दे. दे.,

अयोध्यातः प्रस्थानं कृत्वा वने प्रविष्टे सति रथध्वनिना मेघगर्जनभ्रान्तिवशात् मयूराः केकाध्वनिः कूर्वन्ति। यथा–

**मनोभिरामाः श्रृण्वन्तौ रथनेमिस्वनोन्मुखैः।**

**षड्जसंवादिनी केकाः द्विधाभिन्ना शिखण्डिभिः।।रघु. १/३९।।**

गगने पंत्तिबद्धाः सारपक्षीणां शोभा पश्यन् सरोवरे तरंगसंचलन् शीतलकमलगन्धयुक्तवायोः सुगन्धिं गृह्णन्मार्गस्थ मनोहराणि दृश्यानि पश्यन् सुदक्षिणादिलीपौ वसिष्ठस्याश्रमे प्राप्तवन्तौ। कविः सुदक्षिणादिलीपयोः वसिष्ठस्याश्रमगमनकाले पथि प्रकृतिशोभावर्णनप्रसङ्गे–

"**शिशिरापगमे चैत्र्यां चित्रापूर्णचन्द्रमसोरिव।**"[1]कथयित्वा ऋतोः संकेतोऽपि ददाति। अनेनानुमीयते यत्सुदक्षिणादिलीपयोः यात्राकालः वसन्तः ग्रीष्मस्य वा प्रारम्भकालोऽस्ति। यदा वनश्रियाः उन्मुक्तस्वरुपस्य दर्शनं भवति।

## २.रघोः दिग्वजययात्रायाः पर्यावरणदृष्ट्या परिशीलनम्।

राज्यासने आरुढोभूत्वा प्रकृतिरञ्जकोरघुः स्वनवोत्कर्षेण प्रजास्नेहो प्राप्तवान्। यथा रघुवंशे –

**पुरुमध्वजस्येव तस्योन्नयनपङ्क्तयः।**

**नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः।।४/३।।**

रघोन्नतिं दृष्ट्वा विरोधीनृपाणां मनसि द्वेषाग्नि प्रज्वलत्। रघुः विरोधीनृपाणां द्वेषाग्निं शमयितुं कूटनीतिम् असदूपायाञ्च विहाय धर्मयुद्धैः सदुपायैश्च कर्तुं निश्चितवान्। यथा–

**नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।**

**पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः।।**[2]

स्वराज्यस्यसुरक्षायाः सुचारुव्यवस्थां कृत्वा ससेना रघुः दिग्विजयार्थं प्रयाणं चकार। यथा–

---

१. मल्लिनाथ टीका– रघु.१/४६,

२. रघुवंश –४/१०

स गुप्तमूलप्रत्यन्त शुद्ध पार्ष्णिरयान्वितः।

षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ।।[१]

साकेतवासीनामभीनन्दनीयः कोशलेश्वरः रघोः दिग्विजययात्रायाः प्रारम्भ. स्वाभाविकरुपेण स्वराजधानीतः कदाचित् कृतमासीत्। वर्षर्तोरनन्तरं यदा नद्यः सरलतया तर्तु योग्या जाता : ,पङ्कं शुष्के सति अनुकूलं समयं ज्ञात्वा रघुः दिग्विजयाय प्रस्थानार्थ निर्णीतवान् ।।

## ३.रघुवंशे–भूमि–जल–वायु–वनस्पति जीवजन्तूनां पर्यावरणदृष्ट्या चिन्तनम्।

प्रकृत्या सह महाकवि कालिदासस्य महाननुरागो वर्तते। प्रकृत्या वर्णनव्याजेन मानवान् पर्यावरणसंरक्षणस्य महत्वं ददाति। कालिदासस्य निरीक्षणशक्तिरतिसूक्ष्मा तीक्ष्णा च प्रतिभाति। तस्य प्रकृतिवर्णनं वैज्ञानिकं प्रतिभामण्डितं चास्ति। रघुवंशस्य प्रथमसर्गे कीदृशो वायुः सुकरो भवति, तस्य वर्णनं प्राप्यते। यथा–

**सेण्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः। पुष्परेणूत्किरैर्वातै राधूत वनराजिभिः।।[२]**

आनन्दजनकस्पर्शैः, सर्जतरुनिस्यन्दगन्धयुक्तै, कुसुमरजविक्षेपकैः, ईषत्कम्पितविपिन पङ्क्तिभिः एतादृशैः अनिलैः परिचर्यमाणौ तौ दम्पतिगुरोःवशिष्ठस्य आश्रमं जग्मतुः।

**परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।**

**मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्ध दृष्टिषु।।रघु.१/४०।।**

तौ दम्पती यदा गुरोवशिष्ठस्याश्रमं गच्छतः तदा मार्गे स्पन्दनध्वनिं श्रृत्वा मृगाः भयभीताः नैव भवन्ति विश्रम्भात् मार्गमपि अदूरं त्यजन्ति।स्पन्दनाबद्धदृष्ट सन्ति। अनेन श्लोकेन स्पष्टं भवति यद् तदानिन्तनकाले जीवोपरि दयायाः भावना प्रचूरा आसीत्। पर्यावरणसंरक्षणे पशुसंरक्षणस्यापि महत्वं वर्तते। यथा–

**हैयङ्गवीनामादाय घोषवृद्धानुपस्थितान्।**

**नामधेयानि पृच्छन्तौ वन्यानां मार्गशखिनाम्।।रघु–१/४५।।**

---

१.रघुवंश – ४/२६, २.–१/३८

तौ दम्पती ह्योगोदोहोद्भवं घृतं गृहीत्वा समीपस्थितान् – आभीरपल्लीस्थवीरान् वनभवानीं वर्त्मवृक्षाणां नामानि पृच्छन्तौ व्रजतः। अस्मिन् श्लोके दम्पत्योः वृक्षाणां प्रति स्नेहः दृश्यते।

**आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः। अपत्यैरिव नीवारभागधेयोचितैर्मृगैः।।**[1]

अस्मिन् श्लोके मुनिसहधर्मिणीनां पुत्रैः सह हरिणानां तुलना कृत्वा वन्यप्राणिभिः सह अस्माकं रक्तसम्बन्धः प्रदर्शितः महाकविः कालिदासः।

**सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्।**

**विश्वासाय विहङ्गनामालवालाम्बुपायिनाम्।।**[2]

वृक्षमूलानाम् सेचनाऽवसाने ऋषिकुमारिभिः, आवापस्थजलपानशीलानां, पक्षिणांविश्वासाय, सेकक्षणत्यक्तह्रस्वपादपम्, एतादृशम् आश्रमं राजा प्रापत्। अयं श्लोकः वृक्षसंरक्षणस्योत्तमोदाहरणं वर्तते।

**हविरावर्जितं होतस्त्वया विधिवदग्निषु।**

**वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम्।।**[3]

अत्र राजा वदति हे गुरुदेव! अस्माकं राज्ये सुवृष्टिर्भवति, पृथिवी सर्वतः शस्यश्यामला दृश्यते, तत्र भवतः विधिपूर्वके प्रक्षिप्तं हविरेवकारणं विद्यते।

**तया हीनं विधातर्मां कथं? पश्यन्न दूयसे।**

**सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम्।।रघु. १/७०।।**

हे स्रष्टः सन्तत्या रहितम् मां प्रेम्णः आत्मना जलसेकेन वर्द्धितमफलमाश्रमवृक्षकमिवालोकयन् कथं न परितप्यसे?

**सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।**

**आराधय सपत्निकः प्रीता कामदुधा हि सा ।।रघु.१/८१।।**

---

१. रघुवंश –१/५०, २. – १/५१, ३. – १/६२

सुरभितनयां नन्दनीं कामधेनो. प्रतिमां विधाय पत्निसहितः सेवस्व । नन्दिनी तुष्टा सती इच्छा पूरयित्री भविष्यति ।

**निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः।**

**पयोधरीभूतचतुः समुद्रां जुगोप गोरूपधरामिवोर्वीम्।।[१]**

कारुणिकः यशोभिर्मनोज्ञः राजा तां सुदक्षिणां, परावर्त्य नन्दिनीम् दुग्धतिरस्कृतसागरां गोरूपधरांपृथिवीमिवररक्ष।

**लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।**

**रक्षापदेशान्मुनिहोमधेनो र्वन्यान्विनेष्यन्निव दुष्टसत्वान् ।।[२]**

लतातन्तुभिः केशपाशं बद्धा दिलीपः धनुर्गृहित्वा ऋषियज्ञधेनोः रक्षणव्याजात् हिंसकप्राणिनः शिक्षयिष्यन् इव वनम् बभ्राम । अस्मिन् श्लोके राजादिलीपः दुष्टजन्तून् न हन्ति, परन्तु शिक्षयति, अनेन कवेः जीवविषयिक पर्यावरण चेतना प्रकटी भवति ।अन्यच्च–

**विसृष्टपार्श्वानुचरस्य तस्य, पार्श्वद्रुमाः पाशभृता समस्य।**

**उदीरयामासुरिवोन्मदाना– मालोकशब्दं वयसां विरावैः।।[३]**

राजभवन इव वनेऽपि तदुभयपार्श्वस्थिता वृक्षात् मदमत्तपक्षिशब्दैः जयशब्दं कथयामासु।

**मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।**

**अवाकिरन्बाललताः प्रसूने– राचारलाजैरिव पौरकन्याः।।रघु. २/१०।।**

वायुप्रेरिताः नवीनलताः समीपे विद्यामानम्, अग्निसमप्रभम्, पूज्यं दिलीपं पुष्पैः नगरबालिकाः, शिष्टाचारलाजैरिव निक्षिप्तवती।

**धनुर्भृतोऽप्यस्य दयाऽऽर्द्रभावमाख्यातमन्तः करणैर्विशङ्कैः।**

**विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः।।रघु. २/११।।**

---

१. रघुवंश –२/३, २. – २/८, ३. – २/९

दिलीपस्य सज्यं धनुर्वीक्ष्यापि तद्हृदयंहिंसाशून्यं दयाद्रवीभूतं वर्तते, इत्याकलय्य हरिण्योनिर्निमेषदृशा तं सुचिरं ददृशुः।

**स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।**

**शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः।।[१]**

राजा दिलीपः लताकुञ्जेषु वनदेवताभिरुच्चैर्गीयमान वायुपूरितच्छिद्रतया कीचकैरपि तथैवाध्वनितं स्वं यशः श्रुतवान्।

**पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी।**
**तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे।।[२]**

गिरिनदीजलसीकरकणानावहन् कुसुमानां परिमलं हरन् सुगन्धो वायुः तं सेवितवान्।

**शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।**

**ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने।।[३]**

दिलीपे वने प्रविशति सति वृष्ट्या विनैव वनाग्निर्निववौ, फलपुष्पवृद्धिरप्यपूर्वाऽभवत्। प्रबलाव्याघ्रादयो दुर्बलानां हिंसनाद्विरता बभूव।

**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।**

**यो हेमकुम्भस्तननिः सृतानां स्कन्दस्य मातुः पयसां रसज्ञः।।[४]**

अर्थात्– पुरः देवदारुनामकं वृक्षम्–अवलोकयसि असौ भगवताशङ्करेण पुत्रवत् स्वीकृतः। भगवती भवानी स्कन्दमिवैनमपि स्वस्तनक्षीरेणेव सुवर्णकलशसलिलेन पोषमनयत्।अन्यच्च–

**कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य।**

**अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः।।रघु. २/३७।।**

---

१. रघुवंश –२/१२, २. –२/१३, ३. – २/१४, ४. – २/३६,

अर्थात्– एकदा गण्डस्थलस्य कण्डूमपनयता केनचिदारण्यगजेन अस्य तरोस्त्वगुन्मथिता। ततः पार्वती दानवास्त्रै क्षत्रशरीरं कार्तिकेयमिवैनं तरुं मत्वा विललाप, क्रुद्धाऽभवच्च। तद्रक्षार्थं वृषभध्वजेन कुम्भोदरनामा शिवगणः नियुक्त। अनेन स्पष्टं भवति यत् महाकविः वनस्पति संरक्षणेदत्तचित्तोऽस्ति।

अत्र दिलीपेनोक्तम् हे सिंह! चलाचलपदार्थानां उत्पत्तिस्थितिविनाशकारणं शिवः ममाराध्योऽस्ति तथापि गुरोः गोधनमपि अत्याज्यमस्तीतिस्पष्टयति। यथा–

**मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यपहारहेतुः।**

**गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम्।।[१]**

**सत्यं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।**

**दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः।।[२]**

अर्थात्– हे मृगेन्द्र! नन्दिन्याः स्थाने त्वमिदं मम शरीरं भक्षयित्वा आत्मानं तर्पय। सायङ्कालोजातः। अस्या वत्स एनां प्रतीक्षते मातरमदृष्ट्वा बुभुक्षया सोऽपि उत्कण्ठितो भवेदतः कृपया इमां मुञ्च। अस्मिन् श्लोके पशुसंरक्षणं प्रति महाकवि कालिदासस्य उदात्तचेतना दृश्यते।

**भक्त्या गुरौ मय्यनुकम्पया च, प्रीताऽस्मि ते पुत्र वरं वृणीष्व ।**

**न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ।।[३]**

अर्थात्– प्रसन्ना नन्दिनी नृपं कथयति –हे वत्स गुरौ भक्त्या मयि अनुकम्पया च अहं तवोपरि प्रसन्नाऽस्मि ।अतः केवलं दुग्धंमेव न ददामि किन्तु प्रसन्ना सती मनोभिलषितमप्यर्थं ददामीति। अत्र नन्दिनी उक्तवचनेन स्पष्टं भवति यत् पशवः साधारणाः नैव भवन्ति । ये श्रद्धयापशुपालनं कुर्वन्ति। तान् पशवः धर्मार्थकाममोक्षान्नपि दातुं समर्थाः सन्तीति उक्त्वा महाकविः कालिदासः सामाजिकवर्गान् पशुसंरक्षणं प्रति प्रेरयति । तृतीयसर्गे यदा राजादिलीपः अश्वमेधिकम् अश्वं

---

१. रघुवंश –२/४४, २. –२/४५, ३. – २/६३

मुमोच , तदा पुरन्दरः तिरस्करिण्या विद्यया अन्तर्हितःशरीरं सन् धनुर्धारिणां रक्षकाणां पुरतः एव तमश्वमपजहार । तस्मिन्नेव समये तत्रागता वसिष्ठधेनोः मूत्रेण लोचने प्रमृज्य रघुर्दिव्यदर्शनशक्तिर्बभूव । तद्यथा—

**तदंगनिस्यन्दजलेन लोचने, प्रमृज्य पुण्येन पुरस्कृतः सताम् ।**

**अतिन्द्रियेष्वप्युपपन्नदर्शनो ,बभूव भावेषु दिलीप नन्दनः ।।रघु. ३/४१।।**

**सरितः कुर्वती गाधाः पथश्चाश्यान कर्दमान्।**

**यात्रायै चोदयादमास तं शक्तेः प्रथम शरत्।।रघु.४/२४।।**

अर्थात् सरितः सुप्रतराकुर्वती मार्गाश्च शुष्कपङ्कानविदधती शरदृतुस्तं रघुं दाण्डयात्रायै प्रेरयामास। अत्र शरदृतोर्वर्णनं महाकविना एकं मार्गप्रदर्शकमित्रमिव कृतमस्ति।

**भूर्जेषु मर्मरी भूताः कीचकध्वनिहेतवः।**

**गङ्गाशीकरिणो मार्ग मरुत स्तं सिषेविरे।।रघु. ४/७३।।**

अर्थात्—हिमालयपथि गच्छन् शुष्कभूर्जपत्रवनेषु मर्मरशब्दं जनयन्तो गङ्गाऽम्बु कणयुक्ताः शीतला वायवः रघुम् असेवन्त।

**विशश्रमुर्नमेरूणां छाया स्वध्यायस्य सैनिकाः।**

**दृषदो वासितोत्सङ्गां निषण्णमृगनाभिभिः।।[१]**

**सरलासक्तमातङ्ग ग्रैवेयस्फुरितत्विषः।**

**आसन्नोषधयो नेतुर्नक्तमस्नेह दीपिकाः।।[२]**

उपर्युक्त श्लोकेषु भूर्जपत्रवनं कीचक वंश वृक्षगङ्गाऽम्बुमिश्रितशीतवायुः पुन्नागवृक्षः देवदारुवृक्षः ज्योतिवल्लीविशेषानां वर्णनमाध्यमेन औषधीनां माहात्म्यं प्रतिपादयति महाकविः।

**आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्।**

**कच्चिन्न वाय्वादिरुपप्लवोवः श्रमच्छिदामाश्रम पादपानाम्।।रघु.५/६।।**

---

१. रघुवंश – ४/७४, २. – ४/७५

अत्र रघुः कौत्सं पृच्छति– यत् आलवालनिर्माणजलदानादिभिरुपायैः पुत्रवत् पालिता ये युष्माकं तपोवनवर्तिनो वृक्षाः कुसुमफलच्छाया प्रदानादिना मार्गपरिक्लान्तानां जनानां श्रमापहारिणः सन्ति, तेषां झञ्झावातदावानलादिभिरुत्पातैर्बाधा तु न भवति किम्? अत्र महाकवेः पर्यावरणसंरक्षणे धूरिभूतानां वृक्षाणां प्रति पुत्रवत् स्नेहः दृश्यते। तेषां वृक्षाणां हानिः न स्यात् तदर्थमपिचिन्तातुरो महाकविः वृक्षाणां कुशलप्रश्नं पृच्छति।

**क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु।**

**तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः।।रघु.५/७।।**

अर्थात्– सद्योजातान् हरिणपोतान् मुनयोः व्याघ्रादिभयेन निजाङ्के संस्थाप्य परिरक्षन्ति। श्रौतानुष्ठाननिमित्तककुशान् भक्षियितुं प्रवृत्तानपि यान् मुनयस्तस्नेहवश्याः सन्तो निवारयितुं न प्रभवन्ति, एवम्भूतास्ते तपोवनवर्तिनो मृगशिशवः किं कुशलिनः सन्ति? अस्मिन् श्लोके पशूनांप्रति स्वसन्ततेरिव स्नेहभावनां, तेषां सरक्षणंप्रतिजागरूकतां दृष्ट्वा कथयितुं शक्यते यत् कालिदासकाले लोकाः पशुसंरक्षणार्थं दत्तचित्ता आसन्। राजाऽपि आश्रममृगाणां संरक्षणंप्रति चिन्तनशीलो दृश्यते। एतादृशी पर्यावरणसंरक्षणचेतना कालिदासग्रन्थष्वेव प्राप्यते। अत्र जलसंरक्षणस्योदाहरणम्– यथा–

**निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितृणाम्।**

**तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित्।।**[1]

अर्थात्– अत्र रघुः गुरुदक्षिणाऽर्थी वरतन्तुशिष्यं ऋषिसेवितजलानां निरूपद्रवं पृच्छन् कथयति– येषां जलानि भवदीया व्रतसम्बन्धानिस्नानादिकाः क्रिया निष्पादयन्ति, येषां जलेभ्यश्च भवन्तः पितृणां तर्पणाञ्जलीन् निष्पादयन्ति, तेषां वस्तीर्थानां जलानि प्रदूषणरहितानि सन्ति किम्? अस्मिन् श्लोके जलविषयिकपर्यावरणचिन्तनमस्ति ।

**तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान् कुमारः।**

**निवर्तयिष्यन्विशिखेनकुम्भे जघान नात्यायतकृष्टशार्ङ्गः।।**[2]

सेनानिवेशे वन्यगजे प्रविष्टे सति युवराजोऽजः "वनोद्भवोगजोऽवध्यः" इति विचार्य तं गजं निवर्तयितुकाम एव न तु हन्तुकामः सन् धनुरिषदाकृष्य शरेण तस्य कुम्भस्थले प्रहारं

---

१. रघुवंश –५/८, २. – ५/५०,

कृतवान्।

उभयोरपि पार्श्ववर्तिनां,तुमुलेनार्तरवेण वेजिताः।

**विहगाः कमलाकरालयाः समदुःखा इव तत्र चक्रुशुः।।रघु.८/३१।।**

अत्र द्वयोः अजेन्दुमत्योः परिजनानां व्याकुलेन करुणशब्देन कम्पिताः कमलाकरालयाः हंसादयः पक्षिणः अपि उपवने समदुःखाः इव क्रोशन्ति स्म ।

**मिथुनं परिकल्पितं त्वया,सहकारः फलिनी च नन्विनौ।**

**अविधाय विवाह सत्क्रिया मनयोगम्यत इत्यसाम्प्रतम्।।रघु.८/६१।।**

आम्रवृक्षः,प्रियंगुलता च इमौ द्वौ इन्दुमत्या मिथुनत्वेन स्वीकृतम्। फलिनीसहकारयोः विवाहसत्क्रियाम् अकृत्वा प्रस्थीयते एतत् गमनम् अयुक्तम् ,मातृविहीनानां संसारे न किमपि सुखमस्तीति। अस्मिन् श्लोके वृक्षैः सह मनुष्याणां पारिवारिकी प्रीतिः दृश्यते ।

**स्मरतेव सशब्दनूपुरं, चरणानुग्रहमन्यदुर्लभम्।**
**अमुनाकुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे।।रघु. ८/६३।।**

अर्थात्– अन्यदुर्लभम् , सध्वनिमञ्जीरं पादताडनरूपकृपां चिन्तयता इव कुसुमाश्रुवर्षिणा अशोकेन इन्दुमती परितप्यते। वृक्षाऽपि अत्र इन्दुमत्या मरणं श्रुत्वा विरेहेण रुदन्ति।

**विलपन्निति कोसलाधिपः करूणार्थग्रथितं प्रियां प्रति।**

**अकरोत्पृथिवीरूहापि स्रुतशाखारसबाष्पदूषितान्।।रघु.८/७०।।**

अर्थात्– अजः करूणापूर्णं इन्दुमतीं प्रति विलापं कुर्वन्, वृक्षान्नपि शाखारसाऽश्रुदूषितन् कृतवान्। अजस्य इन्दुमतीं प्रतिविलापं दृष्ट्वावृक्षाः अपि अरोदयन्।

**कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम्।**

**इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम्।।रघु.९/२६।।**

अत्र वसन्तागमनप्रकारं कथयति कविः।

विरचिता मधुनोपवनश्रियामभिनवो इव पत्रविशेषकाः।

मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः।।९/२९।।

उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके।

प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया।।

अभिनयान्परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा।

अमदयत्सहकारलतामनः सकलिका कलिकामजितामपि।।

प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः।

सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासुमिता वनराजिषु।।

श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः।

उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः।।

शुशुभिरे स्मितचारुतराननाः स्त्रियः इव श्लथशिञ्जितमेखलाः।

विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहङ्गमाः।।रघु.९/२९,३१,३३,३४,३५,३७।।

अमदयन्मधुगन्धसनाथया किसलयाधरसङ्गतया मनः।

कुसुमसम्भृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी।।रघु.९/४२।।

वसन्तवर्णनप्रसङ्गे नवमसर्गस्य ३१ तमे श्लोके पलाशवृक्षे दत्तं कुड्मलसंहतिः प्रियतमे उपहितं नखक्षतमेवभूषणमिति। अत्र नायिकावसन्तश्रीः, पलाशवृक्षः नायकः द्वयोर्ववर्णनम्, ३३ तमे श्लोके अभिनयाभ्यासी नर्तकीव आम्रशाखायावर्णनम्। ३४ तमे श्लोके गृहदीर्घिकायाः स्मितचारुतराननायाःकामिन्याः सह तुलना। ४२ तमे श्लोके वृक्षस्य नायिका रुपेण नवमल्लिकायाः वर्णनं काचित् उत्कृष्टा शोभा जनयति। अत्र कालिदासः सर्वत्र

प्रकृतौनक्चेतनां पूरयित्वा ताभिः सह जीवजगति समन्वयं स्थापयतीति प्रतिभाति।

**बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः। आविर्भूतमपां मध्ये पारिजातमिवापरम्।।रघु.१०/११।।**

अर्थात्– शाखावद्दीर्घपीवरैः दिव्यालङ्कारशोभितैः भुजैः उपलक्षितम्, जलानामन्तरे प्रकटितं द्वितीयं देववृक्षमिव विष्णुं दृष्टवान्। अत्र महाकविः विष्णोराभूषणानां वृक्षशाखाभि सह तुलनां कृत्वा वृक्षाणां महत्त्वं प्रकटीतम्। कारणञ्च विष्णोः आभूषणानि दिव्याः भवन्ति तथैव वृक्षाः मपि दिव्याः सन्तीति कवेराशयः।

**रावणावग्रहक्लान्तमिति वागमृतेन सः।**

**अभिवृष्य मरुत्ससयं कृष्णमेघस्तिरोदधे।।रघु.१०/४८।।**

अर्थात्– कृष्णमेघः (भगवान् विष्णुः) रावणवर्षणप्रतिबन्धम्लानं देवधान्यं वाग्जलेन अभिषिच्य अदृश्यो जातः। अत्र महाकविः पर्यावरणसन्तुलने धुरिभूतानो मेघधान्यजलानाम् आलङ्कारिकभाषया वर्णनं करोति।

**तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखेः पतत्त्रिणः।**

**वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे।।रघु.११/११।।**

मार्गे गच्छतो रामलक्ष्मणयोः तडागाः स्वादु मधुरैः जलैः, पक्षिणः कर्णसुखकराऽव्यक्तध्वनिभिः, मरुतः सुरभिकुसुमपरागैः, मेघाश्च अनातपेन सेवितवन्तः। यदा मुनिः रामलक्ष्मणाभ्यां सह तपोवनमाससाद। तदा तपोवनस्थाः वृक्षाः हरिणाश्च अतिथि सत्कारार्थं तत्पराः दृश्यन्ति। यथा–

**आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम्।**

**बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम्।।रघु.११/२३।।**

द्वादससर्गे श्री रामः पुनर्भरतागमनशङ्कया – चित्रकूटस्थलीं त्यजन्नासीत्, तदा तत्रस्थाः मृगाः रामस्यदर्शनार्थंमुत्कण्ठितारासन्। यथा–

रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः।

आशङ्कयोत्सुकसारङ्गा चित्रकूटस्थलीं जहौ।।[1]

पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः।

अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव।।[2]

अर्थात्– रामः अगस्त्य महर्षेरादेशात् पञ्चवट्यां, विन्ध्याचलः पूर्वावस्थायामिव अपरित्यक्तमर्यादायां निवासं कृतवान्। विशेषः– धारादत्तमिश्रकृतहिन्दी टीकायां पञ्चवट्याः स्वरूपविषये विशेषोल्लेखोऽस्ति। यथा पञ्चवट्यां पूर्वे अश्वत्थः, उत्तरे बिल्वः, पश्चिमे वटः, दक्षिणे – आमलकी, अग्निकोणे च अशोकः, एवं प्रकारेण, पञ्चवृक्षाणां समूहः पञ्चवटी कथ्यते। समीक्षा– वनस्पतिशास्त्रानुसारेण पञ्चवट्याः मध्ये वेदिकायां निवासः सर्वेषां प्राणिनां कृते स्वाथ्यप्रदो भवति। अतोऽगस्त्यः रामं तत्र निवासार्थ मादिष्टवानितितात्पर्यः।

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लतायै।

अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः।।[3]

अर्थात् भयशीले सीते दशाननः त्वामपहृत्य येन मार्गेण गतवान्। तं मार्गं मानवा इव वक्तुसमर्थाः जाता एता लताः दयाद्राः अङ्गुलिभिरिव अवनमितकिशलैर्विटपैरदर्शयन्। अतःएतास्ते सख्यःता पश्य। महाकविरत्र चैतन्यात् वृक्षलतादयोऽपि समदुःखभाजो भवन्ति इति निर्दिश्याऽस्मान् वनस्पतिसंरक्षणं प्रति जागरुकाः भवेयुरिति उपदिशति।

मृग्यश्चदर्भाङ्कुरनिव्यपेक्षास्तवागतिज्ञं समबोधयन्माम्।

व्यापारयन्त्यो दिशिदक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि।।रघु.१/२५।।

कोमलकुशाङ्कुरचर्वणं परित्यज्य मृगाणां स्त्रियः दक्षिणस्यांदिशि लोचनानि

---

१. रघुवंश – १२/२४, २. – १२/३१, ३. – १३/२४

व्यापारयन्त्यः त्वां मार्गमाणमगतिज्ञं माम् त्वं दक्षिणस्यां नीतेति समबोधयन्ति। अत्र मानवैः सह पशुनामपि समदुखभाजत्वं दृश्यते। यथा–

**एष त्वया पेशलमध्य यापिघटाम्बुसंबर्धितबालचूता।**

**आनन्दयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे।।**[१]

अत्र रामः लङ्कातःप्रत्यागमनसमये दण्डकारण्ये पञ्चवट्यां यदा विमानमप्रापत् तदा सीतां सम्बोध्य वदति– सीते कृशोदर्यामपि त्वया यत्र कलशजलेन बालचूताः संवर्धिताः यत्रत्या कृष्णसारमृगाः पुष्पकविमानशब्दमाकर्ण्य अस्मान् अवलोक्य च तव स्नेहाधिकं स्मरन्तः उन्मुखाःवर्तन्ते ।बहुकालानन्तरं दृष्ट्वा पञ्चवटी मदीयं मन आह्लादयति । अत्र कालिदालिदासस्य बालचूतां प्रति वात्सल्यप्रीतिः दृश्यते। एषः प्रसङ्गः वृक्षसंरक्षणस्य महत्वं वर्धयति।

**छायाविनीताध्वपरिश्रमेषु,भूयिष्ठसम्भाव्यफलेष्वमीषु।**

**तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु।।**[२]

अत्र शरभंगमुनेः तपोवनवर्णनप्रसंगे रामः सीतां श्रावयति – यथा म्रियमाणः मनुष्यः स्वीयेषु सत्पुत्रेषु अतिथिसत्कारादिभारं प्रदाय स्वर्गंगच्छति,तथैव दिव्यलोकं जिगमिषुः शरभंगमुनिः स्वाश्रमवृक्षेषु अतिथिसत्कारं प्रदत्तवान्। तदनुसारमेते तरवः छायया मार्गश्रमस्यापनयनद्वारा, स्वादुफलैश्च संतर्पणद्वारा अभ्यागतानतिथीन् सततं सत्कुर्वन्ति। अत्र महाकविः सुपुत्रै सह तपोवनस्थवृक्षाणां तुलनां कृत्वा मानवनिसर्गयोः नैसर्गिकिसम्बन्धंप्रमाणयति।

**धारास्वनोद्गारिदरिमुखोऽसौ, शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।**

**बध्नाति मे बन्धुरगात्रिचक्षु दृप्तःककुद्मानिव चित्रकूटः।।**[३]

अर्थात्– प्रिये समुद्धतबलिवर्दइव एषःचित्रकूटगिरिःभृशं मे दृष्टिं स्वस्मिन् आकर्षति। यत्र कन्दरं निर्झरधाराशब्देन निरन्तरं प्रतिध्वनितमस्ति, एतस्योच्चशिखरोपरिभागे वप्रपङ्क

१. रघुवंश –१३/३४, २. – १३/४६, ३. –१३/४७

इव मेघः संलग्नो दृश्यते । अत्र चित्रकूटगीरेः बलीबर्देन सह सम्तूलयन् महाकविः जङ्गमपर्वतेऽपि चेतना पूरयति।

**एषा प्रसन्नस्तिमितप्रवाहा,सरिद्विदूरान्तरभावतन्वी।**

**मन्दाकिनी भाति नगोपकण्ठे,मुक्तावली कण्ठगतेव भूतेः।।रघु.१३/४८।।**

अर्थात्–चित्रकूटगीरेरधो निर्मला निश्चलप्रवाहा च दूरत्वात् कृशा दृश्यमाना एषा मन्दाकिनी नामनदी चित्रकूटोपकण्ठे भूमेः कण्ठस्थितालम्बमाना मुक्तमालेव शोभते। अत्र महाकविना मन्दाकिनीं भूमे. कण्ठगता मुक्तावलीव वर्णनं कृत्वाऽलंकाररूपेण चित्रितमस्ति।

**वीरासनैर्ध्यानजुषामृषीणां ममीसमध्यासितवेदिमध्याः।**

**निवातनिष्कम्पतया विभाति योगाधिरूढा इव शाखिनोऽपि।।[१]**

अर्थात्– वीरासनेन ध्यानं कुर्वतां मुनीनाम् आश्रममध्यवर्तीनोऽमी वृक्षा अपि वातोपद्रवनिश्चलतया योगाभ्यासिन इव लक्ष्यन्ते।तपस्विनां संसर्गात् तरुष्वपि तपस्विगुणाः समायाताः। ऋषिणां ध्याने विघ्नः न स्यात् तदर्थ वायुरपि शनैः प्रचलतीति तात्पर्यः।

**यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम्।**

**सामान्यधात्रीमिवमानसं मे सम्भावयत्युत्तरकोसलानाम्।।[२]**

अर्थात्– मदीयं मानसं सरयूनदीं साकेताधिपतीनां मातृकल्पां धात्रीमिव विमृशति यो यथा धात्री स्वत्संगे शिशून् स्वापयति स्व क्षीरेण च परिपोषयति तथैवेयं सरयूनदी अपि निजपुलिनोत्सङ्गे अयोध्यापतिभ्यः सुखं ददाति तथा स्वजलैः तान् पोषयति च। अन्यच्च– **सेयं मदीया जननीवतेन,मान्येन राज्ञा सरयूवियुक्ताः।**

**दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ।।[३]**

निजकरौ प्रसार्य वातायनेनोपगूहितुमाकाङ्क्षति तथैवेयं सरयूनदी दूरे वसन्तं मां शीतवातैः स्वीयरूर्मीकरैरालिङ्गतीवप्रतिभाति। अत्र महाकविः सरयूनदीं पोषणकर्तृ साधारणजननीमिव परिवर्ण्य जलतत्त्वम् अस्माकं कृते प्राणदायि अस्तीति प्रमाणयति।

---

१. रघुवंश – १३/५२, २. –१३/६२, ३. –१३/६३

चतुर्दशसर्गस्य प्रारम्भे रामलक्ष्मणौ यदा अयोध्या उपवने अप्रापताम् तदा स्वाश्रयभूतानां वृक्षाणांछेदनात् म्लानीभूता लता इव जनन्यौ कौशल्यासुमित्रे तत्र युगपदपश्यताम्। यथा–

**भर्तुः प्रणाशादथ शोचनीयं दशाऽन्तरं तत्र समं प्रपन्ने।**
**अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ।।रघु.१४/१।।**

अस्मिन् श्लोके महाकविः वृक्षविरहितानां लतानां तुलना विधवे कौशल्यासुमित्राभ्यां सह कृत्वा प्रकृतौ स्वमातातुल्यस्नेहं जनयति।

**नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः।**
**तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि।।रघु.१४/६९।।**

सीताया करुणक्रन्दनं निशम्य मयूराः नृत्यकर्म, वृक्षाः कुसुमानि, मृग्यश्चगृहितकुशान् परित्यक्तवन्तः। अनेनप्रकारेण सर्वं वनं सीतादुःख दुःखितमभवत्। अन्यच्च– महाकविरत्र सीतायाः करुणक्रन्दनेनाकृष्टमाणस्य बाल्मीकिमुनेरागमन्। यथा–

**तामभ्यगच्छुद्रुदितानुसारी कविः कुशेध्माहरणाय यातः।**
**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः।।[१]**

व्याधविद्धक्रौञ्चदर्शनेन क्रौञ्चपक्षिणश्च करुणक्रन्दनं निशम्य निर्गतो यस्य शोकः श्लोकरूपेण परिणतः कुशसमिधाहरणाय प्रचलितः स एव वाल्मीकिमुनिः रोदनरवानुसार्य सीतायाः समक्षमागतवान्। अत्र पक्षिणं प्रति दयायाः भावः, पक्षिसंरक्षणम् अहिंसां प्रति जनजागणञ्च प्रकटी भवति।

**पयोघटैराश्रमबालवृक्षान् संवर्धयन्ती स्वबलानुरूपः।**
**असंशयं प्राक् तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम्।।[२]**

अर्थात्– स्वबलानुरूपैः जलपूर्णकलशैः, आश्रमबालवृक्षान् पोषयन्ती त्वं स्तनयोपपत्तेः प्राक् निःसन्देहः स्तनन्धयप्रीतिम् प्राप्स्यसि।

**तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु।**
**निर्विष्टसारं पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु।।[३]**

---

१. रघुवंश –१४/७०, २. –१४/४८, ३. –१४/८०

अर्थात्– शोकविषण्णां सीतां, सीतागमनप्रसन्नासु तपस्विनीषु पितृभिः निर्विष्टसारां चन्द्रस्य अवशिष्टां षोडशांशभावम् अमावस्याकालः वनस्पतिषु इव समर्पयामास।

**तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी।**

**समुद्ररशना साक्षात्प्रादुरासीद्वसुन्धरा।।रघु.१५/८६।।**

अर्थात्– प्रभामण्डले नागफणोपरिधारितसिंहासनाऽसीना, सागरमेखला प्रत्यक्षं पृथिवी प्रादुर्बभूव।

अयोध्यागतकुशस्य परम्परानुसारेण अतिथेः कल्याणाय वयोवृद्धजनाः प्रकृतिप्राप्तवस्तुभिः निराजनविधिं कृत्वा स्वागतंचकार। यथा–

**दूर्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरान्।**

**ज्ञातिवृद्धैः प्रयुक्तान् स भेजे नीराजनाविधीन्।।रघु.१७/१२।।**

अतिथेः स्वागतार्थं पृथिवी अपि माणिक्यादिकं, सस्यं च ददौ। यथा–

**खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान्।**

**दिदेश वेतनं तस्मै रक्षासदृशमेव भूः।।रघु.१७/६६।।**

**निष्कर्षः –**

रघुवंशमहाकाव्यस्य विस्तृतकथानके कालिदासेन पर्यावरणस्य विविध पक्षानां विशदवर्णनंकृतमस्ति। यस्या समीक्षया सम्पूर्णभारतीय जैव – भू – द्वयोः परिज्ञानं मिलतः। भारतीयभौगोलिकपरितन्त्रान्तर्गतविद्यमान पर्वत–नदी–समुद्र–वन –नगर तपोवनादीनां देशकाल ऋत्वानुरूपवर्णनं, भारतस्य भौगोलिकस्वरूपं तथा जैव–वैविध्योश्च वर्णनं समिचीनरीत्या कविना विहीतमस्ति। दिलीपस्य अयोध्यातः वसिष्ठाश्रमगमनवर्णनेन मध्यहिमालयस्योपत्यकावर्तीक्षेत्रस्य शिशिरोपगमकालीनपरितन्त्राणां ज्ञानं भवति। इन्दुमती स्वयंवरवर्णनेन भारतस्य विविधराज्यानां प्राकृतिकसौन्दर्यस्य, तथा दशरथवनविहारवर्णनेन मध्यहिमालयतरीयभागप्रदेशस्य ग्रीष्मकालीनपरितन्त्राणां ज्ञानं प्राप्यते।

रामस्यविमानयात्रावर्णनेन दक्षिणभारतस्य पम्पासरोवर– गोदावरीनद्यादीना जलपरितन्त्रस्य ज्ञानं भवति। अयोध्याजीर्णोद्धारवर्णनेन नगरपरितन्त्रम्, सरयूनद्याः परितन्त्र तथा पर्यावरणस्य यथार्थसूक्ष्मविवेचनं प्राप्यते। रघुदिग्विजययात्रावर्णनेन भारतस्य चतुर्दिकभूभागस्य तत्रस्थ विविध जैव–भू–परितन्त्राणां ज्ञानं सम्यग् भवति।

रघुवंशे वर्णितरामकथायां पात्राणां पर्यावरणीयप्रतीकात्मकयाध्यमेन प्रकृत्या सह साहचर्यभावं दृश्यते। रघुवंशोत्पन्न– अग्निवर्णस्य प्रकृतिविमुखविलासोन्मुखतायाः विनासकारीपरिणामम्, एवं रित्या त्यागभूमि तपोवनस्य पर्यावरणदृष्ट्या तस्य – आदर्शवर्णनंदृष्ट्वा कालिदासस्य प्रकृतिस्नेहभावं दृश्यते। प्रकृत्या सह सामंजस्य स्थापनैव मानव समाजस्योत्कर्षोऽस्ति।

रघुवंशः भारतीयपर्यावरणस्य परिपूर्णताः, परिपक्वता च प्रदर्शितकर्ता प्रतिनीधिकाव्यमिति कथने नास्ति – अतिशयोक्तिः।

## (२) कुमारसम्भवमहाकाव्ये पर्यावरणम्।

महाकविः कालिदासस्य रचनाकोषे "कुमारसम्भवमहाकाव्यम्" उच्चस्थानं धारयति। तारकासुरवधार्थं शिवपार्वत्योः पावनपरिणयः तथा कुमारकार्तिकेयस्यजन्म अस्य महाकाव्यस्य वर्ण्यविषयोऽस्ति। कुमारसम्भवे महाकवेः काव्यकलायाः उत्कृष्टता निर्विवादोऽस्ति, परन्तु तस्य कलेवरविषये मत–मतान्तराणि प्राप्यन्ते। इदम् सप्तदशसर्गीय महाकाव्यम् कतिपयाः विद्वांसः आद्योपान्तः कालिदास–प्रणीतः स्वीकुर्वन्ति, किन्तु कविं यादृशी पूर्वाद्धस्य अष्टसर्गे श्रृङ्गाररसवर्णने सफलताप्राप्तमस्ति, तादृशी सफलता नैव प्राप्तम्। प्राचीनटीकाकारः मल्लिनाथस्यटीका अष्टमसर्गपर्यन्तमेव प्राप्तोऽस्ति। अनेन सिद्ध्यति यत् नवसर्गतःशेषसर्गाः प्रक्षिप्ताः सन्ति। अतः अष्टमसर्गाणामेव पर्यावरणविवेचना उपयुक्ता भविष्यति। अस्मिन् महाकाव्ये पार्वतीजन्म, तारकासुर मुक्त्यर्थं ब्रह्मणः याचना, मदनदहनम्, रतिविलापः, उमायातपः, उमाशंकरयोः परिणयः, तयोः दाम्पत्यजीवनस्य विशदवर्णनं, कृतमस्ति।[१]

"कुमारसम्भवम्" सत्यस्य प्रतिकोऽस्ति, अत्र सुदृढःहिमालयः, साक्षात् शिवः अर्थात् कल्याणतत्वम्, पार्वति सुन्दरम्, सत्यस्य पृष्ठभूमौ शिव–सुन्दर्योः,मिलनं भवति, तदा लोककल्याणार्थं शक्तिः (कुमारस्य) उदयो भवति, आसुरीतत्वः तारकस्य नाशो भवति। शिवपार्वत्योःदिव्यदम्पत्योःपरिणयकथां कविः हिमालयस्य उदात्तपृष्ठभूमौ चित्रिताऽस्ति। पर्यावरणदृष्ट्या अस्यपृष्टभूमेः महत्वम् अनन्योऽस्ति।

### (१) हिमालयस्यपर्यावरणदृष्ट्या महत्त्वम्।

महाकविः कालिदासः कुमारसम्भवमहाकाव्यस्य प्रारम्भैव पर्यावरणसन्तूलने महत्त्वमापन्नो हिमालयस्य अनन्यभक्त्या देवतात्मा रूपेण गानं कृतमस्ति। अस्य महत्त्वं भौगोलिकसंरचनायामपि अतीव महत्त्वमस्तीति नात्र संशयः। देवे यानि वैशिष्ठ्यानि भवन्ति, तानि सर्वाणि हिमालये सन्ति, सामर्थ्यवान्नपि अस्ति। यथा–

**अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः।।**[२]

अस्मिन् श्लोके उत्तरस्यां दिशीति हिमवतो देवभूम्यन्तर्भाव उक्तः। देवतात्मा इति न केवलं स्थावरात्मा। इदं तु वक्ष्यमाण चेतनकृत्य विवाहादि घटनार्थम्। प्राच्यपश्चिमौ

१. कालिदास ग्रन्थावलि–पृ.९९, – रेवाप्रसाद द्विवेदि, २.कुमारसम्भव – १/१

समुद्रौ सम्प्राप्य अवस्थितः, भूमेः परिच्छेदनाय मानदण्डः, इवेति। हिमालय नामेति प्रसिद्धः पर्वताधिराजः वर्तते। इह तु महाकविरादावस्तिपदप्रयोगात् तेनैव परमार्थसतः परमात्मन एव प्रतिपादनात् देवतात्मनो हिमवतः प्रतिपादनाच्च निष्प्रत्यूहपरिसमाप्त्यादिप्रयोजनं शिष्टाचारसिद्धमिष्टदेवतास्मरणात्मकं मङ्गलमपि कृतवान्। अत्र पर्यावरणसन्तूलने हिमालयः सर्वश्रेष्ठो वर्तते, भौगोलिकदृष्ट्यापि महत्त्वं धारयति। अतः हिमालयःनृपो वर्तते। नाटकस्य सर्वेगुणाः तस्मिन् सन्तीति।

हिमालये भासमानानि रत्नानि, महौषधीनां च बाहूल्यं वर्तते। ते दीपतूल्यप्रकाशमानाः सन्ति। यथा–

**यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे।**

**भास्वन्ति रत्नानि महोषधीश्च, पृथूपदिष्टां दुदुहुर्धरित्रम्।।**[१]

अर्थात्– महामेरौ दोहनं कर्तरि अवस्थिते सति, सर्वे निषधविन्ध्यादयोऽन्ये शैलाः हिमवन्तं वत्सं कल्पयित्वा भूमिं प्रशस्तशोभायुक्तानि पद्मरागमौक्तिकप्रभृतीन् मणीन् वीर्ययुक्ताः मृतसञ्जीवनीप्रभृती औषधयः दोहियामासुः। श्री मद्भागवते एकः प्रसङ्ग आगच्छति पुरा वेननाम राजा दुश्शीलो दुष्पराक्रमोऽभवत्, सः विना विचार्य पर्यावरणस्य दुरुपयोगः न कुर्यात् तदर्थं लोककल्याणाय पृथिवी श्रेष्ठौषधादीन् स्व शरीरे गोपयामास। गच्छताकालेन पृथुराजा क्षुत्क्षामदेहानां प्रजानां अन्नपानाद्यभिष्टसिद्ध्यर्थं गोरुपधरामुर्वीं प्रजाभिरात्माभीष्टमर्थं दोहयामास। अत्र हिमवतो वत्सत्वनिर्देशात् वसुन्धरासारभूतानां रत्नादीनां समृद्धिर्हिमवति द्योत्यते। वत्सनिपीतशेषं दोग्धार उपयुञ्जत इति न्यायात् । अपि च देवादीनामिष्टदोहने महेन्द्रादीनां स्वजातिश्रेष्ठानामेव वत्सत्वं परिकल्पितम्।

**सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः। सर्वकामदुघां पृथ्वीं दुदुहुःपृथु भाविताः।।**[२]

इति भागवतवचनात्। अतो हिमवतः स्वजातिश्रेष्ठत्वमनेन श्लोकेनोच्यते। अन्यच्च–

**अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्य विलोपि जातम्।**

**एको हि दोषो गुणसन्निपाते,निमज्जतीन्दोः किरणेष्विवाङ्कः।। कुमार,१/३।।**

अर्थात् उत्तमवस्तूनां जन्मकारणस्य हिमवतः सौभाग्यं नाशयितुं, उमाख्यकन्यारत्नस्य,

---

१. कुमारसम्भव –१/२, २. श्रीमद् भागवत्–४/१८/२६

वैदूर्यादीनां मणिरत्नानां देवदारुप्रभृतीनां वृक्षरत्नानां, मृतसञ्जीवनीप्रभृतीनाम् औषधीरत्नानां, गङ्गादीनां सरिद्रत्नानां च सोमलताप्रभृतीनां यज्ञरत्नानां च हिमदोष एको न शशाक रमणीयतामपहन्तुम्। हिमालयः स्व असीमप्रकृतिसम्पदां सर्वेभ्यो मुत्तहस्तेन ददाति। अतः तस्य दानकर्मणि नास्ति सन्देहः। हिमावृतप्रदेशं विहाय उन्नतावन्नताऽन्य क्षेत्रेषु सर्वतः वन्यसम्पदा दृश्यते अत्रस्थ वनसम्पदः जनान् दीव्यौषधीं प्रदाय आरोग्यंजीवनदानं च ददाति। यत्र ओषधयः रजन्यां वनेचराणाम् अतैलपूरा सुरतप्रदीपा भवन्ति। यथा– **वनेचराणां वनितासखानां,दरीगृहोत्सङ्गनिषक्तभासः।**

**भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः।।कुमार.१/१०।।**

हिमालयस्य वने उपलब्ध विविध पादप–वृक्षतः भोजनम्(फलम्) वस्त्रं(वल्कल) गृहम्(उटज) आश्रमस्य जनानां कृते प्राप्तं भवति। ऋषयोऽपि मलानां सेचनेन वृक्षान्–पादपान् च स्नेहेन वर्धयन्ति यतः ते वृक्ष–पादपादीनां महत्त्वं जानाति। यथा–

**आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः।**
**आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः।।**[१]

अर्थात्– आश्रमाः उटजाङ्गणम् आवसद्भिः मृगैः मूलसेकसरसैः बालवृक्षैः शोभां बिभ्रति। आश्रममृगा हि प्रभावसमयादारभ्य दिनान्पर्यन्तंबहुलतृणेषु प्रदेशेषु चरन्तः सायमुटजाङ्गमधितिष्ठद्भिर्नानावर्णै मृगैः सिक्तमूलतया स्निग्धच्छायैर्वृक्षैश्च मुनिजनाश्रमानययो प्रीतिं वितरन्तीति। हिमालये सुशोभितवृक्षाणां त्वक्(भूर्जपत्रम्) धातुरसञ्च विद्याधरसुन्दरीणां काव्यव्यञ्जकलेखकरणे उपकारं व्रजन्ति। यथा–

**न्यस्ताक्षरा धातुरसेन यत्र, भूर्जत्वचः कुञ्जरबिन्दुशोणाः।**
**व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम्।।**[२]

हिमालयस्य अनेकानेकपर्वतशिलासु रत्नखनिजादि औषधीनां बहुलता वर्तते। प्रमथगणाः शिलाजतुः व्याप्तेषु शिलातलेषु उपविश्य भगवतः शंकरस्य सेवा कुर्वन्ति स्म यथा–

**गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्दधानाः।**
**मनः शिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु।।**[३]

---

१. कुमारसम्भव –८/३८, २. – १/७, ३. –१/५५

अनेन भूतगणास्तद्देशसुलभैरूपभोग साधनैर्भगवत्सन्निधावेव उपविविशुः। अत्र हिमालये हरितालस्य प्रसङ्गमपि आगच्छति, येन मानवप्रकृत्योः निकटसम्बन्धं प्रकटयति, कारणञ्च हरितालम् वर्णद्रव्यविशेषम्, मनः शीलां धातुविशेषम् उभाभ्यां विवाह–दीक्षा–सूचकरूपेण तिलकं क्रियते। यथा–

**अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च।**
**कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमन्नमय्य।।कुमार.७/२३।।**

विशेषः – प्रसाधिकाजनकर्तव्यप्रसाधनसमाप्त्यानन्तरं मेना स्वयमेव देव्याः (प्रकत्याः) वदनमादौ कर्णावसक्तामलदन्तपत्रं कृत्वा – दक्षिणस्ताङ्गुलिभ्यामार्दं हरितालं मनश्शिलां चादाय चिबुके गृहीत्वा तिलकविधानार्थं मुखमुन्नमय्य मुखदर्शनकुतूहलात् किञ्चित्कालं तुष्णीमेव स्थितवतीति। हिमालयस्य वनेषु प्राप्तजन्तवः वनसम्पदायाः समृद्धौ सहायकाः मानवोपयोगिनश्च भवन्ति। पृथिव्याः प्राकृतिकसम्पदानां दोहनार्थं हिमालयस्य वत्सरूपे चिन्तनं पर्यावरणदृष्ट्याऽतीव महत्त्वशाली प्रसङ्गो वर्तते। यथा–

**यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे।।कुमार.१/२।।**

हिमालयस्य सर्वाधिकमहत्त्वपूर्णमवदानं "यज्ञाङ्ग्योनित्वम्" वर्तते। येन कारणेन यज्ञसाधनं सोमलतादीन् उत्पाद्य यज्ञांशस्याधिकारि जातः,देवश्रेणीमपि प्राप्तवान्। यथा–

**यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं वरित्रीधरणक्षमं च।**

**प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्टत्।।**[१]

प्रजापतिः स्वयमेव हिमवन्तं शैलाधिपतित्वमनुष्ठितवान्। यथा– उक्तं च ब्रह्माण्डपुराणे–

**शैलानां हिमवन्तं च नदीनां चैव सागरम्। गन्धर्वाणामधिपति चक्रे चित्ररथं विधिः।।**

अन्यच्च– विष्णुपुराणेऽपि हिमालयस्य यज्ञाङ्गयोनित्वंविषये।–

**"यज्ञङ्गार्थमया सृष्टो हिमवानचलेश्वरः।।"**

कुमारसंभवस्य षष्ठसर्गेऽपि यज्ञभागभुक् हिमालयं ऋषिः अङ्गिरसं कथयति। यथा–

---

१. कुमारसम्भव –१/१७,

**यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया।**
**उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथिकृतम्।।कुमा.६/७२।।**

यज्ञीयकसष्ठः,हवनीयद्रव्यः, समिधा, दर्भ च वनेभ्यः प्राप्यन्ते । पुण्योदकानि नदी–निर्झरेभ्यः प्राप्तं कुर्मःवयम् । भारतभूभागे सर्वप्राणीनां सुचारुजीवनसंचालनार्थं हिमालयस्यैव सर्वप्रथमयोगदान वर्तते। यथा – यज्ञधूमात् वृष्टिः वनस्पतिः, वनस्पतेः जीवानां पोषणं भवति। अस्य पुष्टता गीतायां। यथा–

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।**
**यज्ञात् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।गीता. ३/३।।**

अनेनप्रकारेण मूलत् यज्ञसामग्रीप्रदाता हिमालयस्योपरिसर्वेषां दृष्टिः गत्वा स्थिरो भवति। सवजन्तूनां जीवनदाताऽपि हिमालयः कथितुं शक्यते। भूभारवहनार्थ हिमालय एव समर्थोऽस्ति। अतः **"यस्यसारं धरित्रीधरणक्षमं च"**, शैलाधिपतिः (कुमार. १/१७) नगाधिराजः (कुमार. १/१) एवं प्रकारेण तस्य महत्त्ववर्णनं कृतमस्ति। यद्यपि सर्वे पर्वताः **"भूधरः"** **"महीधरः"** नाम्नाख्यातिमापन्ना सन्ति, धरायाः प्राकृतिक सम्पदाभिः सह जीवानां संरक्षणं संवर्द्धनञ्च सर्वे पर्वता कुर्वन्ति, तेन पर्यावरणे संतूलता वर्तते। इतः परं हिमालये तु धरिणीधारणक्षमता वर्तते। अतः अत्युतुङ्गता सर्वातिशायी प्रभावशालीत्वात् हिमालयं **"त्रिविक्रमः"** एतादृशीमहिमा स्वाभाविकरूपेण प्राप्तोऽस्ति। यथा–

**तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः।**
**त्रिविक्रमोद्यतस्यासीत्स तु स्वाभाविकस्तव।।कुमार.६/७१।।**

अर्थात्– हरेः त्रयो विक्रमाःपादविक्षेपाः। बलिमुखे पदत्रयेण त्रैलोक्यं क्रमितुमुद्यतः। विष्णोर्महिमा वामनावतारे सकृदेव सर्वलोकव्यापी बभूव तव (हिमालयस्य) तु स्वाभाविकः स्वभावसिद्धः। हिमवाच्छिखराणामतिमहत्त्वादित्थमुक्तम्। भूमेः पोषणे हिमालयस्यानन्तावदानं विद्यते। अतः हिमालयस्य विष्णुना सह तूलनाकृतमस्ति। यथा–

**स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते।**

**चराचराणां भूतानां कुक्षिराधारतां गतः।।**[१]

सम्पूर्णभारतभूभागस्याऽखिलपर्यावरणं हिमालयस्य पर्वतमालातः प्रभावितोऽ स्ति।

---

१. कुमारसम्भव –६/६७,

"बङ्गालस्य खाडीतः उत्थितान् आद्रतावाहीपवनान् हिमालयःपश्चिमे परावर्तयति, अन्यथा सरलमार्गेण चीनदेशे आगमिष्यन् येन उत्तरमश्चिमी मध्यभारतस्याऽधिककांशो भागः पर्याप्तवर्षातः वञ्चितो ऽभविष्यत्।"[१]

हिमालयात् प्रवाहिताः गङ्गादयः नदीषु जलं अत्यन्तनिर्मलं शुद्धञ्च भवति। यथा–

**आच्छिन्नामलसन्तानाः समुदोर्मिनिवारिताः।**

**पुनन्ति लोकं पुण्यत्वात् कीर्तयः सरितश्च ते।।कुमार.६/६९।।**

अर्थात्– त्वत्तो निर्गता गङ्गाद्याः सरितो लोकस्याघं हरन्ति। निसर्गपावनत्वात् सर्वान् पुनन्ति च। पृथिवीं स्वजलैः सेचनेन शस्यश्यामला कुर्वन्ति। अतः पर्यावरणदृष्ट्या हिमालयस्य अतिमहत्वं वर्तते। हिमालयस्य चराचरजगतः आधारत्वेन कुमारसम्भवे वर्णनमस्ति। यथा– **"चराचराणां भूतानां कुक्षिराधारतां गतः।।"** कुमार.६/६७।। हिमालयस्य व न्यजीवानां जीवने आवश्यकवस्तूनां पूर्त्या सह पर्यावरणसंरक्षणेऽपि योगदानं वर्तते। अस्माकं कृते विशालप्राणवायोःभाण्डागारं हिमालयो वर्तते। भूगर्भीयजलसञ्चयकर्ता, वन्यसंसाधनप्रदाता, तथा वन्यजीवानां निवासस्थानमपि हिमालयोऽस्ति। अत्र पृथक् पृथक् गुणयुक्ताः वनस्पतयः प्राप्यन्ते, ये विशेषतः रोगनिवारिकाः भवन्ति। अत्राऽरण्ये सघनाः उन्नताः प्रचुरमात्रायाम् वृक्षाः सन्ति, ये अस्मान् जीवनार्थं प्राणवायुः ददति, एतादृशी प्रकृति सम्पदा भारतेऽपि अन्याऽरण्ये दुर्लभोऽस्ति। एवं प्रकारेण हिमालयस्य वनानि भारतीय पर्यावरणसंरक्षणे सन्तूलने च सहायकभूता सन्ति।

हिमालयतः वयं भूमिः उर्वरामृत्तिका, क्षेत्रेषुसञ्चनार्थं नदीनां जलम्, कृषि–उद्योगविकासार्थं वन्यसम्पदामपि प्राप्स्यामः। ग्रीष्मर्तौ हिमालयः अस्मान् स्वास्थ्यवर्द्धक जलवायुः ददाति, जनाः मानसिकशान्तिप्राप्यर्थं उत्तराखण्डस्य यात्रां कुर्वन्ति। हिमालयस्य भूमिः पार्वत्याः तपेन पवित्रमस्ति। यथा–

**प्रभामहत्या शिखयेवदीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।**

**संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च।।**[२]

अत्र शिखया दीपस्य पूतत्व तमोऽनभिभवनियत्वं, विभूषितत्वं तु स्पष्टमेव। पातालभूतलाकाशवाहिवीत्वात् त्रयो मार्गा यस्याः सा त्रिमार्गा गङ्गा, आकाशस्य गङ्गया

१. मौसम विज्ञान, पृ. ३६१–बनर्जी एवं उपाध्याय, २.कुमारसम्भव –१/२८,

पूतत्वंतच्छीकरादि सम्पर्कात् तत्रत्यानां दुरितनिवृतिः। विभूषितत्त्वं दर्शनीयत्वं। अनेनोपमानेन हिमवतः समीपवर्तीनामपि जनानां शुद्धि दर्शिता।हिमालयस्य सौन्दर्यतां विलोक्य महादेवः स्वकीयमेव मूर्तिभेदं दीपितमग्निप्रतिष्ठाप्य कयापि फलकामनया तपश्चक्रे। यथा–

**तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टःमूर्तिः।**
**स्वयं विधाता तपसः फलानां केनाऽपि कामेन तपश्चचार।।**[१]

महाकविः कालिदासस्य अस्मिन् कृतौ हिमालयस्य भौगोलिकस्थितिः तस्य विस्तारः, जलसंसाधनम्, खनिजसम्पदा, वनस्पतिवैभवम्, तथा जीव– वैविध्यतायाः सूक्ष्माऽतिसूक्ष्ववर्णनमाध्यमेन पर्यावरणस्य सम्यक् निरूपणं कृतमस्ति।

## (२) हिमालयस्य भौगोलिकस्थितिः।

कुमारसंभवस्य प्रथमसर्गस्य प्रथमपद्ये हिमालयपर्वतमालायाः उल्लेखः उत्तरदिशावर्ती, पूर्वापरौ वारिनिधिं सम्प्राप्य स्थितः पर्वतराजरूपेणोल्लेखो वर्तते। यथा–

**अस्त्युत्तरस्यां दिशिदेवतात्मा हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधि वगाह्य स्थितः पृथिव्या इव मानदण्डः।।कु मार. १/१।।**

सर्वे जानन्त्येव यत् भारतवर्षस्योत्तरस्यां दिशि हिमालयो वर्तते। अस्य विशालता नृपे स्थितयोग्यतां च दृष्ट्वा पर्वतानां नायकभूतस्य हिमवतः **"नगाधिराजः"** पद्वी उचितं दृश्यते। पूर्वतः पश्चिमसमुद्रप्रर्यन्तं विस्तारितः हिमालयस्य शृङ्खलबद्धता भरतवर्षस्य भौगोलिकदृष्ट्या,पर्यावरणदृष्ट्याश्चापि अतिमहत्त्वं वर्तते। विश्वस्यायं सर्वोच्चपर्वतमाला पश्चिमे सिन्धुः पूर्वस्मिन् ब्रह्मपुत्रस्य मध्येकोवृत्ताकारः इवस्थितोऽस्ति। हिमालयस्य विस्तारविषये महाभारतवर्षस्य भीष्मपर्वेऽपि षड्वर्षपर्वतानां (हिमालयः, हेमकूट्, निषधः, नीलः, श्वेतगिरिः, शृङ्ग्वान्)शृङ्खलायाः उभयतः पूर्वः तथा पश्चिमसमुद्रे विलीनाः भवन्तीति वर्णनं प्राप्यते। यथा– **प्रगायता महाराज षडेते वर्षपर्वताः।**

**अवगाढा ह्युभयतः समुद्रौ पूर्वपश्चिमौ।।**[२]

## (३)हिमालये जलसंरक्षणम्।

हिमालयस्योन्नतानि शिखराणि हिमाच्छादितानि भूते सत्यपि अत्र कमलान्विताः जलाशयाः

१.कुमा. – १/५७, २.महाभारत– ६/३

सन्ति। यथा–

**सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान् परिवर्तमानः।**

**पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः।।** [१]

अत्र उपरि यानि सरांसि सन्ति तेषु रुहाणि पद्मान्यधः परिवर्तमानो भ्रमन्विवस्वान् सूर्यः उर्ध्वमुखैर्मयूखैः विकासयति । हिमालयतः अविच्छिन्न प्रवाहिताः गङ्गादयः नद्यः स्व पवित्रत्वाल्लोकान्पावयन्ति। अस्मिन् लोके अंगिराऋषिः हिमालयस्य महत्वं प्रदर्शयन् नद्याः सह तूलयति। यथा–

**अविच्छिन्नामलसन्तानाः समुद्रोर्म्यनिवारिताः।**

**पुनन्ति लोकान्पुण्यत्वात् कीर्तयः सरितश्च मे।।कुमार.६/६९।।**

अन्यच्च– गङ्गायाः जलप्रवाहैः देवदारुवृक्षाणां सेचनोल्लखात् जलबाहुल्यमनुमीयमे। यथा–

**"गङ्गाप्रवाहोक्षितदेवदारुः।।"कुमार.१/५४।।**

बाल्यकाले बाल्यसुलभरससम्पन्ना पार्वती प्रदूषणरहिताः स्वच्छजलवायुसहिता मन्दाकिनीनद्याः सैकतेषु पुलिनेषु वेदिकाभिः कन्दुकैश्च सख्या सह खेलति स्म। यथा–

**मन्दाकिनी सैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च।**

**रेमे मुहुर्मध्यगतां सखीनां क्रीडारसान्निर्विशतीवबाल्ये।।कुमार.१/२९।।**

प्रकृकिवर्णनप्रसंगे महाकविः कालिदासः हिमालयस्य सुन्दरनिर्झराणां वर्णनं कर्तुं नैव विस्मरति। यथा–

**सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति।**

**इन्द्रचापपरिवेषशुन्यतां निर्झरास्तव पितुर्व्रजन्त्यमी।।** [२]

अर्थात् जलसीकरेषु पतन्तो रविकिरणा नानावर्णसमुदायमण्डलानि विरचयन्ति।

---

१. कुमारसम्भव –१/१६, २. –८/३१,

सूर्यमण्डलस्याधोमुखत्वात् समुन्नतेभ्यो हिमवच्छिखरेभ्यो निपततां जलप्रवाहसीकराणां रविकरसम्पर्काभावान्नानाप्रभामण्डलान्यपि निवृतानीत्यर्थः। भागीरथी गङ्गाप्रवाहपाथः कणानां महत्त्व पावनत्वञ्चवर्णयन् कविः कथयति। यथा–

**भागीरथी निर्झरसीकराणां वोढा मुहुः कम्पितदुवदारुः।**

**यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्न शिखण्डिबर्हः।।[१]**

अत्र तमः प्रकृतिनां मृगवधलालसानां किरातानामप्यनवरतगङ्गाजलसेवनप्रतिपादनेन प्रारब्धभोगक्षये तत्रत्यानां मुक्तिरेव ध्वन्यते गङ्गायाः पावनत्वविषये स्वयं हिमालयः स्वमुखेन सप्तऋषीन् श्रावयति। यथा–

**अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः।**

**मूर्घ्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः।।[२]**

अर्थात्– मां द्वयेनैव शुद्धमवगच्छाति। केन द्वयेन? उत्तरम्– मूर्घ्नि मन्दाकिनी पातेन युष्माकं क्षालितयोः पादयोरम्भसा च। विशेषः – अस्मिन् श्लोकमाध्यमेन महाकविः अस्मान् उपदिशति यत् भागीरथीगङ्गायाः केवलं पर्यावरणदृष्ट्यारेव महत्त्वं नास्ति अपितु धार्मिकदृष्ट्याऽपि महत्त्वं वर्तते। तस्याऽनेक पुराणेषु मोक्षदायिनी रूपेणाऽपि वर्णनं प्राप्यते। यथा श्रीमद्भागवतपुराणे–

**यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि।**

**सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः।।भाग.९/९/१२।।**

निर्झराणां प्रपातानां वा जन्म प्रायः नद्याः शैशवकाले उच्चपर्वतीयभूभागतः पर्वतीय पाद–प्रदेशपर्यन्तं – कठोर – कोमल – पाषणयोः क्रमिकप्रवाहतलं प्राप्य भवन्ति। अतः अधिकांशतः इमे, नद्याः पर्वतीयोद्गमक्षेत्रे निर्मिताः भवन्ति। भागीरथी, मन्दाकिनी, अलकनन्दा क्रमशः गङ्गोत्री, केदारनाथः , बद्रिनाथादि उन्नतशिखरेभ्यः उद्भूताः सन्ति। तासाम् उद्गमस्थलानां सन्निकटैव जलधाराणां निर्झराः भवितव्याः। महाकविः कालिदासानुरेणगङ्गायोद्भवः हिमवतोन्नतशिखरात् जाताऽस्ति। यथा–

---

१. कुमारसम्भव –१/१५, २.–६/५७

यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः।

प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया।।कुमा.६/७०।।

पूर्व परमेश्वरशिरः प्रदेशपतनेन गङ्गा नान्या मत्सदृशी नदीत्यात्मानं बहुमन्यते, द्वितीयेन त्वयि निपातेनापि तथैव बहुमन्यत इति। अत्र हिमवतः परमेश्वरसाम्यप्रतिपादनेन वक्ष्यमाणस्य परस्परसम्बन्धस्य युक्तत्वं द्योत्यते।

## (४) रत्नधातुसम्पदायाः पर्यावरणदृष्ट्या महत्त्वम्।

अद्यत्वे जनाः नूतनभवनस्यनिर्माणं कुर्वन्ति, तदा भवनानि अनेकरागात् रञ्जयन्ति, तेन पर्यावरणस्यहानिर्भवति। कारणञ्च आपण्यां ये विविधवर्णाः प्राप्यन्ते ते अनेकरासायणिकक्रियाद्वारा निर्मीयन्ते। अतः तेन वायुः प्रदूषितो भवति, प्रदूषितो वायुः जीव–जन्तूनाम् आभ्यान्तरे प्राणवायुरूपेण गच्छति। तेन शरीरे हानिर्भवति, अनेकाः रोगाः जायन्ते। परन्तु अरण्येप्राप्ताऽनेकधातूनां प्रयोगैः पर्यावरण प्रदूषितो न भवति।

अधुनाऽपि अरुणाञ्चलप्रदेशे, उत्तराञ्चलप्रदेशस्य गढवालान्तर्गत ग्रामीण क्षेत्रे, नेपालस्य ग्रामीणक्षेत्रे, यदा–यदा भारतीयोत्सवाः आगच्छन्ति, तदा–तदा भवनम् वनेप्राप्तगेरुद्वारा रञ्जयन्ति शरीरस्य शोभार्थम् सुन्दराणि पुष्पाणि स्वीकुर्वन्ति। (स्वाऽनुभवतः) तेन पर्यावरणस्य सुरक्षा भवति। कुमारसम्भवेऽपि रत्न–धात्वोः वर्णनं प्राप्येते। अत्र प्राकृतिकवस्तूनां वर्णने कालिदासस्य, पर्यावरणप्रदूषितं न स्यात्, तदर्थं दीर्घचिन्तनमस्ति। हिमालयः अनन्तरत्नानां प्रभवकर्ता वर्तते। यथा–

अनन्तरत्नप्रभवस्य यस्य।।कुमार.१/३।।

हिमालयस्य पर्वतशिखराः विविधसिन्दूरगैरिकादयः धातुभिः रङ्गरञ्जिताः दृश्यन्ते। तो धातुसम्पदाम् अप्सरः स्त्रियः शरीरस्य शोभार्थे अलङ्काररूपेण स्वीकुर्वन्ति। यथा–

**यश्चाप्सरोविभ्रममण्डनानां, सम्पादयित्रीं शिखरैर्बिभर्ति।**
**बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम्।।**[१]

अर्थात्– हिमवान् शृङ्गैः धातुसम्पदं दधाति। तां अप्सरसः स्त्रीणां विलासेन अलङ्काराणां सम्पादायत्रीम्। अनेन विशेषणेन धातुसम्पदामप्रयाससाध्यत्वाद्

१.कुमारसम्भव – १/४,

अन्यालङ्कारसाधनेभ्यो व्यतिरेको दर्शितः। धातुसम्पदां रागातिशय उत्प्रेक्षा हेतुः। अन्यच्च–

**सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च।**
**पश्य धातुशिखरेषु चात्मना संविभक्तमिव सान्ध्यमातपम्।।**[१]

अर्थात्– आदित्येन पर्वतानां, सिंहानां स्कन्धरोमावलीषु किसलयः पुष्पवत्सु वृक्षेषु गैरिकपूरितेषु शृङ्गेषु आतपं सम्यग् विभज्य दत्तम्। एकेनहि बहुभ्यो दीयमानं वस्तु परिक्षीयमाण भवतीति। "**धातोः**" शब्देन वयं प्रायः स्वर्ण रजतादि खनिजतत्त्वानामर्थग्रहणं कुर्मः, परन्तु खनिजतत्त्वानि खननेन प्राप्यन्ते। मृत्तिका अथवा शिलातलरूपे सिन्दूर– गेरूभिः संरचितशिखरः पीतरक्ताभः द्रुष्टुम् शक्यते। इमे धातुरागः श्रृङ्गारोपयोगी, लेखनोपयोगीश्च भवितुं शक्नुवन्ति। शैलेययुक्तशिलाः ग्रीष्मसूर्यकिरणैः संतप्तपर्वत– शिलाभिः प्राप्तशिलाजतुः नाम्ना प्रसिद्धधातुसारैः युक्ताः सन्ति। हिमालयस्य धातुमत्तायाः निरूपणं कालिदासः मानवीकरणरूपेण करोति। यथा–

**धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः।**

**प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति।।**[२]

अर्थात्– गैरिकवत् रक्तवर्णः ओष्ठो यस्य सः। अनेनास्याधरस्य स्थावरात्मके शरीरे दृश्यमानेन धातुना साम्यमुक्तम्। प्रांशुः उन्नतकायः अनेन स्थावर शरीरे दृश्यमानं प्रांशुत्वंप्रतिपाद्यते। देवदारुर्वृक्षविशेषः तर्वद् बृहन्तौ महान्तौ भुजौ यस्य सः। अनेन भुजस्य स्थावरशरीरे दृश्यमानैर्देवदारुभिः सादृश्यमुक्तम्। प्रकृत्या स्वभावतः एव शिलेव कठिनं विस्तीर्णं च उरः वक्षप्रदेशो यस्य सः। अनेन स्थावराकारे दृष्टचरैः शिलापट्टैरस्य वक्षसः साम्यमुक्तम्। स्थावराकारावयवभूतैर्धातुदेवदारुशिलापट्टैरस्याप्यधर भुजवक्षसां सादृश्योपलम्भात् प्रांशुत्वाच्च देवशरीरा वलम्बनेऽपि हिमवान् इति सुव्यक्तोऽभूत्। अनेनरस्य शरीरस्य महापुरुष लक्षणं प्रतिपादितम्। प्रकृतेरस्य मानवीकरणस्येदम् उत्तमम् उदाहरणम्।

## (५) कुमारसम्भवे जलवायुसंरक्षणम्।

अस्माकंदेशे जलवायोः परिवर्तनं ऋतोः अनुसारं भवति। महाकविः कालिदासेनाऽपि जलवायुपरिवर्तनविषये स्वरचनायां सम्यक् वर्णनं कृतमस्ति। यदा वसन्तर्तौ सूर्योऽत्तरायणे सति सरलाः सूर्यकिरणाः हिमालयपर्यन्तं समुपगच्छन्ति, तेन हिमालये ग्रीष्मस्य

१. कुमारसम्भव – ८/४६, २. –६/५१,

न्यूनाधिकप्रभावो दृश्यते। यथा–

**कुबेरगुप्तांदिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।**

**दिग्दक्षिणा गन्धवहमुखेन व्यलीकनिश्वासमिवोत्ससर्ज।।**[1]

अर्थात्– सूर्ये साहसिके च नायके दक्षिणायनकालं व्यतिक्रम्य धनपतिपालितां उदीचीं नायिकां चलितुं प्रवृत्ते सति दिग्दाक्षिण्यवती नायिकावक्त्रेण अनिलं प्रियतमकृतापराधनिमित्तं दीर्घनिश्वासमिव प्रवर्तयामास। ग्रीष्मर्तौ हिमालयस्य गौरीशिखरे दिनेसूर्यः तपति ।यथा–"तथातितप्तं सवितुगभस्तिभि र्मुखं तदीयं कमलश्रियं दधौ।।" कुमार. ३/२१।। अर्थात्– यथा कमलं सूर्यरश्मिसंयोगे नितरां शोभते, तथास्या वदनमपि पद्मशोभां प्राप। रात्रीश्च अमृतमयचन्द्रकिरणैः युक्तो भवति । यथा–

**"रसात्मकस्योडुपतेश्च रश्मयः।।"कुमार. ५/२२।।**

अर्थात् हिमालयस्यपर्वतमालानां विभिन्नोच्च शिखरेषु वृष्टिवैविध्यस्य कुमारसंम्भवे चमत्कारपूर्णचित्रं प्राप्यते। निम्नशिखरेषु प्रबलवृष्टिभूते सत्यपि उन्नतशिखरेषु सूर्यातपो भवति। यथा –

**आमेखलं सञ्चरतां घनानां छायामधः सानुगतां निषेव्य।**

**उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः।।**[2]

अर्थात्–सिद्धाः संप्राप्ताष्टैश्वर्याविश्वावसुप्रमुखाः देवयोनयः मध्यसानुप्रदेशः तत्रैव सञ्चरतां मेघानांम् अनातपं मेघमण्डलाधस्तटानि प्राप्ताः सन्तः उष्णबाधानिवृत्तिपर्यन्तं नितरां सेवित्वा, पुनश्च वृष्टिभिः पीडिताः सन्तो हिमाद्रेः सातपानि शिखराणि सेवन्ते। अत्र पर्वतवर्तिनां जनानां छायातपयोः यथेष्ट निषेवणप्रतिपादेनातिक्रान्तमेघमार्गत्वप्रतिपादनेन चास्य सर्वकालरमणियत्वम् औनत्यं चोक्तम् । बाह्यहिमालयस्य निम्नशिखरे समुद्रीवातावरणाधारेण वर्षा भवति, तदा उत्तरीक्षेत्रे न्यूनाश्च । गौरीशिखरे वर्णितविद्युतसहितवृष्टिः प्रचूरवर्षायाः परिचायकोऽस्ति। यथा–

---

१.कुमारसम्भव – ३/२५, २. –१/५,

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु।

व्यलोकयन्नुन्मिषतैस्तडिन्मयै र्महातपः साक्ष्य इवस्थिताः क्षपाः।।[1]

अतोऽयं दक्षिणदेशः नीम्नभागे सन्निकटे स्यादिति अनुमीयते । अत्रैव हेमन्तर्तौ हीमकणैः शीतवायुयुक्तरात्रयः तुषारवृष्टिकारणतः पद्मविहीनसरोवराणां वर्णनं प्राप्यते। यथा–

निनाय सात्यन्तहिमोत्किरानिलः सहस्यरात्रीरुदवासतत्पराः।

परस्पराक्रन्दिनि चक्रवाकयोः पुरोनियुक्ते मिथुने कृपावती।।

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना।

तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम्।।[2]

तत्रैव तपलीनापार्वती जलमध्ये स्थित्वा सुदीर्घपौषरात्रीम् अत्यवाह्यत्। उपरोक्त जलवायुविषयक वर्णनेनानुमीयते यत् कालिदासेन लघुत्तरा तथा बाह्यहिमालयपर्वतमालायैव मुख्यतया वर्णनं कृतमस्तीति।

## (६) हिमालये वर्णित स्थानानि ।(पर्यावरणदृष्ट्या)

पर्यावरणवर्णनप्रसङ्गे कविना चमत्कारपूर्णरीत्या हिमगिरिपर्वतशृङ्खलायां कतिपयाः शिखरतपोवननगरादीनां वर्णनं कृतवान्नस्ति। यथा–

**अ. शिवतपोवनम्–** शिवस्य हिमालयस्थ तपोवनं पर्वतशिखरे विद्यते। यत्र चर्माम्बरः नियतचित्तः पशुपतिः तपसार्थं हिमाद्रेः सानुमध्युवास। यथा–

स कृतिवासास्तपसे यतात्मा गङ्गाप्रवाहोक्षितदेवदारुः।

प्रस्थं हिमाद्रेमृगनाभिगन्धि किञ्चित् क्वणत्किन्नरमध्युवास।।[3]

हिमालयस्य पर्वतोच्चभागे सुशोभितः रुद्रस्याश्रमे एकदा देवकार्यार्थं मदनः जगाम। यथा–

---

१.कुमारसम्भव – ५/२५, २. – ५/२६, २७, ३. –१/५४

**स माधवेनाऽभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः।**

**अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम।।[1]**

अत्र शिवतपोवने तुषारसंघातशिलामया भूते सत्यपि, वसन्ततौं उष्णताऽनुभूयते। यथा–

**हिमव्यपायाद्विशदाऽधराणामापाण्डरीभूतमुखच्छवीनाम्।**

**स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु।।[2]**

वनस्थितोऽयमाश्रमः वसन्तकालिकवविधवनस्पतिभिः सुशोभितो भवति। मन्दाकिनीतटीय ओषधीप्रस्थानतोऽयमाश्रमः कदाचित् सन्निकटैवाऽसीत्, कारणञ्च पार्वती अत्र प्रतिदिनं शिवपूजनार्थमागच्छति स्म। यथा–

**अवचितवलिपुष्पा वेदिसम्मार्गदक्षा, नियमविविधिजलानां बर्हिषां चोपनेत्री।**

**गिरिशमुपचचार प्रत्यहं सा सुकेशी, नियमितपरिखेदा तच्छिरश्चन्द्रपादैः।।[3]**

अर्थात्– शोभनभूर्धजा पार्वती लूनानिपूजाकुसुमानि एतादृशी सा अवस्थानभूमिशोधनदक्षाः कुशानां च समीपप्रापणं कुर्वाणा सती परमेश्वरस्य शिरसि यश्चन्द्रः तस्य रश्मिभिः निवर्तितपरिश्रमा सती प्रतिदिनं गिरिशम् उपचचार। अत्र तच्छिरश्शब्देन पीडाहारकामां नित्यसुलभत्वं कूपरवनकवृतिश्चध्वन्यते। यथा कूपरवनकस्य खननोद्भवं खेदंतदुद्भूतमेव जलमपनयति, तथास्या अपि हरसेवाजनितश्रमस्तच्छिरश्चन्द्रपादैरेवानुपद्यत इति।उपर्युक्तवर्णनाधारेण कथयितुं शक्यते यत् इदमस्थानं गङ्गायारुपरिप्रवाहसम्बद्धा मन्दाकिनी तटेस्थितः मध्यमोच्च शिखरे (७०००/८००० फीट परिमतः कदाचित् भवितव्यम्।

## आ. पार्वतीतपोवनम्।

गौरीशिखरः नाम्ना प्रसिद्धोऽयं शिखरः हिमालयपर्वतमालायाः पर्वतशिखरे आसीत्। यथा–

**अथानुरुपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा।**

**प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्।।[4]**

---

१.कुमारसम्भव – ३/२३, २. – ३/३३, ३. – १/६०, ४. –५/७

अर्थात्– गौरी योग्येनानुग्रहेण संतुष्टा पूज्यतमेन पित्रा कृताभ्यनुज्ञा तपः कुर्विति कृतानुमतिः सती पश्चात्तपः सिद्ध्युत्तर काले जनेषु तस्याः गौर्याः संज्ञया प्रथितम् शिखरं ययौ।

पार्वत्यास्मिन् तपोवनस्य भौगोलिकविवरणं कविना सम्यग् नैवदत्तम्। मयूर–मृग–वृक्ष–लता–पर्णपाती वनानामाधारेण कथयितुं शक्यते यत् गौरीशिरस्य उच्चतमसीमा(७०००/८००० फीट) तः अधिका नैवाऽसीत्।

## इ. ओषधिप्रस्थस्य पर्यावरणदृष्ट्या महत्त्वम्।

इदं हिमवत्पुरं गङ्गाप्रवाहैः परिवेष्टितमस्ति। ओषधीप्रस्थस्योल्लेख पार्वत्या सह विवाहचर्चासमये स्वयं शिवः करोति। यथा–

**तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्। महाकोशीप्रपातेस्मिन्सङ्गमः पुनरेव नः।।**[१]

अर्थात्– महाकोशीति हिमवत्प्रभवा काचन् महानदी(अधुनाऽपि नेपालक्षेत्रे प्रवहति) तस्या पतनस्थानं तस्मिन् स्थाने कन्याप्रार्थनानन्तरमत्र दृश्यमाने महाकोशीप्रपतन एव भवद्भिरागन्तव्यं, वयं तु तत्रैव निवसाम इति। एवंरित्या कथनेन स्पष्टं भवति यत् ओषधिप्रस्थनगरम् तमिन्समये प्रसिद्धमासीत्। पार्वत्याः मन्दाकिनीसैकतटे बालकृडयाऽनुमीयते यदयं ओषधीप्रस्थः मन्दाकिनी तटवर्ती भवितव्येति। यथा–

**मन्दाकिनी सैकतवेदिकाभिः सा कन्दुकैःकृत्रिमपुत्रकैश्च।**

**रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये।।**[२]

स्वयं प्रकाशिताः औषधयः तत्र सन्तीति कारणात् अस्य नाम ओषधीप्रस्थः सार्थकोऽस्ति। यथा– **गङ्गास्रोतः परिक्षिप्तं वप्रान्तज्वलितौषधिः।**

**बृहन्मणि शिलासालं गुप्तावपि मनोहरम्।।**[३]

अर्थात्– गङ्गायाः प्रवाहैः परिवेष्टितं प्राकारमध्यप्रकाशमानौषधिः विपुलमाणिक्यानाप्राकारं रक्षायामपि रमणीयम्। अत एव गुप्तावपि संवरणेपि मनोहरम् दृश्यते स्म। तत्र नगरे गृहशिखरोन्मुखाः मेघाः भवन्ति स्म। यथा–

---

१.कुमारसम्भव – ६/३३, २. – १/२९, ३. – ६/३८

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।
अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः।।कुमार. ६/४०।।

अर्थात्–गृहाणां मेघमार्गावगाहित्वान्नित्यप्रवृतोत्सवेषु तेषु घनगर्जितानां मुरजस्वनानां च नित्यमनुस्यूतत्त्वादुभयोः सान्द्रगभीरत्वाच्च किमेतानि मेघगर्जितानि उत मुरजस्वना इति जनानां संशये सति परस्परभेदानगमस्य स्वतो दुष्करत्वेऽपि यत्र जनास्तालविशेषैरेव मुरजस्वनान् विविच्यावगच्छन्तीति। घनजर्जितानां तालविशेषाभावादिति। औषधप्रस्थे "गन्धमादन" नामकम् उपनगरं वर्तते। यत्र विद्याधराः विश्रामं कुर्वन्ति स्म। यथा–

**सन्तानकतरुच्छायासुप्तविद्याधराध्वगम्। यस्य चोपवनम् बाह्यं गन्धवद्गन्धमादनम्।।**[1]

कल्पवृक्षाछायासुप्त विद्याधरा एव पथिका ते तत्र उपवने विश्रामं कृत्वा पान्थपरिश्रमम् अपसारणं कुर्वन्ति स्म। अनेन हिमवतो रक्षाचातुर्यात् तेषां वीतभयत्वं द्योत्यते। अजरामरताऽऽरोग्यमयी, धनसम्पदाबाहुल्योऽयं नगरं हिमालयस्य स्वास्थ्यप्रदं पर्यावरणं तथा प्रचुरप्राकृतिकसंसाधनैः परिपूर्णोऽस्तीति ज्ञातं भवति। अत्रैव शिव–पार्वत्योः मङ्गलपरिणयोऽभवत्। प्रयणोत्सुकौ दिव्यदम्पती ओषधिप्रस्थतः प्रस्थनं कृत्वा मध्ये मन्दराचलं भूत्वा कैलासपर्वते– अप्रापताम्। यथा–

**देवोऽपि गौर्या सह चन्द्रमौलिर्यदृच्छया स्फाटिकशैलशृङ्गे।**

**शृङ्गारचेष्टाभिरनारताभिर्मनोहराभिर्व्यहरच्चिराय।।**[2]

अर्थात्– हरोऽपि कैलासशिखरे पार्वत्या सह स्वेच्छया यथाकामम् निरन्तरं भवन्तीभिः शृङ्गारचेष्टाभिः स्वसमयं यापयामास।।

## ई. गन्धमादन–वनम् ।

अत्रागत्य सपत्नीकः शिवः सन्ध्यासौन्दर्यस्य रसास्वादनं कुर्वन्ति। एतद् वनम् हिमालयपर्वततालया सम्बद्धः प्रतीयते, यतः हिमालयस्य निर्झराःदृष्टिपथे आगच्छन्ति। यथा–

**सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति।**

**इन्द्रचापपरिवेषशून्यतां निर्झरास्तवपितुर्व्रजन्त्यमी।।**[3]

---

१.कुमारसम्भव –६/४६, २. –९/४६, ३. –८/३१

अर्थात्– विवस्वति किरणैः पयः कणसम्पर्क दूरीकुर्वति सति। हे पार्वति अमि भवत्पितुर्हिमवतोः प्रवाहाः, नानावर्णप्रभाससमुहस्तस्य परिवेष्टनेन शून्यता व्रजन्ति।

जलसीकरेषु पतन्तो रविकिरणा नानावर्णसमुदायमण्डलानि विरचयन्ति। रविकिरणेषु निवृतेषु तान्यपि निवर्तन्त इति ख्यातिः। सूर्यमण्डलस्याधोमुखत्वात् समुन्नतेभ्यो हिमवच्छिखरेभ्यो निपततां जलप्रवाहसीकराणां रविकरसम्पर्काभावान्नानाप्रभामण्डलान्यपि निवृत्तानीति। अस्य पश्चिमे सुमेरुकेदारनाथौ स्तः, पूर्वे च मन्दरशैलशिखरोऽस्ति। यथा–

**यामिनीदिवससन्धिसम्भवे तेजसि व्यवहिते सुमेरुणा।।**[१]

एतद्वनम् निर्झरसरोवरवृक्षजीवजन्तुभिराकीर्णो वर्तते। एतत् असमतलपर्वतीयप्रदेशः मानसरोवरतः सन्निकटेवाऽस्ति, यतः गन्धमादनस्यवायुः मानसजलं तरङ्गयतीति। यथा–

**तौ क्षणं शिथिलितोपगूहनौ दम्पती चलितमानसोर्मयः।**
**पद्मबोधनिपुणाः सिषेविरे गन्धमादनवनान्तमारुताः।।**[२]

अर्थात्–रचितमानसकल्लोला, मदविकाससूचका, गन्धमादनवनान्तमारुताः तौ दम्पती क्षणकालं सेवितवन्तः। अत्र गन्धमादनशब्देन बहुविधमहाकुसुमसौरभशालित्वमुक्तम्। चलितमानसोर्मयः। अत्र मानसोर्मिरचनया परिश्रान्तत्वान्मान्द्यम् उर्मिसम्बन्धेन शैत्यं च द्योतते। कल्पवृक्षेण सुशोभितवनस्थलस्य अलौकिकतायाः वर्णनं कदाचित् महाकविः कालिदासमभिष्टोऽस्ति। यथा–

**पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम्।**
**मारुते चलति चण्डि केवलं व्यज्यते विपरिवृत्तमंशुकम्।।**[३]

अत्र कल्पतरुपल्लवभूतानामंशुकानां ज्योत्स्नायाश्च कल्पतरुशाखावलम्बितत्वाद् रुपसाम्याच्चेद मंशुकमियं ज्योत्स्नेति विवेक्तुमशक्यत्वेऽपि वायौ वात्यंशुकानां चलनदर्शनाद् ज्योत्स्नायाश्च तदभावान्मारुतपरिवर्तितस्यांशुकत्वं निश्चियत।

## उ. हिमालये वनस्पतिसंरक्षणम्।

महाकविः कालिदासस्य वर्णनानुसारेण हिमालयस्य भूमिः विविधप्रकाराणां वनस्पत्यौषधिभिः सुशोभितोऽस्ति। हिमालये रात्रौ भासमान ज्वालामुखी नामाख्य तृणविशेषस्य

१. कुमारसम्भव –८/५५, २. – ८/८६, ३. – ८/७१,

महत्वम् । यथा–

**वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।**
**भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतः प्रदीपाः ।।कुमा.१/१०।।**

हिमालये अनेकानि तृणानि, वनौषधश्च सन्ति ये रात्रौ प्रकाशमानो भूत्वा दीपस्यकार्यं कुर्वन्ति। अत्र महाकवेः वनौषधिविषये दीर्घचिन्तनं दृश्यते। पर्यावरणस्य संरक्षणार्थं यज्ञ आवश्यकोऽस्ति । यज्ञसाधनानाम् उत्पत्तिकारणं हिमालयो वर्तते । यथा–

**यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्री धरणक्षमं च ।।**[१]

पार्वत्या जन्मदिनं, शैलवृक्षादीनां, देवतिर्यङ्मनुष्यादीनामपि सुखाय बभूव । यथा–

**प्रसन्नदिक्पांसु विविक्तवातं शङ्खस्वनाऽनन्तरपुष्पवृष्टिः।**

**शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्म दिनं बभूव।।कुमार.१/२३।।**

नन्दनवने अनेकाः वृक्षाः सन्ति, तेषां नूतनपल्लवाः कर्णभूषणार्थं अमरस्त्रियः दर्यापूर्वकं स्वीकुर्वन्ति। वृक्षत्रासभयात् पुष्पचयने ऽपि सङ्कोचमनुभवन्ति। तान् वृक्षान् तारकासुरः क्रूरतापूर्वकं पातयति। यथा–

**तेनाऽमरवधूहस्तैः स दयालूनपल्लवाः।**

**अभिज्ञाश्च्छेदपातानां क्रियन्ते नन्दनद्रुमाः।।कुमार.२/३१।।**

अत्र अमरवधूनां मनसि वृक्षाणां प्रति दया वर्तते, ताः जानन्ति यत् वृक्षाणां संरक्षणमस्माकं दायित्वं वर्तते। वृक्षाः पर्यावरणसन्तूलने मुख्य भूमिकां भजन्ति, परन्तु तारकासुरः पर्यावरणविरोधीतत्वः वर्तते। अतः एतादृशः पर्यावरणविरोधिनः मृत्युः लोककल्याणाय भवतीति तात्पर्यः। वृक्षच्छेदनार्थं विरोधः कालिदासः अकरोत्। अस्मिन् श्लोके ब्रह्मा वृक्षस्य महत्वं प्रदर्शयन् देवान् कथयति । यथा–

**इतः सः दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।**
**विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ।।**[२]

---

१.कुमारसम्भव –१/१७, २. – २/५६,

यदि केनचित् पुरुषेण विषवृक्षोऽपि येनकेनाऽपि कारणेन वर्धितो भवेत्, तथाऽपि तस्य छेदनमनर्हः । अयं श्लोकः वृक्षसंरक्षणार्थम् उत्तममुदाहरण वर्तते । विषस्यापि वृक्षं छेत्तुमाज्ञां न ददाति महाकविः । अग्रिम श्लोके कविः प्रकृत्याः नायक–नायिकारुपेण वर्णनं करोति । यथा–

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाद्दय ।

रागेणबालाऽरुणकोमलेन चूतप्रवालोष्टमलञ्चकार ।।कुमा. ३/३० ।।

अर्थात्–वसन्तलक्ष्मीः भ्रमरकज्जलरचनाचित्रणं तिलकं पुष्पविशेषं वदने प्रकटय्य, बालार्कसुन्दरेण रक्तवर्णेन चुतप्रवालोष्ठमलञ्चकार । स्थावराणामपि जीवन्तवर्णनं कृत्वा तेषां मदनोन्मादंदर्शयति महाकविः । यथा–

पर्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।

लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ।।[१]

नन्दीगणाः जरायुजादिषु विकारजन्यचञ्चलतां दृष्ट्वा तान् चापलं मा कुरु इति निषेधन्ति, गणानां सूचनां श्रुत्वा वृक्षाऽपि निश्चला भवन्ति । यथा–

लतागृहोद्वारगतोऽथ नन्दी वामप्रकोष्ठाऽर्पितहेमवेत्रः ।

मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ।।

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।

तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ।।[२]

तृतीयसर्गस्यैवास्मिन् श्लोके महाकविः गौरीलतयोः स्तनस्तबकयोः परस्परसाम्यं वर्णयन् प्रकृतिं प्रति स्वात्मीयभावनां प्रदर्शयति । यथा–

आवर्जिता किञ्चिदिवस्तनाभ्यां वासो वसाना तरुणार्करागम् ।

प्रयाप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव ।।[३]

---

१. कुमारसम्भव – ३/३९,     २. – ४१, ४२,     ३. – ३/५४

शिवस्य तृतीयनेत्रेण मदनदहनानन्तरं विलपन् रतिः अचेतनैश्चन्द्रिकादिभिरपि प्रतिपन्नं भतृलोकगमनं करोति । यथा– "चन्द्रे गते चन्द्रिका क्षणमात्रमपि न तिष्ठति, मेघे विनष्टे तडिदपि च विनश्यति" तर्हि कथं सचेतनाहं भतृलोकगमनं न करिष्यामीति कथयन् मानवैः सह प्रकृत्याःतादात्य प्रतिपादयति । यथा–

**शशिना सह याति कौतुदी सह मेघेन तडित् प्रलीयते ।**

**प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ।।कुमा.४/३३।।**

पार्वति स्वल्पवृक्षान् घटस्तनप्रसृतपयोभिः अवर्धयत् । तस्याः वृक्षकाणां सुतप्रेम कुमारोदयेऽपि न निराकरिष्यति । यथा–

**अतिन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणै व्यवर्धयत् ।**

**गुहोऽपि येषां प्रथमान्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ।।कुमा.५/१४।।**

सर्वभूतदयापरायां वनमात्रनिवासिन्यां देव्यां मृगाणां विश्वासस्य पराकाष्ठां दृष्ट्वा कवेः पर्यावरणचेतना प्रकटी भवति । यथा–

**अरण्यबीजाञ्जलिदानलालितास्तथा च तस्या हरिणा विशश्वसुः।**

**यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ।।**[1]

सा पार्वती तदीयैनेत्रैः कुतूहलात् अग्रे वर्तमानानां सखीनां लोचने अमिमीत । इयमेव खलु विश्वाशस्य पराकाष्ठा यदक्षपीडनेऽपि हरिणाः न क्षुभ्यन्तीति तात्पर्यः । विरोधिभिः सत्वैर्गोव्याघ्रादिभिः हिंसारहितं भूत्वा, द्रुमैः इष्टफलेन अतिथीन् पूजयित्वा, पर्णशालानामाभ्यन्तरेषु सञ्चिता अग्नयः तच्च तपोवनं पावनं जातः । यथा–

**विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभिष्टप्रसवार्चितातिथि ।**

**नवोटजाभ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव पावनम् ।।**[2]

ब्रह्मचारिवेषधारिशिवः देवीसंवर्धितानामाश्रमलतानां कुशलं पृच्छति । यथा–

---

१. कुमारसम्भव – ५/१५, २. – ५/१७,

अपि त्वदावर्जितवारिसम्भृतं प्रवालमासामनुबन्धि वीरुधाम् ।

चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ।।कुमा.५/३४।।

अत्र कवेः वानस्पतिकचेतना सम्यग् दृश्यते । अन्यच्च– पशुसंरक्षणं यथा–

अपि प्रसन्नं हरिणेषु ते तनः करस्थदर्भ प्रणयापहारिषु ।

य उत्पलाक्षि प्रबलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुज्यते ।।कुमा.५/३५।।

अत्र आम्रशाखारूपनायिका स्वप्रियवसन्तनायकस्य समीपे कोकिलद्वारा सन्देशं प्रेषयति। यथा–

तया व्याहृतयन्देशा सा बभौ निभृता प्रिये।
चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी।।कुमार.६/२।।

यथा चूतलता चिरप्रार्थिते वसन्ते कान्ते समागते सति तत्कालोचितं तद्विषयं प्रियालापं किञ्चिदप्यनाचरन्ती कुसुमपल्लवारिभिः प्रसादचिन्हैरात्मनः प्रसादं प्रकाशयन्ती तद्विषयं प्रियालापं कोकिलाभिमुखी भूत्वा तयैव कारयति।अस्मिन् श्लोके देवदारुवृक्षान् हिमालयस्य द्वौ भुजौ कथयित्वा महाकविः वृक्षे चेतनत्वं पूरयति। यथा–

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।

प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ।।[1]

वनस्पत्यादिभिः प्रकृतिभिः आश्रमाः शोभां धारयन्ति । यथा –

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।

आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ।।[2]

अत्र आश्रममृगाःहि प्रभातसमयादारभ्य दिनान्तसमयप्रर्यन्तं बहुलतृणेषु प्रदेशेषु चरन्तः सायमुटजाङ्गणेषु निवसन्ति । उटजाङ्गणमधितिष्ठद्भिर्नानावर्णैमृगैः प्रीति वितरन्तीति। कल्पवृक्षाणामग्रभागावस्थितचन्द्रकरस्यमहत्त्वम् । यथा–

---

१. कुमारसम्भव – ६/५१,                    २. – ८/३८,

कल्पवृक्षशिखरेषु सम्प्रति प्रस्फुरद्भिरिह पश्य सुन्दरि ।

हारयष्टि गणानामिवांशुभिः कर्तुमागत कुतुहलः शशी ।।कुमा.८/३८।।

अत्र कल्पवृक्षकुसुमानां हारादिरुपत्वात् सम्प्रति चन्द्रोऽयं कल्पवृक्षोपरि पतद्भिरात्मनः करैस्तद्गतानां हाराणां परिगणनायां कुतूहलात् प्रवृत इव दृश्यते। पुष्पसमुहव्याप्ताम्रवृक्षस्य शोभा वर्णनं यथा–

विकस्वराम्भोजवनश्रिया तं दृशां सहस्रेण निरीक्षमाणः ।

रोमालिभिः स्वर्गपतिर्बभासे पुष्पोत्कराकीर्ण इवाम्रशाखी ।।कुमा.१२/२३।।

अर्थात्– महेन्द्रः प्रफुल्लकमलवनस्य श्रीरिवशोभा यस्य तथाभूतेन नेत्राणां सहस्रेण तं निरीक्षमाणः रोमालिभिः समुहैः स्पुष्पसमूहेनाकीर्ण आम्रशाख्याम्रवृक्ष इव शुशुभे।

कार्तिकेयः तारकासुरेण नष्टकृत इन्द्रस्योपवनं दृष्ट्वा क्रोधायमानो भवति स्म। यथा–

सुरद्विषोपप्लुतमेवमेतद्वनं बलस्य द्विषतो गतश्रि।

इत्थंविचिन्त्यारुणलोचनोऽभूद्भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात्।।कुमार.१३/३४।।

अस्मिन् श्लोके कार्तिकेयस्य वृक्षाणां प्रति आत्मीयता दृश्यते । कारणञ्च प्रकृत्याः संरक्षणात् अस्माकंसंरक्षणम् ।।

## (७) कुमारसम्भवस्य सम्पूर्णकथानके पर्यावरणचिन्तनम् । (निष्कर्षरूपेण)

कुमारसम्भवमहाकाव्यस्य सम्यग् परिशीलनेन ज्ञायते यत् काव्ये आदितः अन्तपर्यन्तं यत् कथानकं वर्तते तत् कदाचित् पर्यावरणस्यचिन्तनं मनसि निधाय महाकविना कृतमासीत् । अत्र महाकाव्ये यानि पात्राणि, स्थलानि च सन्ति तेषां पर्यावरणेन सह सहोदरसम्बन्धो दृश्यते । अथवा आत्मना सन्निकटता अस्त्येव। यथा– हिमालयः, पार्वती, देवदार्वादिवृक्षाः, नद्यः, पर्वताः, स्वयं शिवश्च । दैवीशक्तयः लोकसृजनार्थं संरक्षणार्थञ्च मुख्य मुख्य तत्त्वानि सन्ति । यथा– **ज्वलन्मणिशिखाश्चैनं वासुकि प्रमुखा निशि ।**

**स्थिरप्रदीपमामेत्य भुजङ्गाः पर्युपासते ।।कुमा.२/३८।।**

तारकासुरः पर्यावरणं हानिं न प्रापयेत् तदर्थं भुजङ्गाऽपि भयेन निजफणामणिभिस्तिमिरहरन्तस्तमेव सेवन्त इति। मानवः वैज्ञानिकाऽध्ययनजन्य आत्मकौशलेन दैवीशक्त्या सामर्थमजेयञ्च प्राप्नोति। (तारकासुरः ब्रह्मणा प्राप्तवान्) यथा–

**भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः।**

**उपप्लवाय लोकानां धूमकेतुरिवोत्थितः।।**[१]

सामर्थ्य प्राप्य सामर्थ्यजन्यज्ञानमभिमानवशात् सः नैव पाचयति, तस्य दुरुपयोगं करोति, तथा येन सामर्थ्य वरदानं प्राप्तवान् तस्यैव दमनविषये प्रवृत्तो भवति। यथा–

**वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः। चामरैः सुरबन्दीनां वाष्पसीकरवर्षिभिः।।**

**उत्पाट्यमेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः। आक्रीडपर्वतास्तेन कम्पिता स्वेषु वेश्मषु।।**

**मन्दाकिन्या पयः शेषं दिग्वारण मदाविलम्। हेमाम्भोरुहशस्यानां तद्वाप्यो धामसाम्प्रतम्।।**[२]

सः वरदानसामर्थ्याऽभिमानवशात् विचारयति यदहं ज्ञान–विज्ञानसामर्थ्यात् अजरोऽस्मि। शक्तिरपि तस्य किमपि कर्तुं न समर्थः। अतः प्रकृत्या एव उन्मूले तत्परोभवति। तेन पर्यावरणे संकटमुपस्थितो भवति, अर्थात् सम्पूर्णचराचरजगतः विपद्जलनिधौनिम्नो भवति। आपद्ग्रस्ता प्रकृत्यासंरक्षणाय, लोककल्याणार्थञ्च शक्तेः प्रतिष्ठा आवश्यकी भवति, अस्यां प्रस्थित्यामात्यन्तिक विश्वकल्याणकारि शिवः प्राकृतिकसमृद्धिस्वरूपा पार्वती द्वयोः सम्मेलनेनोत्पन्नकुमारस्य नेतृत्वं पर्यावरण

विनाशकतत्त्वस्य तारकासुरस्य नाशः पुनः सात्त्विकसिर्जनात्मकशक्तीनां विजयो भवति, एषा समस्या पूर्वकालादेव समागच्छन्नस्ति। यथा–

**गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।**

**प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम्।।**[३]

अत्र प्रबलशत्रुवशवर्तनं तज्जयानन्तरमात्मवशवर्तनं च सुरश्रीवन्द्योः साधारणो धर्मः। यादृशेन सेनान्या तादृशशक्तियुक्तो महेन्द्रः स्वयमेव हठहृतमहिलामिव शत्रुवशवर्तिनीं

---

१. कुमारसम्भव – २/३२, २. – २/४२, ४३, ४४, ३. कुमारसम्भव – २/५२

देवलक्ष्मीं प्रत्यानेष्यति तादृशस्त्वया सृज्यतामिति।

पार्वतीपरमेश्वरौ द्वौ पृथक्–पृथक् रूपेण देवासुरसङ्ग्रामं जेतुं नैव सक्षमौ। कारणञ्च अत्र मानव–शक्त्योः समन्वयात् एव जेतुं सम्भवमासीत्। प्राकृतिकशक्तिसमुत्पन्नकारणात् आत्यन्तिक–प्राकृतिक समृद्धिभ्यां वैराग्यभोगौ, संयमः , सम्पन्नता, आध्यात्मिक भौतिकोन्नत्यादीनां सहजसामंजस्यं पैतृकगुणैः प्राप्तमस्ति। एतादृशः (कार्तिकेयसदृशः) संयमी विवेकशीलश्च मानवजात्येव, दम्भी, विलासी मानवस्य निरंकुशनियन्त्रणात् प्राकृतिकशक्तीन् विमुच्य सम्पूर्ण चेतनजडजङ्गमादीन् सर्वविधसुरक्षां प्रदाय प्राकृतिकसन्तूलनं पुनः स्थापयितुं शक्नोति। महाकाव्य परिशीलनेन वक्तुं शक्यते यत् महाकविः कालिदासः पर्यावरणीयसङ्कटात् सर्वान् विमोक्तुं मानवशक्त्यैव समर्थोस्तीति विश्वासं धरति। अस्मिन कार्तिकेयजन्मसन्दर्भे विश्वकण्याणभावना एवं प्राकृतिकसमृद्ध्याः समन्वयस्याऽनिवार्यताऽपि अत्यन्त महत्वपूर्णः विचारणीय विषयोऽस्ति। यथा– शिवपुत्रः, शिवावतारः मानसरुपेणाऽपि प्राप्तुं शक्नोति स्म, परन्तु तस्मिन् पुत्रे वैराग्यसम्भवमात्रं भूते सति मानवजातेः लौकिकोन्नतिः नैव सम्भवः, केवलं पार्वत्याः पुत्रभूते सत्यपि तावजनितभोगसौन्दर्ये निमग्नो भविष्यति। अतः लोककल्याणार्थं शिवसमृद्धिभ्यां समन्वितप्रकृत्याः सहयोगस्याऽपेक्षाऽस्ति। मानवजीवनस्य समुन्नतये त्यागभोगयोः परस्परापेक्षायाः संगतिपूर्णप्रतीकात्मकप्रस्तुतिः महाकविः कालिसासेन स्वरचनायां यत् कृतं तादृशी रचनात्मकचेतनापूर्णपरिकल्पनायाः प्रस्तुतिः अन्यलेखकानां रचनासु नैव प्राप्यते। संयमितः मानवशक्तेरुदयः तथा प्राकृतिकसमृद्ध्या एकीकरणे साध्यपूर्त्या सह साधनौचित्यविषयेऽपि महाकविः सफलं प्रतीयते। यथा– कामदेवस्यदहनं, पार्वत्यातपप्रसङ्गश्च महाकवेः समुचितकार्ययोजनायाः उत्तमोदाहरणे स्तः। कण्याणमूर्तिः प्राकृतिकशक्त्याः सहायतार्थं तम् प्राकृतिकसमृद्धिं प्रति आकर्षणस्य दायित्वं देवैः कामदेवे निक्षिप्तवान्। यथा–

**तस्मिन् सुराणां विजयाभ्युपाये तदेव नामास्त्रगतिः कृती त्वम्।**

**अप्य प्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म॥**[१]

---

१.कुमारसम्भव – ३/१९,

मदनः स्वशक्त्या ऋतुक्रमं भङ्गयित्वा, असमयवसन्तशोभाप्रसरयन् कल्याणतत्त्वं शिवं पार्वतीं प्रति आकर्षयितुं प्रयतते । संयम–सन्तुलन विघटितार्थ कृतप्रयत्नः सः निष्फलो भवति । विश्वस्यकल्याणं प्रकृत्याः सहजकर्मैव सन्निहितोऽस्ति। अतः आत्यन्तिककल्याणतत्त्व सदा आत्मसंयमितो भवति, येन सृष्टौ सन्तूलता स्थिरा जायते। कल्याणतत्त्वे विकारोत्पन्नार्थं प्रयत्नशीलः कामोऽस्य परिणामविषये अनभिज्ञोऽस्ति। शिवतत्त्वं सृष्टेः अकल्याणमयीविकृतिं नैव स्वीकरोति, तस्य कार्यः लोकोपकारो वर्तते। शिवः स्वयं परोपकारार्थतां प्रतिपादयिष्यन् सर्वासामपि निजप्रवृत्तीनां परोपकार्थतां दर्शयति। यथा–

**विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः।**

**ननु मूर्तिभिरष्टाभिरित्थं भूतोऽस्मि सूचितः।।[१]**

अर्थात्–प्रत्यक्षाणां पृथिव्यादीनां मम रूपाणां परार्थत्वदर्शनादप्रत्यक्षमागमैकगम्यं रुपमपि परार्थमात्रपरमिति सर्वैरप्यनुमातुं शक्यमेव । पृथिव्यादीनां धारणादिव्यापास्य परार्थमात्रपरत्वं प्रसद्धिमेवेति।

प्राकृतिकसमृद्ध्या दुरपयोगकर्ता, प्रकृत्याः ऋतुक्रमे विघ्नकारकतत्वान् च शिवः स्वयं दण्डयतिस्म। उदाहरण रूपेणाऽत्र कामदहनम्। यथा–

**तपपरामर्श विवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्य मुखस्य तस्य।**

**स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किलनिष्पपात।।**

**क्रोधंप्रभो संहर संहरेति यावद्गिरः रवे मरुतां चरन्ति।**

**तावत् स वह्निर्भवनेत्रजन्मा भस्माऽवशेषं मदनञ्चकार।।[२]**

अर्थात् तारकासुरसदृशः मानवान्तर्हितविलसिततत्वानां नाशोऽस्याः कथायाः मूलोद्देश्यं वर्तते।

एवं प्रकारेण अद्यत्वे मानवः यदि स्वयं कृतोत्पन्नपर्यावरणसंकटेन सह संघर्षयितुं प्राकृतिकदोहनस्य नूतनाऽऽविस्कारान् समस्यायाः समाधानं यदि मन्यते चेत् तेन पर्यावरणस्य दूषणसमस्या द्विगुणा भविष्यति।यदि किञ्चित् फलं प्राप्स्यन्ति तर्ह्यपि अल्पकालिनो भविष्यति,

---

१.कुमारसम्भव – ६/२६,    २. – ३/७१, ७२

तेन अन्या समस्या करिष्यति, अतः एषो मार्गः त्याज्योऽस्ति। भोगस्य निराकरणं तपसा भवति न तु भूयःभूयोऽपभोगेन। महाभारतेऽपि इन्द्रियसंयमविषये। यथा–

न जातुः कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्मैव भूय एवाभिवर्धते।। म.भा.।।

प्रकृत्याः व्याघातस्य निराकरणं तया सह तादात्म्यद्वारैव कर्तुं शक्यते। अधुना समृद्धिस्वरुपा तपपूता पार्वत्यपि शिवतत्वेन मेलनार्थं उत्सुकास्ति। उपभोगवादी विचाराणां विनासे सति सा प्राकृतिक साहचर्यमार्गं स्वीकरोति।

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।

स्त्रीसन्निकर्षपरिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ।।[१]

अन्यच्च–

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च।

सख्यो समक्ष्यमिति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी कथञ्चित्।।[२]

तपोपूता प्राकृतिकसमृद्धिं(पार्वतीं) कल्याणतत्त्वम् अपि स्वीकर्तुं सज्जो भवति। यथा–

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः क्रीतास्तपो भिरितिवादिनि चन्द्रमौली।

अन्हाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवताविधत्ते।।[३]

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।

उत्पतये हविर्भोक्तुर्यजमान इवारणिम्।।[४]

अत्र आत्मनो यजमानोपमानेन धर्मप्रवत्त्वं सूचितम्। आत्मजन्मनो वन्ह्युपमानेन तस्य लोकोत्तरप्रतापत्वं सूचितम्। पार्वत्या अरण्युपमानेन "उमे एवक्षमे वोढुमुभयोवीर्यमाहितम्।" (कुमार. २/६०)

---

१. कुमारसम्भव –३/७४, २. –३/७५, ३. – ५/८६, ४. –६/२८

इत्यादिनोक्तं पार्वत्या एवात्मवीर्यधारणयोग्यत्वं व्यज्यते। आशुतोषः **"पार्वतीम् याचितव्यः"** इति निशित्य सप्तर्षीन् हिमालये समीपे याचकरूपेण गन्तुं प्रेरयति। यथा–

**तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः।**

**विक्रियायै न कल्पन्ते सम्बन्धा सदनुष्ठिताः।।कुमार.६/२९।।**

अर्थात् सज्जनैः कारिता विवाहादयो न कदाचिदपि दोषमुत्पादयन्तीति। कालिदासस्य समन्वयात्मकदृष्टिः पार्वतीपरमेश्वरौ एकात्मकरुपेण कथयितुं शक्यते यत् भारतीयपर्यावरणस्य मूलाधारो **"हिमालयम्"** काव्यस्य पृष्ठभूमि कृत्वा कालिदासेन पर्यावरणज्ञानस्याऽप्रतिमप्रमाणंदत्तमस्तीति।

## (३) मेघदूतखण्डकाव्ये पर्यावरणम् ।

- ग्रन्थनाम ।

ग्रन्थस्यास्य यन्नामास्ति तन्नामतः एव वर्यावरणप्राकृतिकचित्रणं समीक्षणं वा नाम्नैव ध्वन्यतेति । यथा–"मेघदूतम्" सूक्ष्मदृष्ट्या यदि विचार्यते यत्र पर्यावरणस्य भूषणं समीक्षणञ्च अत्र महाकवेः ग्रन्थे स्फूटरुपेण दरिदृश्यते । यथा–

"धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः ।"[१]

- **कथानकव्याजेन प्राकृतिकचेतना निदर्शनम् ।**

पर्यावरणस्य प्रमुखतत्वेषु मेघस्य स्थानं सर्वोत्तमं वर्तते, कारणं यदस्ति वैज्ञानिकदृष्ट्या विचार्यते तदा अस्योत्तरं स्वयं प्राप्यते । यथा वर्षा विना प्रकृतेः अवस्थितिः न भवति । वर्षा मेघादेव भवति, मेघसंरचना मेघदूतग्रन्थे या वैज्ञानिक पद्धत्या एव प्रतीयते । एषा विशेषता कालिदासस्य कृतौ मेघदूते एव प्राप्यते । अस्य वर्णनं मयाऽग्रे क्रियते ।

- **पञ्चमहाभूतस्य पारम्परिकचित्रणम् ।**

दार्शनिकग्रन्थेषु प्राधान्येन प्रस्थानत्रयां पञ्चमहाभूतानां निरुपणं सर्वत्र दरीदृश्यते । तत्र पञ्चमहाभूतानां उत्पत्ति समीक्षणं पारस्परिक चित्रणमपि प्राप्यते । तदनुसारेण महाकविनां ग्रन्थेऽस्मिन् दार्शनिकदृष्ट्याऽधारेण पर्यावरणसमीक्षणमालम्व्य पञ्चतत्त्वानां पञ्चीकरणप्रकार निदर्शनमत्रवर्णितमिति ।

- **पर्यावरण समीक्षणम् ।**

संस्कृतकाव्य जगति महाकवेः रचनेयं गीतिकाव्येषु प्रथमावृत्तिः कथयितुं शक्यते । गीतिषु संस्कृतकाव्यपरम्परा एतद् ग्रन्थादेव प्रारम्भाजातेति, अस्मिन् ग्रन्थे रसप्रधानवर्णनमस्ति एव तथाऽपि समीक्षा शास्त्रीणां दृष्ट्या प्राकृतिकवर्णनव्याजेन पर्यावरस्य चित्रणं कृतमिति तु सर्वेषां सम्मतमिति । अत्र पर्यावरणदृष्ट्या कीदृक् वर्णनं कालिदासेन कृतं तदधोरुपेण प्रस्तूयते–

मनुष्यस्य प्रकृतेः सह जन्मतः अविचलसम्बन्धो वर्तते । तस्यविकासः प्रकृत्याः मध्ये

१. पूर्वमेघ – ५

जातोऽस्ति। चेत् पर्वताः, नद्यः, वनानि,सर्वे मानवपोषकाः सन्ति तर्हि मनुष्याऽपि पर्यावरणस्य रक्षणार्थं प्राचीनकालतःसन्नद्धाः दृश्यन्ते । प्रकृतिः सदैव मनुष्यं स्वाभिमुखं आकर्षति, मनुष्यः तस्या लाभं नित्वा

तयाऽनेकविधाशिक्षा गृह्णाति। प्रायः मनुष्य. प्रकृतिं चेतनं सजीवं संवेदनशीलञ्च मत्वा तां स्व सखा स्वीकृतमस्ति। सः सुख–दुःखयोः रूपं प्रकृतिदर्पणे पश्यति। प्रकृतिमनुश्ययोः एतादृशसन्निकटसम्बन्धकारणात् प्रकृतिचित्रणम् अर्थात् पर्यावरणवर्णनम् संस्कृतकाव्येकम् अभिन्नम् अङ्गम् जातमस्ति। अवशरप्राप्तोऽहं "कालिदासस्य मेघदूते पर्यावरणम्" इति विषयं लिखन्नस्मि। महाकविः कालिदासः पर्यावरणं प्रति अत्यधिकानुरागं धारयति। सः न केवल स्नेह्यति, परन्तु तेन सह सन्निकटतायाऽनुभवं करोति।

कालिदासस्य काव्येषु पर्यावरणस्य सहजं रूपं दृश्यते, कलात्मकं रूपं चापि। प्रकृतिचित्रणे तस्य एषा विशेषताऽस्ति। सः रूढितः प्रकृतिचित्रणं नैव करोति, परन्तु प्रसङ्गसम्बद्धाऽनुसारं भवति।

महाकविः कालिदासविरचितेषु सर्वेषु ग्रन्थेषु पर्यावरणस्य मनोहरं चित्रणमस्ति, किन्तु तेषु 'मेघदूतम्' पर्यावरणदृष्ट्या सर्वोपरि वर्तते, कारणञ्चात्र कथानकः गौणः वर्तते, सर्वंखलु अस्मिन् दूतकाव्ये यत्रतत्र सर्वत्र पर्यावरणस्य चित्रणं दृश्यते। महाकविः कालिदासस्य काव्येषु एकमेवं 'मेघदूतम्' खण्डकाव्यमस्य तथ्यस्य उत्तमा साक्षी अस्ति यत् कालिदासः पर्यावरणसंरक्षणं प्रति जागरूकोऽस्ति। तस्य प्रथमो विशेषताऽयमस्ति, अत्र प्रकृत्योपकरणं मेघमेव दूतः विनिर्मितः। मेघदूतखण्डकाव्यस्य पृष्ठभूमिः तस्य पर्यावरणं प्रति स्नेहं संकेतयति।

मेघदूतस्य कथानुसारेण यक्षः कुबेरस्य पुष्पोद्याने संरक्षणपदे नियुक्तः, सः उपवनसंरक्षणे निष्फलो जातः, तेन तं कुबेरः शापितवान् वर्षं यावत् तव पत्नीविरहोऽस्तु। ते महिमा नश्यतु च। एषा कथा कालिदासस्य दृष्टौ "उपवनसंरक्षणम्" कियत् महत्त्वपूर्णमासीत् तस्मिन् विषये संकेतोंऽस्ति।

चेतसः साक्ष्यताऽपि तस्य पर्यावरणस्नेहं प्रमाणीकरोति। वनसम्पदा नष्टं न स्यात्, तदर्थं कालिदासः सचेतः करोति। यक्षः मेघं कथयति यत् हिमालयारण्ये देवदारुविटपसंयोगसमुत्थितः दवाग्निं त्वं वेगवद् वर्षेण निर्वापयितुमर्हसि। यत् महतामृद्धय आपन्नार्तिप्रशमनफलाः, एषो हि उत्तमजनानां कर्तव्योऽस्ति। यथा–

तं चेद्वायौ सरति सरल स्कन्धसङ्घट्टजन्मा,

बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।

अर्हस्येनं शमयितुमलं वारिधारासहस्रै,

रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् । ।मेघ.१/५३ ।।

अन्यत्राऽपि कविःदवाग्निं शान्तं कर्तु मेघे अपेक्षा करोति। यथा–

त्वमासारप्रशमितवनोपप्लवं साधु मूर्ध्ना,

वक्षत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।

न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय,

प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।मेघ.१/१७ ।।

पूर्व धारावृष्टिपातेन वनाग्निं शमितवन्तम् अतएव उपकृतवन्तं मार्गश्रमेण श्रान्तं त्वं स आम्रकूटनामकः पर्वतः सम्यग्प्रकारेण स्वशिखरेषु धारयिष्यति। अत्र यक्षमुखेन एतादृशं सचेतनमिव आम्रकूटस्य वर्णनं कालिदासं विहाय अन्य कुत्राऽपि नैव प्राप्यते। अयं भूमिपर्यावरणस्य उत्तमं उदाहरणमस्ति। कारणञ्च यदारण्ये दवाग्नि प्रज्वलति तदा तत्रस्था जीवजन्तूनां वृक्षाणां नाशात् भूमिरपि प्रदूषिता भवति। अत्र जीवजन्तूनां वृक्षाणां सम्यक्संरक्षणे संकेतोऽस्ति अस्माकं कृते।

मेघदूते वानस्पतिकवैभवस्यापि न्यूनता नास्ति, अनेकत्र वानस्पतिकसौन्दर्यस्य वर्णनमस्ति। तेन वर्णित वृक्षलतादीनां सौन्दर्यस्य चरमाभिव्यक्तिः रामगिरेराश्रमस्यवर्णनप्रसङ्गे दृष्टिगोचरो भवति। यथा–

"स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु"।।[१]

यत्र स्व स्वामिना कुबेरेण शप्तः कश्चित् यक्षःनिवासं कृतवान् तत्र वृक्षाः सघनच्छाया भिर्युक्तारासन्। साहित्यिकदृष्ट्याऽपि इदमुचितमस्ति यत् शापजनितोष्णतानिवारणाय वृक्षाणांघनच्छाया सहायकाः भवन्ति। पर्यावरणसंरक्षणदृष्ट्याऽपि सघनच्छायायुक्तवृक्षाणामुपयोगिता अधिका वर्तते ।। रामगिरितः अलकानगरी पर्यन्तं पथिषु

१. मेघदूत –१/१,

अरण्यनदीपर्वतानां मनोहरदर्शनं भवति । यथा– मालः, दशार्णः, विदिशा, अवन्ती, उज्जयिनीत्यादि सर्वे नगर्यः हरितद्रुमैः सुशोभिताः सन्ति। अनेकनगरीणां उद्यानस्य विशेषवर्णनं प्राप्यते। महाकालेश्वरमन्दिरस्योद्यानं गन्धर्वकमलपरागवायुना आन्दोलितोऽस्ति।यथा–

**भर्तुः कण्ठच्छविरितिगणैः सादरं वीक्षमाणः, पुण्यं**
**यायास्त्रिभुवनगुरोर्धामचण्डीश्वरस्य।**
**भूयोद्यानंकुवलयरजोगन्धिभिर्गन्धवत्या,**
**स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः।।**[1]

अयं मेघः अस्मत् स्वामिनः नीलकण्ठस्य कण्ठच्छविं धारयतीति विचारणया शिवगणैः सादरं निरीक्षमाणष्त्वं पार्वत्याः पतेः महाकालस्य पवित्रमन्दिरं गच्छ। यच्च मन्दिरं कमलरजसां सुगन्धिभिः तथा च जलविहारासक्तसुन्दरीणां स्नानीयद्रव्याणां सुगन्धियुक्तैः गन्धवतीनामकनद्याः वायुभिः कम्पितोपवनम् अस्ति। एवं प्रकारेण अलका नगर्याः बहिरपि वैभ्राजनामकमुद्यानम् वर्तते। यथा–

**अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै–**
**रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम्।**
**वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया**
**बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति।।**[2]

अलकायां भवनाभ्यन्तरे निगूहिताक्षय्यनिधयः यक्षाः देवाङ्गनाभिः सह गच्छन्तः वार्तालापे चमग्ना सन्तः प्रतिदिनं कुबेरस्य कीर्तिं मधुरकण्ठस्वरेण उच्चैः गायद्भिः किन्नरैः सह एव वैभ्राजनामकं बाह्योद्यानम् उपभुञ्जन्ते। उपर्युक्तश्लोके उद्यानस्य वर्णनमपि पर्यावरणस्य संरक्षणं संकेतयति। अन्यच्च – यक्षपत्नी स्वगृहाग्रे सुशोभित बालमन्दारं वृक्षं पुत्रवत् पोषित्वा सम्बर्धितः। एतादृशप्रकृतेः वर्णनं पर्यावरणसंरक्षणस्य मनोहारि संवेदनात्मकसंकल्पनां मूर्तिमान् कुर्वन् प्रतीयते कविः। यथा–

---

१. कुमारसम्भव– १/३७, २. – २/८

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं

दूराल्लक्ष्यं सुरपतिधनुश्चारणा तोरणेन।

SMT. HANSA MEHTA LIBRARY
THE MAHARAJA SAYAJIRAO UNIVERSITY

यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे

हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ।।[१]

भवनसमीपे मम प्रियपत्न्या पोषितः पुत्रकृतश्च शिशुमन्दारवृक्षोऽपि हस्तैः प्राप्तुं योग्यैः पुष्पाणां गुच्छैः नमितो विद्यते। अत्र अस्माकं कृते कवेः सन्देशो वर्तते यद् पर्यावरणसन्तुलनार्थं वृक्षान् पुत्रवत् पालनीयाः इति।

महाकविः कालिदासः वर्षतौ प्रचुरमात्रायां स्वतोत्पन्ना कन्दल्याः चर्चापि न विस्मरति। यथा—

**कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां, तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।**

**आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः,सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः।।**[२]

कन्दली इत्याख्या ( नवतृणांकुराः) हिन्दी भाषायां (कुकुरमुत्ता) कथ्यते सा मेघगर्जितेन जायते, तेन पृथिवी अबन्ध्या भवति। पृथिवी शस्यश्यामला च भवति।अत्र भूमिसंरक्षणोपरि महाकविः अस्मान् सावधाना भवन्तु इति संकेतं करोति। यदा वर्षर्तौ कन्दली अधिकाः उत्पन्नाः भवन्ति तदा पाकोऽपि अधिकः भवतीति अनुमीयते। भूमि संरक्षणे सूक्ष्मातिसूक्ष्म विषयेऽपिध्यानं दातव्यमिति कवेराशयः।

वर्षा ऋतौ प्रथमजलं प्राप्य भूकन्दली अङ्कुरिता भवति, याः सारङ्गमृगाः रूच्यासह भक्षयन्ति। यथा—

**नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै—**

**राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।**

**जग्ध्वाऽरण्येष्वधिकसुरभि गन्धमाघ्राय चोर्व्याः ।**

**सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्।।**[३]

---

१. मेघदूत – २/१२, २. – १/११, ३. – १/२१

भ्रमराः, हरिणाः, गजाश्च क्रमशः अर्धोत्पन्नकेसरैः हरितकृष्णपीतवर्णं हरितकृष्णलोहितवर्णं वा स्थलकदम्बपुष्पं सन्दृष्य जलप्रायप्रदेशेषु प्रथमोत्पन्नकलिका. भूमिकदलीश्च भक्षयित्वा वनेषु पृथिव्याः अतिसुगन्धिगन्धं घ्रात्वा च जलकणत्यागिनो तवमार्गं सूचयिष्यन्ति। अस्मिन् श्लोके "सारङ्गः"शब्दः कर्ताऽस्ति, सः शब्दः अनेकार्थकः "सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे" (विश्वः) प्रसिद्धटीकाकार कदम्बपुष्पं दृष्ट्वा, कुरङ्गः भूमिकदलीं भक्षयित्वा,(जग्ध्वा) गजश्च पृथिव्याः गन्धमाघ्राय मेघस्यमार्गं सूचयिष्यति।" एकस्मिन् श्लोके एव सुन्दरशैल्यां पशूनां, वनस्पतीनां, वषर्तोः वर्णनं कृत्वा कविः अस्मान् पर्यावरणस्योत्तममुदाहरणं ददाति।फलदवृक्षेषु केवलं आम्रः, उदुम्बरः, कदली, जम्बूनामेव उल्लेखः मेघदूते कालिदासेन कृतः । आम्रकूटपरिसरस्य अपूर्वशोभायाः वर्णनम् । यथा–

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै, स्त्वय्यारुढे शिखरमचलः स्निग्धवेणीसवर्णे ।**

**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां,मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ।।**[१]

परिपक्वाम्रफलैः शोभमानाम्रवृक्षैः आच्छादितसमीपभागः आम्रकूटो नामपर्वतः, यदा चिक्कणबन्धसदृशः मेघः तस्य शिखरम् आरोहति, तदा मध्ये कृष्णवर्णस्य, समन्ततः च पीतवर्णस्य पृथिवीरूपनायिकायाः स्तनसदृश सः पर्वतः देवदम्पतीभ्यां दर्शनीयशोभां जनयति। मध्ये उन्नत्वात् नायिकायाः स्तन इव पर्वतः कल्पितः। अत्र उत्प्रेक्षोपमयोः प्रयोगः कुर्वन् प्रकृतेरपूर्वचित्रणं कृतमस्ति ।एवं प्रकारेण दशार्णदेशे जम्बूवृक्षाणामरण्यमस्ति, तेन दशार्णदेशे या शोभा प्रकटिताऽस्ति तस्य वर्णनम्। यथा–

**"त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः ।।"**[२]

परिपक्वफलकारणात् श्यामवर्णजम्बूवृक्षाः रमणीयाः भविष्यन्तीति यक्षः मेघं कथयति, अर्थात् दशार्णस्य शोभा अधिका भविष्यति । यदा मेघः देवगिरिमार्गे गच्छति तदा पथौ उदम्बरवृक्षाणामुख्यमार्गमागच्छति। एतदरिक्तं महाकविः स्वर्णिमताडवृक्षः, स्थलवेतसः, मन्दारः, अशोकः, केसरः, देवदारूः, कल्पवृक्षदीनांवर्णनं करोति। उपर्युक्त वृक्षातिरिक्तः नीपः, केतकी, यूथिका, कुवलयः कमलम्, कुमुदः, कुरबकः, कुन्दः,लोध्रः, शिरिषः, मालती, श्यामादिपुष्पाणां लतानाञ्च वर्णनं प्राप्यते। उपरिवर्णिताः सर्वे वृक्षाः लतादयः पर्यावरणसन्तूलने सहायकाः भवन्ति।

---

१. मेघदूत – १/१८, २. – १/२४,

पुराकालतः वनस्पतिभिः सह मनुष्याणां केवलं नैव अपितु पृथिवीस्था. प्रत्येकजीवजन्तूनां निकटस्थ सम्बन्धोऽस्ति। मानवाः तु पूर्णतः पूरा वनस्पतिषु निर्भरः आसीत्। तथ्यं तु इदमस्ति यत् मानवचेतनायाः विकासः वनस्पतिजगतःमध्येऽभूत्। मानवान् प्रकृतेरनुपमं सौन्दर्यं दृष्ट्वा सौन्दर्यबोधो जातः। कालिदासस्य नायिकाः प्रकृति – प्राप्तालंकरणमेव सौन्दर्यप्रसाधने स्वीकुर्वन्ति स्म। कारणञ्च प्रकृतितः प्राप्तसौन्दर्यप्रसाधनमुपकरणे हानिकारकतत्त्वं न भवति, फलस्वरूपतः तत् उपकरणं अधिकोपयोगी भवति। यस्मात् कारणात् अलकापुर्य्याः स्त्रियः सौन्दर्यप्रसाधने लोध्रपुष्पपरागचुर्णं वदने धारयन्ति, तथाच – तासां श्रृङ्गारसाधनानि अनेकविधानि पुष्पार्पण एव सन्ति, वर्ण्यतेऽत्र पद्ये। यथा–

**हस्ते लीलाकमलमलके बालकुन्दानुविद्धं, नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।**

**चूडापाशे नवकुरबकं चारु कर्णे शिरीषं, सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्।।**[१]

श्रृङ्गारप्रधानाः रमण्यः अलकापुर्या सर्वर्तुजानि पुष्पाणि धृत्वा स्वश्रृङ्गारान् प्रदर्शयन्ति। तत्र युवतीनां हस्ते क्रीडार्थं शरत्कालीकं कमलं भवति, अलके हेमन्तोत्पन्नानां माध्यपुष्पाणां गुम्फनं भवति, मुखोपरि शिशिरोत्पन्नानां लोध्रपुष्पाणां परागेण धवला शोभा आनीता विद्यते,केशपाशे वसन्तकालीकं नवकुरबकपुष्पं वर्तते। कर्णे ग्रीष्मोत्पन्नं कोमलं मनोहरं वा शिरीषपुष्पमस्ति, वर्षाकालिकं कदम्बपुष्पं मस्तककेशानां मध्यभागे विद्यते। अर्थात् अलकापुर्यां सर्वदा सर्वे ऋतवः सर्वर्तु पुष्पाणि च लभ्यन्ते।

महाकविः कालिदासं शिरीषपुष्पमत्यधिकप्रियं वर्तते। अतः स स्व काव्ये तस्य प्रयोगं अधिकं करोति। उपर्युक्तश्लोकात् वयं ज्ञातुं शक्नुमः यत् पर्यावरणवर्णने महाकविः कालिदासःसर्वेषु कविषु सर्वश्रेष्ठः आसीत्। कारणञ्च एकस्मिनेवश्लोके एतादृशं प्रकृतिसौन्दर्यवर्णनं षड्ऋतुषु उत्पन्न पुष्पाणां वर्णनं अन्यकाव्ये नैव प्राप्यते। स्त्रीमण्डनहेतुः सम्पूर्णोपकरणानि वृक्षैः प्राप्यन्ते, अतोऽनुमीयते यत् कालिदासयुगे वृक्षपुष्पादीनां बहुलता आसीत्।। प्राचीनकाले पर्यावरणं सुगन्धिना नियन्त्रयति स्म। सुगन्धिः उद्विग्नहृदयं शान्तिप्रदानं करोति ,तस्य त्वचायां विपरीतः हानिरपि न भवति। अस्माद्धेतोः यज्ञेषु विभिन्नवनस्पतिभिः निर्मितसुगन्धितद्रव्याणामुपयोगो भवति। महाकविः कालिदासः अनेकप्रकारकसुगन्धीनां उल्लेखो करोति। यक्षः मेघं कथयति मालवदेशे तथा वर्षणं कुरु यथा भूमिः सुगन्धितं भवेत्। यथा–

---

१.मेघदूत – २/२,

**त्वयायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः, प्रीतिस्निग्धै जनपदवधूलोचनैः पीयमानः।**
**सद्यः सीरोत्कषणसरभि क्षेत्रमारुह्य मालं,किञ्चत् पश्चात् व्रजलघुगति भूय एवोत्तरेण।।**[1]

यक्षः मेघं निर्दिशति यत् अन्नादीनामुत्पत्तिः तवाधीनमस्ति। अस्मात् कारणात् कटाक्षपातादिसुलभक्रियाभिः अपरचितैः किन्तु प्रेमरसभरैः ग्रामीणवधूनां नयनैः सादरं सतृष्णं च अवलोक्यमानस्त्वं मालनामकं पर्वतीयोन्नतं प्रदेशमारुह्य तत्र तथा वर्षणं कुरु यथा तत्कालमेव हलचालनेन तत् सुगन्धितं भवेत्,तथा च किञ्चित् पश्चिमायां दिशि गच्छ, पुनः तत्र वर्षणेन स्वल्पभारः त्वं शीघ्रगत्या उत्तरदिशः मार्गेणैव गच्छ।

अस्माकं देशः कृषिप्रधानोऽस्ति। यदि समयानुसारेण वर्षा न भवति तदा पाकः सम्यक् न भवति, अतः समृद्ध्यर्थं प्रथमं तावत् जलस्य आवश्यकता भवति, एतदर्थं कालिदासः यक्षमुखेन कथयति हलकर्षणं स्यात् तथा वर्षणं कुरु। सर्वत्र मेघदूतस्य प्रत्येकश्लोके जलसंरक्षणविषये, भूमिसंरक्षणविषये, वायुसंरक्षणविषये, वनस्पतिसंरक्षणविषये, जीवजन्तुसंरक्षणविषये वा कालिदासेन स्व सुक्ष्म दृष्ट्याऽवलोकनं कृतमस्ति। सः सम्यक् जानाति पर्यावरणस्य सुरक्षा एव अस्माकं सुरक्षा। एवं प्रकारेण सुगन्धि विषये अन्यश्लोकेऽपि वर्णनं प्राप्यते। यथा–

**आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणाम्।।**[2]

तत्र हिमालये जीवहिंसा न भवति, सर्वे वनचराः पशवः इतस्ततः निर्भयोभूत्वा विचरन्ति, तत्र मृगाणां बाहुल्यं वर्तते, यस्मिन् प्रस्तरे मृगः उपविसति स सुगन्धितः भवति अतः उक्तम् च उपविष्टानां मृगाणां कस्तुरिकागन्धैः सुगन्धितप्रस्तरयुक्तं हिमालयं प्राप्य मार्गपरिश्रमं अपनय इति यक्षः मेघं निर्देशति। मेघमार्गे सर्वे पर्वता कुटजपुष्पैः सुरभिताः सन्ति। यथा–

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः, कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।**

**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः,प्रत्युद्यातःकथमपि भवान् गन्तुमाशु व्यवश्येत।।**[3]

यक्षस्य मनसि चिन्ता भवति यत् मेघपथि प्रकृतेः सौन्दर्यात् अलकानगर्यां गमने विलम्बो न स्यात्, तदर्थं यक्षः मेघमनुनयपूर्वकं कथयति–

हे मित्र मे प्रियं सन्देशं प्रापयितुं शीघ्रगमनेच्छुकस्यापि भवतः कुटजपुष्पैः

१. मेघदूत – १/१६, २. – १/५६, ३. – १/२२,

सुगन्धियुक्ते प्रत्येकस्मिन् पर्वते( तव विश्रामकारणात्) गमने विलम्बम् उत्प्रेक्षे। किन्तु भवान् मयूरवाणीभिः कृतातिथ्यः सन् केनापि प्रकारेण ततः शीघ्रं प्रस्थातुं प्रयत्नं कुयार्त्, येन कालविलम्बो न भवेत्। अन्यच्च– उज्जयिनीनगर्याः भवनान्यपि पुष्पैः सुरभितानि सन्ति। यथा–

**हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः।।[१]**

यक्षः मेघं कथयति यत् त्वं पुष्पाणां सुगन्धियुक्तेषु प्रासादेषु विशालानगर्याः शोभां पश्यन् मार्गश्रमं दूरीकुर्याः। महाकविः कालिदासं केवलं सुगन्धितभूमेः वर्णनेन सन्तोषो न भवति, अवसरप्राप्तः सः सुगन्धित जलस्यापि वर्णनं मेघदूते करोति। यथा अस्मिन् श्लोके–

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छे।।[२]**

यक्षः मेघं कथयति– वृष्टस्त्वं सुगन्धितैः कटुभिः वन्यगजमदजलैः सुगन्धितं, जम्बूवृक्षसमूहैः अवरुद्धवेगं रेवायाः पानीयं नीत्वा व्रजेः। अस्यश्लोकस्य मल्लिनाथोक्तएकोऽन्योऽर्थोऽपि क्रियते। मनुष्यः उदरविकारकारणात् वमनं करोति, पुनःवमनः न स्यात् तदर्थं लघुतिक्तकषायजलपानं करोति, तद् पश्चात् उदरवायुप्रकोपं न भवतिं अत्राऽपि मेघं रेवायाः "जम्बूकुजप्रतिहतरयंतोयम्" अर्थात् जम्बूवृक्ष घर्षणात् लघु कषायंभूतंजलं पीत्वा गच्छ इति येन मेघमपि वायुविकारो न स्यात्। अनुमीयते यत् आयुर्वेदस्यापि ज्ञानमासीत् कालिदासम्। वनस्पतीनां महत्वं प्रदर्शयन् अस्मान् वनस्पतिसंरक्षणंकर्तुं संकेतयति कविकालिदासः। प्राचीनकाले ध्वनिप्रदूषणात् रक्षणार्थं प्रायशः संगीतस्य प्रयोगं कियते स्म । सामगानम् अथवा मन्त्रादीनां पाठात् वायुमण्डलं नियन्त्रितं भवति स्म। कालिदासोऽपि अलकापुर्याः प्रासादेषु नृत्यगानावसरे जायमाना मृदङ्गस्य मधुरध्वनेरुल्लेखः करोति । यथा–

**संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।।मेघ. २/१।।**

अन्यच्च–

**त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु।।मेघ.२/३।।**

विरहिणी यक्षिण्यपि पतिविरहे मनोविनोदार्थं क्रोडे वीणां धृत्वा गीतं गायति । यथा–

---

१. मेघदूत – १/३६, २. – १/२०

उत्सङ्गे वा मलिनवसने सोम्य निक्षिप्य वीणां,

मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्,

भूयो भूयः स्वयमपिकृतां मूर्च्छनां विस्मरन्ति।।[१]

महाकालमन्दिरे सन्ध्याकालीनपूजासमये पटहमृदङ्गादिवादनक्रियां कर्तुं मेघमाग्रहः करोति यक्षः। यथा—

अप्यन्यस्मिन् जलधर महाकालमासाद्य काले,

स्थातव्यं ते नयनविषयं यावदत्येति भानुः।

कुर्वन्सन्ध्यावलिपटहतां शलिनः श्लाघनीया,

मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्।।[२]

सायंकालादतिरिक्तकालेऽपि महाकालमन्दिरं यदि गच्छसि, तदा तत्र सूर्यास्तं यावत् अवस्यं त्वया स्थातव्यम् यतो हि तत्र शिवस्य प्रशंसनीयसन्ध्याकालीनपूजायां पटहध्वनेः कार्यं सम्पादयन् त्वं स्वकीयानाम् ईषद्गम्भीराणां गर्जनानां सम्पूर्णफलं प्राप्स्यसि। अर्थात् सायंकालीनपूजाकाले कृतंतव गम्भीरगर्जनं पटहध्वनेः कार्य सम्पादयिष्यति, तेन त्वं गर्जनफलं सम्पूर्णम् अवाप्यसि। जलं पर्यावरणस्येकं मुख्यतत्वमस्ति। जलेन जीवनं समृद्धं भवति, तथा च तस्याऽभावात् अखिलसृष्टिः, वृक्षलतादिजीवजन्तवः सर्वे नश्यन्ति। यतो हि जलं जीवितुं आवश्यकं अस्त्येव, एतदरिक्तं सर्वधार्मिककार्ये, अनुष्ठानेऽपि जलस्य आवश्यकता भवति, अतः तस्य पवित्रता आवश्यकमस्ति। अतः महाकविः कालिदासः यत्र कुत्रापि जलस्य वर्णनं करोति तदा तं जलं नीलं शुद्धञ्च कथयति, यत् प्रदूषणरहितस्य बोधकोऽस्ति। सरस्वतीनद्याः जलमत्यन्तं शुद्धं वर्तते, अतो हि यक्षः तज्जलपानं कर्तुं मेघम् अनुरोधयति। सरस्वतिनद्याः जलं अतीवमधुरं वर्तते तेन कारणेन बलराम स्वाभिष्ट मदीरां त्यक्त्वा जलं पीतवान्। यथा अस्मिन् श्लोके—

---

१. मेघदूत – २/२३, २. – १/३४,

हित्वाहालामभिमतरसांरेवतीलोचनाङ्कां,

बन्धु प्रीया समरविमुखो लाङ्गली या सिषेवे।

कृत्वा तासामधिगममपां सौम्य सारस्वतीनाम्–

अन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः।।[१]

यक्षः कथयति– हे जलद बन्धुप्रेम्णा युद्धात् विमुखः बलरामः अभीष्टस्वादयुक्तां तथा च स्वप्रियायाः रेवत्याः नयनयोः चिह्नितां मदीरां परित्यज्य यस्याः नद्याः जलानां सेवनं कृतवान्, तथा च अतः शुद्धो बभूव, तस्याः एव सरस्वतीनद्याः जलं प्राप्य पीत्वा च त्वमपि अन्तः शुद्धः सन् केवलं वर्णमात्रेण श्यामः स्थास्यसि। अर्थात् अन्तः करणात् त्वमपि शुद्धो भविष्यसीति तात्पर्यः। गङ्गायाः जलमपि श्वेतस्फटिकमणिरिव स्वच्छमस्ति। अतो हि मेघः तस्याः जलं पातुं शक्नोति। यथा–

तस्याः पातुं सुरगजइव व्योम्नि पश्चार्धलम्बी, त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।।[२]

अन्यच्च मेघमार्गे प्राप्ता गम्भीरानद्याः जलमपिनिर्मलं विद्यते। यथा अस्मिन् पद्ये–

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने, छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।।[३]

यक्षो वदति– हे मेघ! गम्भीरानद्याः प्रसन्नहृदये इव निर्मले जले छायारूपेण तव प्रवेशं भविष्यति। अन्यच्च यक्षो मेघं कथयति त्वं दशार्ण– राजाधान्यां विदिशां गत्वा वेत्रवतीनद्याः स्वादु जलं अवश्यं पिबेः। यथा–

तेषां दिक्षु प्रथितविदिशालक्षणं राजधानीं,

गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।

तीरोपान्तस्तनितसुभगं पास्यसि स्वादुयस्मात्,

सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।।[४]

हे जलद त्वं सर्वत्र प्रसिद्धनामधेयां दशार्णजनपदस्य राजधानीं विदिशां गत्वा

---

१. मेघदूत – १/५३, २. १/५५, ३. – १/४४, ४. – १/२४,

वेत्रवतीनायिकायाः मधुरं चञ्चलं तरङ्गयुक्तं जलं तीरप्रान्ते गर्जनात् सुन्दरतया तथैव पास्यसि यथा कश्चित् कामुकः दशनपीडया पीडितायाः कस्याश्चित् नायिकायाः भ्रूकुटियुक्तं मुखाधरं पिबति। अत्र महाकविः मेघयात्रां आनन्दमयी रसमयी रुपेण कल्पयित्वा वेत्रवतीं मेघं च नायकनायिकयो रुपेण चित्रणं तस्य विशेषतास्ति।

स्वादिष्टं तरङ्गितं च जलं प्रदूषणराहित्यद्योतको भवति। ग्रीष्मर्तौ निर्वन्ध्यानद्याः जलधारा कृशतां प्राप्ता तथा च तटोत्पन्नवृक्षात् पतितपीतशुष्कपर्णेभ्यः विरही नायिका इव पाण्डुवर्णा जाता। निस्सन्देहः एतादृशं जलं प्रदूषणयुक्तं भवति , प्रदूषणं निवारयितुं यक्षो मेघं कथयति, तत्र गत्वा जलवर्षणं कुरु येन निर्विन्ध्याजलं प्रदूषणमुक्तं स्यात्। यथा–

**वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः,**

**पान्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।**

**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती,**

**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः।।**[१]

यक्षो वदति वेणीसदृशस्वल्पजलवती निर्विन्ध्यानामनदीतीरोत्पन्नवृक्षेभ्यः पतनशीलैः शुष्कपीतपत्रैः पाण्डुवर्णा भूत्वा विरहजन्य कृशतया तां परित्यज्य दूरदेशं गतस्य तव मेघस्य सौभाग्यं प्रकाशयमाना वर्तते। सा यादृशेन तव कार्येण विरहजन्यकृशतां त्यजेत् तत् कार्यं वृष्टिरुपं कृत्वा त्वया तस्या कृशता पीतिमा च अपनेया। अन्यच्च– यक्षगृहेस्थितं वाप्याः जलमेतादृशं शुद्धं वर्तते यत् तत्र कृतनिवासाः राजहंसाः निकटतममानसरोवरे गन्तुमुत्कण्ठिताः न भवन्ति। यथा–

**वापि चास्मिन् मरकतशिलाबद्धसोपानमार्गा,हेमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः।**

**यस्यास्तोये कृतवसतयो मानसंसन्निकृष्टं, नाध्यासन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः।।**[२]

स्वागारं वर्णयन् कथयति यक्षः– मदीयागारे मरकतमणिनिर्मितसोपानयुक्ता वैदूर्यमणिनिर्मितनालयुतैः कमलैः आच्छादिता एका वापी चास्ति, यस्याः जले निवासं कृतवन्तः राजहंसाः त्वां मेघं विलोक्यापि वर्षाजलेन इयं वापी कलुषिता भविष्यतीति चिन्तारहिताः सन्तः समीपवर्तिनं मानसरोवरमपि न स्मरिष्यन्ति। यतो हि दीर्घिकायाः जलं तावत् परिशुद्धं

---

१.मेघदूत – १/२९, २. – २/१३

प्रदूषणरहीतं वर्तते यत् वर्षाजलेनापि दूषयितं न शक्यमिति तात्पर्यः। महाकविः कालिदासः मेघदूते यत्र–तत्र शुद्धवायोर्वर्णनं करोति। पर्यावरणसन्तुलनार्थं वायुशुद्धता आवश्यकी वर्तते। शिप्रानद्याः उपरिभागतः प्रवाहितवायोः शुद्धताविषये अस्मान् संकेतयति। यथा–

**दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां**

**प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।**

**यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः**

**शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।।मेघ. १/३१।।**

उज्जयिन्यां प्रत्यहं प्रातःकाले सारसपक्षिणां तीव्रमदेन अव्यक्तमधुरं च कूजनशब्दं प्रसारयन् तथा च विकसितकमलानां सुगन्धसम्पर्कात् सुरभितो गात्रसुखदायकः शिप्रायाः जलसम्पर्कात् शीतलो वायुः रतियाचनायां प्रियवचनप्रयोक्ता वल्लभ इव महिलानां रतिखेदं दूरी करोति। यः वायुः अङ्गानुकूलः, खिन्नताहारकः भवति, सैव वायुः शुद्धता, शीतलता तथाच पोषकतायाः गुणान् विधत्ते। देवगिरि गमनकाले मेघस्याधोभागे शीतलो वायुः प्रवहति, पृथिव्याः गन्धसम्पर्केण सुगन्धितोऽस्ति। यथाऽस्मिन् पद्ये–

**त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः,**

**स्त्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।**

**नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते,**

**शीतो वायुः परिणमयिता काननोदुम्बराणाम्।।मेघ. १/४२।।**

यक्षो मेघं वदति– तव वर्षणजलेन उपवृद्धाया वसुधायाः सुरभिसंसर्गेण मनोहरः गजैः नासाक्षिद्रेषु जायमानेषु ध्वनिना सुन्दरतापूर्वकं आध्रायमाणः काननेषु जन्तुफलानां परिपाचकः शीतलः पवनः देवगिरिनामकं पर्वतं गन्तुमिच्छोस्ते मेघस्य नीचभागात् प्रवहनं करिष्यति। अन्यच्च–

एवं प्रकारेण देवदारुवृक्षाणां नवपल्लवगुच्छान् भेदयित्वा तद्दुग्धस्पर्शेन गन्धवतः वायुः दक्षिणां दिशां प्रति प्रवहति। यथा–

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां ,

ये तत्क्षीरस्त्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।

आलिङ्ग्यन्ते गुणवती! मया ते तुषाराद्रिवाताः,

पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति।।मेघ.२/४४।।

देवदारुनामकवृक्षपल्लवगुच्छान् विदार्य दुग्धप्रवाहेन सुगन्धयः ये पवनाः हिमालयपर्वतात् प्रवहन्तः दक्षिणदिशं प्रति आगताः, ते वायवः तवशरीरं निश्चयेन पूर्व स्पृष्टवन्तः स्युरिति मनसा सम्भाव्य एव अहं तान् वायून् आलिङ्गामि।

अलकायाः बाह्योद्याने साक्षात् शिवस्य निवासो विद्यते, तस्य मस्तके या ज्योत्स्ना तया उज्ज्वलितानि अलकानगर्याः भवनानि दृश्यन्ते। यथोऽयं श्लोके–

गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां

बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या।।मेघ.१/७।।

उपरिवर्णितेन श्लोकेन अनुमीयते यत् तदानीन्तनकाले चन्द्रमायाः सम्पूर्णप्रकाशः पृथिव्योपरिपतति स्म। तेन निश्चीयते तत्कालीन वायुमण्डलंसर्वथा प्रदूषणरहितमासीत्। अद्य तु वायुमण्डलस्य मध्यभागे विद्यमानाऽनेक विषाक्त तत्त्वकारणात् चन्द्रमायाः सम्पूर्णप्रकाशात् पृथिवी वञ्चितोऽस्ति।

चन्द्रमा औषधीनां स्वामि अस्ति यदा तस्य चन्द्रिका भूमौ वनस्पतिपाकादिनामुपरि पतति, तदैव ते पुष्टतां यान्ति। चन्द्रमसः चन्द्रिकायां एकादिव्याऽलौकिकाशक्तिः विद्यते तया कारणात् वनस्पति पाकादिषु रोगो न भवति, पाकोऽपि सम्यक् भवति। अतः स्पष्टं भवति यदा वायुमण्डलः प्रदूषणरहितो भविष्यति तदैव शुद्धान्नं शुद्धप्राणवायुं च प्राप्स्यामः। अस्मिन् श्लोके वायुमण्डलशुद्ध्यर्थं अस्माकं कृते संकेतोऽस्ति। कालिदासः आकाशीय सौन्दर्यवर्णनं इन्द्रधनुः माध्यमेन इन्द्रधनुः पर्यावरणस्य शुद्धतां संकेतयति। मेघं गन्तुं प्रोत्साहयन् यक्षो वदति यदा त्वमग्रेसरोभविष्यसि तदाकाशे दृश्यमानस्य इन्द्रधनुषः विविधैः रागैः तव वर्णः सुन्दरतमो भविष्यति। यथा–

रत्नच्छायाऽऽव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता–

द्वल्मीकाग्रात्प्रभवति धनुष्खण्डमाखण्डलस्य।।[१]

वन्यजन्तवोऽपि पर्यावरणे सम्बद्धाः सन्ति। पर्यावरणसन्तुलने तेषां महत्त्वपूर्णयोगदानमस्ति। जीव–जन्तुभ्यः लाभो भवति सुविदितोऽस्ति। प्रकृतिः सरक्षणे सहायको भवति।

महाकविः कालिदासः प्रकृतिः मानवजातेः सह पशुपक्षिणामपि स्वकाव्ये समुचितस्थानं दत्तमस्ति। मेघदूते पक्षिणां चर्चा अधिकास्ति। पूर्वमेघे चातकः , बलाका, राजहंसः, मयूरः, सारसः, शरभादीनां वणर्नमस्ति। उपर्युक्त विवरणाधारेण वक्तुं शक्यते यत् कालिदासयुगीनः पर्यावरणं शुद्धमासीत्। समाजः प्रदूषणचिन्तया सर्वथा मुक्त आसीत्।

महाकविः कालिदासः मेघदूते वनतरून् शिवस्य बाहुः कथयित्वा वनस्पतिपर्यावरणस्य महत्त्वं वर्धितमस्ति। यथा–

**पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः**

**सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।**

**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां**

**शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या।।**[२]

यक्षो वदति– हे मेघ सन्ध्यापूजाऽनन्तरं शिवताण्डवसमये सायकाङ्कालिकमरुणं तेजो धारयन् शिवस्योन्नतं बाहुवृक्षवनं मण्डलाकारेण व्याप्य शिवस्य शोणितक्लिन्नगजचर्माऽभिलाषं निवर्तय, तस्मिन् समये देवी भवानी गजाऽसुरचर्मदर्शनभयस्याऽपनयेन त्वदीयां भक्ति द्रक्ष्यति।

उपर्युक्त वर्णनेन ज्ञायते यत् वृक्षोच्छेदनं नस्यात् तदर्थं सर्वान् शिवभुजारूपतरून् उच्छेदने पापो भविष्यतीति कथयित्वा निषेधतिकविः।

**निष्कर्षः** –"मेघदूतम्" दूतकाव्यपरम्परायाः अग्रणीकाव्यं वर्तते। वर्षतौ सौन्दर्यप्रभावितः

---

१.मेघदूत – १/१५, २. – १/३६

कवि मेघदूते वर्षाकालिन भारतीयपर्यावरणं तथा तत्सम्बन्धी जलवायु–विज्ञानस्य तथ्यानां रूचिरतया वर्णनं करोति। भारतः कृषिप्रधान देशोऽस्ति। अस्मिन् देशे 'जलं जीवनम्' कथ्यते, कारणञ्च कृषौ जलं मुख्यकारकमस्ति। अतः जलदायी मेघस्य महत्त्वं दीयतेऽत्र।

कविः मेघम् दौत्यकर्मे प्रवृत्तयन् तम् समर्थेन्द्रियः कामरूपं मानवसंवेदनशीलः गुणवान् रूपेण चित्रितमस्ति।यथा–

**जातं वंशे भुवनविदिते पुष्करावर्तकानां, जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**

**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं, याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।**[१]

मेघस्य वृष्टिक्षमता, गर्जनम्, विद्युत, प्रतिपलपरिवर्तनमानस्वरूपम् नदीपर्वतादिभिः सह स्नेहभावः तथा सर्वसहायभावश्च 'मेघदूते' वर्णित वैशिष्ट्यानां वास्तविकतथ्यं प्रस्तौति। मेघं चेतनोचितदूतकार्ये चयनं कृत्वा कविः अचेतने चेतनायाः दर्शनं कारयति। यथा–

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः, सन्देशार्थाः क्व पटुहरणैः प्राणिभिः प्रापणीयाः।**

**इत्यौत्सुक्यादपरिगणयन्गुह्यकस्त्वं ययाचे,कामाऽऽर्ता हि प्रकृति कृपणाश्चेतनाचेतनेषु।।**[२]

रामगिरौ शापावधि यापयन् यक्षः अल्कानिवासिनी प्रेयसीं प्रेषणाय वारिवाहं रामगिरितः कैलासोत्सङ्गे सुशोभित अलकानगरीं यावत् यम् मार्गं प्रदर्शितं तं मार्गं भौगोलिकदृष्ट्या मुख्यतया त्रिधा वर्गीकर्तुं शक्यते।

१. मध्यभारतीयभूभागः। २. हिमालयकैलासक्षेत्रम्। ३. अलकाश्च।

मध्यभारतस्य रामगिरितः दशपुरं यावत् पर्वताः रामगिरि–आम्रकूट–विन्ध्यशृङ्खला– नीचगिर्यादयश्च। पठारः मालक्षेत्रम् नगरजनपदानि दशार्णः, विदिशा, उज्जयिनी, दशपुरश्च। वर्षाजलैः पुरितनद्यः– रेवा,वेत्रवती, निर्विन्ध्या, सिन्धुः, शिप्रा, गन्धवती, गम्भीरा, सुरभितनयाश्च। मेघै अभिसिञ्चितकृषिक्षेत्रं वनोपवनम्, वर्षाकाले हर्षितजीवजन्तवः तथा मानवसमुदायश्च। ब्रह्मावर्तजनपदम्, कुरुक्षेत्रस्यसरस्वतीनदी, हिमालयेनीचप्रदेशावस्थितकनखलम्, तुषारधवलश्रेणिभिरुद्भूतं

---

१. मेघदूत – १/६, २. – १/५

गङ्गायाः समीपवर्तीक्षेत्रम्, तत्रस्थ सरलवन–कीचक–करतुरीमृग–चमरीशरभ्यादयश्च। क्रौञ्चरन्ध्रः हिमाच्छन्नकैलासपर्वतः, मानसरोवरम्,अलौकिकप्राकृतिकसमृद्धया सुशोभिता यक्षवसति अलका सर्वेषां वर्णनं तथ्यपूर्णमस्ति। यथा–

**मन्दाकिन्याः सलिलशिशिरैः सेव्यमानामरुद्भि,मन्दाराणामनुतटरुहां छायया वारितोष्णा।**

**अन्वष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः,संक्रीडन्ते तणिभिरमरप्रार्थिता यत्र कन्याः ।।[१]**

तस्मिन् सम्पूर्णमेघमार्गे विन्ध्यक्षेत्रतः कैलासपर्वतपर्यन्तस्य भारतीयभूगोलः वनस्पतिः , जीवजन्तूनां यथार्थविवरणैः समन्वितं वर्षाकालीनपरितन्त्रं स्पष्टतया लक्ष्यते।यथा–

**हेमाम्भोजप्रसतिसलिलं मानसस्याददान,कुर्वन्कामंक्षणमुखपट प्रीतिमैरावतस्य।**

**धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै,र्नानाचेष्टैर्जलद ललितैर्निविशेस्तं नगेन्द्रम्।।[२]**

मेघदूते प्राकृतिकः तथा मावनिर्मितपरितन्त्राणां सामंजस्यं प्राप्यते। जलवायविकयथातथ्यतापरिपूर्णं मेघदूतखण्डकाव्यं भारतीयजलवायोः दक्षिणपश्चिमी–वातावरणप्रवाहस्य च प्रतिनीधित्वं करोति। मेघमार्गस्य वातावरणरुपे विवेचयन्दक्षिणप्रायद्वीपकेन्द्रस्थरामगिरितः, मेघयात्रायाः प्रारम्भः मेघस्य उत्तरोन्मुखता, ईषत् पश्चिमे उज्जयिन्यां प्राप्य, तत्रतः उत्तरे कैलासपर्यन्तगमनं एवं प्रकारेण नदीनां उद्गमस्रोतहिमालयेवृष्ट्याः लक्षं दृष्ट्वा अस्मिन् क्षेत्रपर्यन्तं आवागमनात् पूर्वीवातावरणस्य अतिशैथिल्येन जलवायविकोद्देश्यं स्पष्टो भवति। वृष्टेः प्रतुखैवं प्रत्यक्षकारको मेघस्य मेघदूतवर्णितकाव्यगतपरिकल्पना, मेघविज्ञानसम्मतसिद्धान्तानां कसौट्याम् उत्तीर्णाऽस्ति। मेघस्य नीरसमीरात्मकसंरचना जलदस्य पर्वताकारः श्यामछवेः प्रमुखता, गम्भीरगर्जना, इन्द्रधनुषादीनां वर्णनं मेघविज्ञानगतस्वरुपानुकूलानि सन्ति। मेघस्य रामगिरितः अलकापर्यन्तयात्रा,यत्रकलाविज्ञानं, कल्पनायथार्थस्य केवलं नैव परन्तु कामकर्तव्ययोः स्वार्थपरमार्थयोश्च समन्वयः सम्यग् दृश्यते। कामस्य आत्यन्तिककल्याणतत्वं प्रति सर्वस्वसमर्पणम्, प्रकृत्याः आलङ्कारिकभाषया वर्णनव्याजेन लोकानां पर्यावरणसंरक्षणं प्रति जागरणमेव, कालिदासस्य मर्मस्पर्शी सन्देशो वर्तते । यं सन्देशं सः मेघदूतस्य माध्यमेन प्रतिजनं ग्रामं नगरञ्च प्रति प्रेषयतीति।।

---

१. मेघदूत – २/४, २. – १/६२

## (४) ऋतुसंहारे प्रर्यावरणम्।

महाकविः कालिदासः विरचितः "ऋतुसंहार काव्ये" पृथक्–पृथक् पद्यैः भारतीयऋतुचक्राणां वैविध्यतायाः निरुपणं सरलशैल्यां कृतमस्ति। अस्मिन् लघुकाव्ये क्रमशः ग्रीष्म–वर्षा–शरद्–हेमन्त–शिशिर–वसन्तर्तुनां वर्णनं स्वभावतः चारुतया परिपूर्णोऽस्ति। इदं काव्यं कालिदासस्य प्रथमा रचना मन्यते। वल्लभदेवेन "सुभाषितावल्याम्" ऋतुसंहारस्य द्वौ पद्यौ उत्टङ्कितौ –

**ताम्रप्रवालास्तवकावनम्राश्चूतद्रुमाःपुष्पितचारुशाखाः।**

**कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम्।।[1]**

**कान्तामुखद्युतिजुषामपिचोद्गतानां शोभां परांकुरबकद्रुममञ्जरीणाम्।**

**दृष्ट्वा प्रिये सहृदयस्य भवेन्नकस्य कन्दर्पबाणपतन व्यथितं हि चेतः।।[2]**

एवंप्रकारेण "वत्सभट्टिकृत मन्दसौरशिलालेखे (४७३ ई.) ऋतुसंहारस्य भावभाषायाः प्रभावेण एषा कृतिः कालिदासस्यैवाऽस्तीति पुष्टि कुर्वन्ति। तथा अस्मिन् काव्ये कालिदासस्य काव्यात्मकप्रतिभा, काव्यात्मक वैशिष्ट्यञ्च प्रमाणितं भवतः। ऋतुसंहारे शब्दभावानां पुनरावृत्तेः कारणंकविद्वारा पृथक–पृथक् समये विरचितपद्यानां ऋत्वाऽनुसारेण एकीकरणमपि भवितुं शक्यते। दिङ्मात्रमुदाहरणम्। यथा–१. रवेर्मयूखैरभितापितोभृशम्।।मेघ.१/१३।। २. रवेर्मयूखैरभितापितोभृशंवराहयूथो विशतीव भूतलम्।।मेघ. १/१७।। इत्यादि। ऋतवः पर्यावरणस्य सन्तूलनार्थं मुख्याः विद्यन्ते। अस्य काव्यस्य प्रकृत्या सह घनिष्ठसाहचयभावं कालिदासस्य कृतौ एव सम्भवोऽस्ति। मानवजीवनेन सह ऋतूनां घनिष्ठसम्बन्धोऽस्ति। अतः अस्माकं पूर्वाचार्यैः संस्कृतसाहित्ये, पुराणे, काव्येऽपि च तस्य महत्वं दत्वा ऋतूनां वर्णनं कृतमस्ति। श्री विष्णुपुराणे शरद् वर्णनम्–

**शरत्सूर्यांसुतप्तानि ययुश्शोषं सरांसि च । बह्वालम्बमम हृदयानीव देहिनाम्।।[3]**

यजुर्वेदे षड्–ऋतूनां वर्णनं यथा–

**"वसन्तः ऋतुः। ग्रीष्मर्तुः। वर्षा ऋतुः । शरद् ऋतुः। हेमन्त शिशिरावृत्।।"[4]**

---

१. ऋतुसंहार – ६/१७, २. – ६/२०, ३. विष्णुपुराण – ५/१०/५, ४. यजुर्वेद – १०/१०,

साहित्यदर्पणे यथा–

संन्ध्या सूर्येन्दुरजनी प्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगया शैलर्तुवनसागराः।।[१]

ऋतून् मुख्यविषयं कृत्वा यत् स्वतन्त्र काव्यरचनां कृतं तत् केवलं कालिदासस्य विशिष्टचिन्तनमस्ति। अस्माकं देशे विद्यमान षड् ऋतूनां क्रमशः वर्णनं भारतीय ऋतुचक्रस्याऽसाधारणता दर्शयति। षड् ऋतूनाधारी कृत्य विरचित 'ऋतुसंहारकाव्यम' पर्यावरणस्य जलवायविकतत्वानां महत्त्वमपि दर्शयति।

## ❖ आधुनिकऋतुविज्ञाने ऋतुचक्रम्।

'ऋतुचक्रम्, पर्यावरणस्य अत्यन्तप्रभावशाली अङ्गमस्ति। पृथिव्यां तापमानमूलस्रोतः सूर्यकिरणाः सन्ति। पृथिवी स्व निश्चितकक्षायां सूर्यपरिक्रमा कुर्वन् स्व धुरायाम् (AXIS)365 ¼ बारं परिभ्रमति। एतेषां ३६५दिनानाम् एको वर्षः भवति। अस्यां सम्पुर्णपरिक्रमायां पृथिव्याः स्थानविशेषः सूर्यकिरणेन यथा सम्पर्के आगच्छति, तदनुसारेणैव तत्स्थानस्य तापमाने परिवर्तनं भवति। विषुवत् रेखातः उत्तरः अथवा दक्षिणाक्षांशः पर्यन्तं सूर्यकिरणाः सरलाः भूय पतन्ति। तदा तापमानम् अधिकं भवति।[२] भारतीयभूभागः कर्करेखायामवस्थितोऽस्ति। कर्करेखायां सूर्यकिरणाः सरलगत्या पतन्ति, जूनमासे तदा अत्र ग्रीष्मकालो भवति। सूर्यकिरणाः रेखायाम् अग्रेसरः जायमाने सति दक्षिणभारते तापमानो न्यूनं न भवति, किन्तु कर्करेखायारुत्तरे सूर्यकिरणस्य तापमाने सितम्बरमासे शनैः शनैः न्यूनता भवति। यदा दक्षिणगोलार्द्धस्य मकररेखायां सूर्यकिरणाः सरलगत्याः आपतन्ति, तदा शीतोष्णकटिबन्ध भारते अक्षांशस्य वृद्धिकारणात् तापमाने न्यूनता आगच्छति, एषा प्रक्रिया दिसम्बरमासे भवति। पुनः यदा विषुवत्रेखायां सूर्यकिरणाः आगच्छन्ति, तदा मार्चमासे उष्णता वर्धयति। एवंप्रकारेण पृथिव्याः परिक्रमया साकं तापमानपरिवर्तनाधारेण ऋतुचक्रं सम्पन्नं भवति।

"अखिलभारते वर्षा वातावरणस्योऽपरि निर्भरोऽस्ति। यत् मुख्यतया दक्षिण–पश्चिमग्रीष्मकालीनवातावरणात् मध्यजूनमासतः मध्यसितम्बर मासप्रर्यन्तं प्राप्यते।एवंरित्या शीतकाले उत्तरपूर्वीवातावरणं यदा सक्रियो भवति तदा शुष्कता भवति।"

१. साहित्यदपण – ६/२२, २.मौसम विज्ञान, पृ.५/३१९, बनर्जी एवं उपाध्याय




{ आधुनिक-ऋतुचक्रानुसारेण ऋतुचक्रमिदम् }

एवं प्रकारेण सागरीयतटीयक्षेत्रम्, उन्नतपर्वतीयक्षेत्रम्, हिमालयक्षेत्रम्, अक्षांशः, उष्णकटिबन्धक्षेत्रम् इत्यादि जलवायुनियन्त्रकानां प्रभावेण सह साधारणतः स्पष्टतया दृश्यन्ते। यथा–

- ग्रीष्मः–मध्य अप्रेलतः मध्यजून।
- वर्षा–मध्य जूनतः मध्य सितम्बर।
- शरद्–मध्य सितम्बरतः अक्टूबर।
- शीतम् – नवम्बरतः फरवरी।
- वसन्तः–मार्चतः मध्य अप्रेल।

अस्यां सम्पूर्णपृष्ठभूम्यां ऋमुसंहारस्य ऋतुवर्णने कालिदासवर्णित पर्यावरणीय यथार्थता तथा भारतीय ऋतुचकस्य समालोचनं समीचीनं भविष्यतीति।

## ❖ ऋतुसंहारे ऋतुवर्णस्य पर्यावरणदृष्ट्या परिशीलनम्।

महाकविः कालिदासेन "ऋतुसंहारम्" काव्ये ऋतूनां पर्यावरणदृष्ट्या भूमण्डलस्य प्रकृति जीव–जन्तूनाम् उपरि विहीत प्रभावस्य क्रमशः वर्णनं ऋत्वानुसारेण कृतमस्ति। अत्र प्राकृतिक–पर्यावरणे ऋतुप्रभावस्य सूक्ष्मविवेचना कुर्वन् प्रत्येकऋतूनां कालिदास–वर्णित परितन्त्रस्य पर्यावरणीय पर्यवेक्षणं क्रियते। पर्यावरणदृष्ट्या "ऋतुसंहारस्य" अध्ययनेन भारतीय पर्यावरणस्य ऋतुविविधता एवं जलवायु–सम्बन्धी परिस्थितीनां परिचयः प्राप्यते।

### (१) महाकविः कालिदासानुसारेण पर्यावरणे ग्रीष्मर्तोर्प्रभावः।

सर्वप्रथमम् ऋतुसंहारे ग्रीष्मर्तोर्वर्णनं समागच्छति। ज्योतिषशास्त्रानुसारेण यदा सूर्यः वृषभमिथुन राश्योपरि आगच्छति तदा ग्रीष्मर्तुर्भवति। यथा–

**"वृषभे मिथुने ग्रीष्मः।" बालबोधज्योतिषसारसंग्रहः पृष्ठ–३,**

तस्मिन् समये वैदिकमासानुसारेण ज्येष्ठ–आषाढमासौ भवतः। अखिलपर्यावरणस्योपरि ग्रीष्मर्तोः प्रभावस्य वर्णनं महाकविः कालिदासेन समिचीनरीत्या कृतमस्ति। ग्रीष्मर्तौ मृगाः सूर्यस्यतापातिशयेन वनेषु पिपासिताः सन्ति। पिपासातिशयेन तेषां तालवः शुष्का जायन्ते। जलान्वेषणतत्परास्ते वनाद्वनान्तरं धावन्ति। यथा–

मृगाः प्रचण्डातपतापिता भृशं तृषामहत्या परिशुष्त तालवः।
वनान्तरे तोयमिति प्रधाविता निरीक्षभिन्नाञ्जन सन्निभं नभः।।[१]

वराहयूथोऽपि ग्रीष्मातिशयेन संतापितः शुष्ककर्दमयुक्तेषु सरस्सु मुस्ताक्षतिं कर्तुं स्वमुखाग्रभागेन सरः खनन् पातालं प्रविविक्षतीति दृश्यते। यथा–

सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्नायतपोतृमण्डलैः।
रवेर्मयूखैरभितापितो भृशं वराहयूथोऽपि विशतीव भूतलम्।।[२]

अत्र कविः ग्रीष्मोष्मणा व्याकुलं फेनान्वितमुखं, मुखान्निसृतचञ्चललोहितजिह्वम्, पिपासाकुलं, महिषीकुलस्यस्वाभविकचित्रणं करोति। यथा–

सफेनलालावृतवक्त्रसम्पुटं विनिःसृतालोहितजिह्वमुन्मुखम्।
तृषाकुलं निःसृतमद्रिगह्वादपेक्षमाणं महिषीकुलं जलम्।।[३]

ग्रीष्मर्तौ औष्णस्याधिक्येन संतप्तो विहगवर्गः शाखोपर्युपविशन् निःश्वासं गृह्णाति। कपयः घर्मक्लान्ताः अद्रिनिकुञ्जं प्रविशन्ति शैत्वमवाप्तुम्।

गवयसमुहः जलमिच्छन् इतस्ततो भ्रमति,शरभसमुहश्च जलं कूपात्निष्कासयति। यथा–

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः कपिकुलमुपयातिक्लान्तमद्रेर्निकुञ्जम्।
भ्रमति गवययूथः सर्वतस्तोयमिच्छञ्शरभकुलजिह्मं प्रोद्धरत्यम्बु कूपात्।।ऋतु.१/२३।।

अस्मिन् ग्रीष्मर्तौ सर्वेषां प्राणीनां, जीवजन्तूनां, पशुपक्षिणाञ्च ग्रीष्मसंतापात् स्व रक्षणमेव मुख्यलक्षोस्ति।अतःप्राणिनः स्वं स्वभावमपि परित्यजन्ति। सर्पमयूरयोरतिदीर्घकालादेव भक्ष्य भक्ष्यकभावः ख्यातो वर्तते,सर्पमवाप्य मयूरस्तं खादति। किन्तु अयं सर्पः निदाघातिशयेन सन्तप्तः सन् पथि तप्तपांशुभिरतीव दग्ध इव केनाऽपि प्रकारेण कुटिलगत्या मुहुः निश्वसन् बर्हिणः अधस्तात् उपविशति। यथा–

---

१. ऋतुसंहार –१/११, २. –१/१७, ३. – १/२१

रवेर्मयूखैरवितापितोभृशं विदह्यमानः पथि तप्तपांसुभिः।

अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति।।ऋतु.१/१३।।

पारस्परिकवैरभावं जन्मजातशत्रुताञ्च विस्मृत्य वन्यजन्तूनां मित्रतापूर्णव्यवहारं प्रदर्शयन् कविः ग्रीष्मस्य भीषणतायाः वर्णनेन सह भोजन–शृङ्खलायापि संकेतयति। यथा मयूर–सर्प–मण्डूकाः आहारशृंखला परस्परबद्धा सन्ति, अतः एव मयूरपूच्छछायायां सर्वस्य फणायारधस्तात् भेकस्य चित्रं महाकवेः चमत्कारपूर्णचिन्तनं वर्तते। एवं प्रकारेण शाकाहारी गज–गवयोः मांसाहारी सिंहस्य च परस्परमित्रभावं प्रदर्श्य विस्मय–सृजनंकृत्वा स्वाभाविकतायापि परिरक्षणं कृतमस्ति। अत्र ग्रीष्मर्तोः वर्णनप्रसङ्गे वर्णित वन्य–पशुपक्षी जीव–जन्तूनां सूक्ष्मवर्णनं कालिदासस्य पर्यावरण–निरीक्षण क्षमतायाः दर्शनं कारयतीति।

## (२) पर्यावरणसंरक्षणे वर्षर्तोः स्वरूपनिरुपणम्।

वर्षर्तुः श्रावण–भाद्रपदयोः समागच्छति। ऋतुसंहारस्य वर्षावर्णनप्रसङ्गे कालिदासः वृक्ष–वनस्पति–पशुपक्षी–नदीपर्वतादिषु वर्षायाः प्रभावेण सह वर्षा–कालीन मेघानामपि सम्यक् निरूपणं करोति।अत्र कविः वर्षर्तुं वर्णयन् कथयति यत् सम्प्रति आकाशोऽयमखिलो कृष्णवर्णैः जलपरिपूर्णैः, मेघैराच्छन्न शोभतेतराम्। यथा–

**नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः।**

**क्वचित्सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः।।ऋतु.२/२।।**

वर्षाकाले मेघाः जलभरेण परिपूर्णत्वात् पृथिव्याः सविधे समागताः सन्ति। मेघनम्रत्वमागतमास्ते। पवनस्तान् मेघान् मन्दं मन्दं नुदति विहायसि। यथा–

**कुवलयदलनीलैरुन्नतैस्तोयनम्रै,र्मृदुपवनविधूतै र्मन्द मन्दं चलद्भिः।**

**अपहृतमिवचेतस्तोयदैःसेन्द्रचापैः, पथिकजनवधूनां तद्वियोगाकुलानाम्।।ऋतु. २/२३।।**

"जलयुक्तमेघः पर्वतावरोधे सति, जलकणानाम् आरोहावरोहयोःद्रुतप्रक्रियया शीघ्रं वर्षा भवति।।"[१]

एतत् वैज्ञानिकं तथ्यं भावात्मकः मित्रतायाः संस्पर्शदत्वा कालिदासः प्रकृतौ विहित परस्परपरोपकारः सूचयति। महाकविः वर्णयति यद् अस्मिनृतौ वर्षायाः नवीनं जलं मृत्तिका मिश्रितत्वात् धूसरितवर्णं सन् कीटधूलितृणादिभिः युक्तं तेनैवप्रकारेण वक्रगत्या प्रवहति, येनप्रकारेण सर्पो वक्रगत्या प्रसर्पति। यथा–

विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद्वक्र गतिप्रसर्पितम्।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम्।।[२]

(अ) वर्षर्तौ वानस्पतिकचेतना–

अस्मिनृतौ हरितवर्णैः तृणांकुरैः पृथिवी तथैव भाति, यथा सम्पूर्णभूमौ नीलमणीराजयः देदीप्यमानाः स्युः। इन्द्रगोपकैः परिपूर्णा पृथिवी तथैव भाति यथा शुक्लेतरत्नभूषिता काचन् वरांगना भवति। यथा–

प्रभिन्नवैदूर्यनिभैस्तृणांकुरैः समाचिता प्रोत्थितकन्दलीदलैः।
विभातिशुक्लेतररत्नभूषिता वरांगनेव क्षितिरिन्द्रगोपकैः।।[३]

अत्र वरांगनया सह साम्यवर्णनात् उपमालंकारः। अस्मिन् प्रकृतिचित्रणे अलौकिकतायाऽनुभवो भवति।

वर्षर्तौ साम्प्रतं वनानि कम्पयन् वायुर्वाति। तेषां पुष्पाणां सम्बन्धेन, जलपूर्णमेघानां सम्पर्केण च शैत्यगुणसम्पन्नः सन् समेषां जनानां मनस्सु औत्सुक्यमुद्भावयति । यथा–

कदम्बसर्जार्जुनकेतकीवनं विकम्पयंस्तत्कुसुमाधिवासितः।
ससीकराम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम्।।ऋतु. २/१७।।

---

१. मौसम विज्ञान पृ.३६३. बनर्जी एवं उपाध्याय, २. ऋतुसंहार –२/१३, ३. – २/५,

वर्षाकालीनवृक्षपादपादीनां वर्णनं यत् कालिदासेन कृतं तत् वनस्पतिशास्त्रीय दृष्ट्या सुसङ्गतोऽस्ति। यथा वर्षर्तौ वृक्षपादपादीनामुपरि स्नेहं प्रदर्शयन् सुन्दर्य· स्व सिरसि पुष्पनिर्मिता माला विभ्रति कर्णयोश्चार्जुनवृक्षमञ्जरीनिर्मिता नवतंसकाश्च धारयन्ति। यथा–

मालाकदम्बनवकेसरकेतकीभि रायोजिताः शिरसि बिभ्रति योषितोऽद्य।

कर्णान्तरेषु ककुभद्रममञ्जरीभिरिच्छानुकूलरचितानवतंसकाश्च ।।[१]

(ब) वर्षर्तौ जीवजन्तुविषयकपरिचिन्तनम्–

वनप्रान्ते कोमलतृणाङ्कुरान् चरन्तः चञ्चलनेत्राश्च मृगाः, वानराः, भेकानाञ्चोल्लेखो कविना सूक्ष्मपर्यावरणीय दृष्ट्या कृतमस्ति। यथा –

तृणोत्करैरुद्गतकोमलांकुरैःर्विचित्रनीलैर्हरिणीमुखक्षतैः।

वनानि बैन्ध्यानि हरन्ति मानसं विभुषितान्युद्गतपल्लवैर्द्रुमैः।।

अन्यच्च– बहुगुणरमणीयः कामिनी चित्तहारी,तरुविटपलतानां बान्धवो निर्विकारः।

जलदसमय एषः प्राणिनां प्राणभूतो दिशतु तव हितानि प्रायशो वाञ्छितानि।।[२]

जन्तुशास्त्रीय यथार्थनिरुपणे कविकालिदासः ख्यातिमापन्नोऽस्ति साहित्यजगति। वर्षर्तौ कामोन्मादिताः मयूराः मेघं दृष्ट्वा नृत्यन् प्रसन्नतां प्रदर्शन्ति।

सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः।

प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः।।[३]

वर्षाकाले मयूर्याः साकं संजिगिमिषु मयुराः नर्तनोत्सुकाः सन् स्व वर्हभारं प्रसारयन्ति, मयूर्याः मुखचुम्बनञ्च कुर्वन्ति। अत एव मयुरेषु महति उत्सुकताऽवलोक्यते।

---

१. ऋतुसंहार – २/२१, २. – २/८,२९, ३. –२/१६

अस्मिन् श्लोके–

सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकीर्णविस्तीर्ण कलापशोभितम्।

ससंभ्रमालिङ्गनचुम्बनाकुलं प्रवृत्तनृत्यं कुलमद्य बर्हिणाम्।।ऋतु.२/६।।

जलपरिपूर्णमेघं तृषाकुलः चातकसमुहः जलं याचते। ऋतुसंहारस्य वर्षावर्णनं भारतीयऋतुचक्रे वर्षर्तोः पर्यावरणीयप्रभावं महत्वञ्च प्रतिपादयति। उष्णकटिबन्धः वर्षाजलवायुयुक्तौ भारतीयभूभागे वर्षर्तोः सुखदः, प्रशमनकारी प्रकृतेः चित्रणं सर्वथा स्वाभाविकोऽस्ति। अयं कालः अनेक गुणसमन्वितो वर्तते।

स्वाभाविकरूपेणायं वृक्षादिनां, स्थावराणां बान्धवो वर्तते, जलप्रदानेन तेषां प्राणस्य पोषकत्वात्। पानीयप्रदायकत्वादेवायं कालः समेषां प्राणिनां प्राणप्रदो विद्यते। अत सर्वतोभावेन सर्वजीवानां हितकारी वर्तते। वर्षया पृथिव्यां जीवन–जलं प्राप्तं भवति। वर्षया अन्नम्, वनस्पतिः, भोजनम्, शाकाहारी, मांसाहारी एवं रीत्या या भोजनशृङ्खला प्रचलति तत्र वृष्टिरेव मूलकारणं विद्यते। धनधान्यमयः भौतिकोन्नतिः रमणीकताजन्यमानसिकोल्लासप्रदाता वर्षाकालः समेषां प्राणीनां मनोऽभिलाष पूर्णयति। वनस्पतिः, प्राणीसमुदायः तथा मानव जात्यर्थं वर्षाकालस्योपदेयताऽसंदिग्धोऽस्ति।

उपरोक्त कथनानुसारेण वक्तुं शक्यते यत् उष्णकटिबन्ध–ऋतु–जलवायु प्रदेशीयभूमेः वर्षाकालीन परितन्त्रं ज्ञायते। कालिदासस्य संश्लिष्टशैली एकस्मिन्नेवपद्ये ऋतुपर्यावरणस्य समग्रतत्वस्य समावेशे सक्षमा–अस्ति। अस्मिन् श्लोके–

वहन्ति वर्षन्ति नदन्ति भान्ति व्यायन्ति नृत्यन्ति समाश्रमयन्ति।

नद्योः घनाः मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः।।[१]

## (३) पर्यावरणदृष्टिकोणे शरदृतुर्परिचिन्तनम्।

यदा सूर्यः कन्यातुलाराश्योपरि परिभ्रमणं करोति, तदा शरदर्तुः भवति। ज्योतिषशास्त्रे–यथा–

१. ऋतुसंहार –२/१९,

"कन्यायाञ्च तुलायाञ्च शरदृतुरुदाहृतः।" बालबोधज्योतिषसारसंग्रहः, पृष्ठ–३

अर्थात् आश्विन–कार्तिकमासयोः शरदृतुर्भवति। ऋतुसंहारस्य तृतीयसर्गे कालिदासेन शरत्कालीनप्राकृतिकपर्यावरणस्य सूक्ष्मनिरूपणं सफलता पूर्वके कृतमस्ति। शरत्कालस्य स्वाभाविकं वर्णनमुपस्थापयन् वक्ति यत् सम्प्रति वायुः विकसितानां कुमुदपुष्पाणां सम्पर्कात् शैत्यमावहति। सर्वाः दिशाः मेघरहिताः सत्यः मनोज्ञतां गताः, जलेषु क्वापि कालुष्यं न विलोक्यते, क्वापि पंको न दृश्यते भूमौ। आकाशे चन्द्रज्योत्स्ना स्वच्छा विकीर्णा च वर्तते। ताराश्च तत्र शोभन्ते। यथा– अस्मिन् श्लोके–

**शरदि कुमुदसङ्गाद्वायवो वान्ति शीता विगतजलदवृन्दा दिग्विभागा मनोज्ञाः।**

**विगतकलुषमम्भः श्यानपङ्का धरित्री विमलकिरणचन्द्रं व्योमताराविचित्रम्।।ऋतु.३/२२।।**

प्रकृत्याः शोभाधायकतत्वानि विनिर्मितानि सन्ति। काशविकासएवास्यः वस्त्रम्, विकसितानि कमलान्येवास्याः शरद्वधोः मनोज्ञं मुखमण्डलम्। उत्कटहंसस्वनमेवास्याः नूपुररवः, तस्याः आपक्वाशालिरेव रूचिरं कृशं गात्रं, तथाविधेयं शरदवधूरतीव रमणीया वर्तते। तस्याऽऽगमने सति धरा–रात्रि–सरिता–सरोवर–वनोपवनादिषु सर्वत्र श्वेतिमाप्तः प्रसारं भवति। यथा–

**काशैर्महीशिशिरदीधितिना रजन्यो, हंसैर्जलानि सरिता कुमुदैः सरांशि।**

**सप्तच्छदैः कुसुमभारनतै र्वनन्ताः, शुक्लीकृतान्युपवनानि च तालतीभिः।।**[1]

शरदि नीले आकाशे धवलवर्णाः वायुना प्रेयमाणाः शतशोमेघाः धावन्ति। एतेषां शोभा अतीव कमनीया वर्तते। आकाशे धावमानाः ते आकाशाभिधस्य राज्ञः चमरवद् आभान्ति। इमे मेघखण्डाः रजतशंखमृणालादिवदतीव देदीप्यमानाः सन्ति। प्रतीयते यत् एभिः मेघखण्डचामरैः राजा आकाश उपसेव्येत। यथा–

**व्योमाक्वचिद्रजतशङ्खमृणालगौरैस्त्यक्ताम्बुभिलघुतया शतशः प्रयातैः।**

**संलक्ष्यते पवनवेग चलैः पयोदै राजेवचामरवरैरुपजीव्यमानः।।**[2]

इमे धवलवर्णाः भाररहितत्वाद् धावमानाः भूमितले श्वेततन्तव इव सुशोभिताः

---

१. ऋतुसंहार –३/२,　　२. – ३/४,

दृश्यन्ते। तेषाम् असंख्य चमररुपे वर्णन कालिदासस्य मेघविषयक सूक्ष्मज्ञानं प्रतियते। रजन्यां स्वच्छमेघविहीनः प्रकाशमानचन्द्रः ताराणां शरत्कालीन विशिष्टशोभा वर्णयन् कविः प्रतिदिनं वर्धमाना रजन्याः वैज्ञानिक तथ्यस्योल्लेखं करोति। यथा–

**तारागणप्रवाभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्क वक्त्रा।**

**ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिंप्रयात्यनुदिनं प्रमदेव बाला।।ऋतु.३/७।।**

शारदीयरात्रौ चन्द्रस्तु निर्मलो भवति, तस्य चन्द्रिकाऽतीव प्रह्लादिका भवति। प्रातःकाले तृणानामुपरि तुषारस्य विन्दवः लग्नाः भवन्ति। यथा–

**कह्लारपद्मकुमुदानि मुहुर्विधुन्वन्, तत्संगमादधिकशीतलतामुपेतः।**

**उत्कण्ठयत्यतितरां पवनः प्रभाते पत्रान्तलग्नतुहिनाम्बुविधूयमानः।।ऋतु.३/१५।।**

शरदृतौ प्रातःकाले सरसः शोभातीव रमणीया भवति। मन्दसुशीतलवायोः वर्णनं कुर्वन् कविः कथयति यत् अस्मिन् ऋतौ वायुःफलभरेण नम्रतान् गतान् क्षेत्रस्थान् शालीनाकम्पयति। सर्वत्र वृक्षाः कुसुमिताः सन्ति।कुसुमभारनम्रान् वृक्षान् वायुरयंकम्पयति। इदानीं पंकजवनं विकसितं जातम्। तत्र विद्यमानां कमलिनीमयं विधुन्वति स्व वेगेन। यथा–

**आकम्पयन्फलभरा नतशालीजालानानर्तयस्तरुवरान्कुसुमावनम्रान्।**

**उतफुल्लपङ्जवनान्नलिनीं विधुन्वन्यूनां मनश्चलयतिप्रसभंनभस्वान्।।ऋतु.३/१०।।**

सरोवरेषु लघ्वी वीचीनां माला निर्माणकर्तुः प्रातःकालीन पवनस्य चित्रणं, कल्हार –पद्म–कुमुदसम्पकैः शीतलकृतः वायोः वर्णनं कालिदासस्य पर्यावरणीय सूक्ष्म यथार्थाश्रयी दृष्टेरनुत्तममुदाहरणंप्रस्तौति।

## (अ) शरदृतौ वानस्पतिक समृद्धिः।

शारदीयवानस्पतिकसमृद्धिवेलायां वने सप्तच्छदपुष्पाणि विकसन्ति। उपवनेषु च मालतिपुष्पं विकसितं विलोक्यते। यथा–

काशैर्महीशिशिरदीधितिनारजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि।

सप्तच्छदैः कुसुमभारनतैर्वनन्ताः शुक्लीकृतान्युपवनानि च मालतिभिः।।[१]

कमलकुमुदमध्ये भिन्नता प्रदर्शयन् स्वालङ्कारिकभाषया कविः वदति यत् प्राकृतानि सर्वाण्येव वस्तूनि सुखमयानि दुःखमयानि च भवन्ति। एक एव शरदः प्रातःकालः पद्मानां विकासकः कुमुदानां संकोचको भवति। सूर्यः उदेति प्रातःकालेचन्द्रस्चास्तमेति। अस्मिन् श्लोके –

दिवसकरमयूखैर्बोध्यमानंप्रभाते वरयुवतिमुखाभं पंकजं जृम्भतेद्य।

कुमुदमपि गतेस्तं लीयते चन्द्रबिम्बे हरतिमिववधूनां प्रोषितेषु प्रियेषु।।[२]

मन्दपवनैः सञ्चालित सुकुमारपुष्पगुच्छकोमलकिसलयानां वर्णनं तथ्यपूर्णमस्ति। बन्धुजीवे अधररुचिरशोभां बहुलता भवति। रूपकालङ्कारे प्रकृतिसौन्दर्यं कविः वर्णयन् कथयति–

श्यामालताः कुसुमभारनतप्रबालाः स्त्रीणांहरन्ति धृतभूषण बाहुकान्तिम्।

दन्तावभासविशदस्मितचन्द्रकान्तिं,कङ्केलिपुष्परुचिरा नवमालती च ।।ऋतु.३/१८।।

शरदृतौ विविधपुष्पलतादीनां वर्णनैः सह खाद्यान्न पादपानां वर्णनमपि प्राप्यते। मानवप्रयावरणे अस्य वनस्पतेः महत्वम् अधिकं वर्तते, यतः भोजन श्रृङ्खलान्तर्गतमानवः मुख्यतया अन्नोपरि निर्भरोऽस्ति।

## (ब) शरदृतौ जीव–जन्तुविषयकपरिचिन्तनम्।

महाकविः कालिदासः शरदृतौ उपवनानां शोभां वर्णयन् उपवनानां सविधे उपविष्टाः मृग्यः, ग्रामसीमान्तेस्थितगोसमुहानाञ्च वर्णनं करोति। यथा–

शेफालिका कुसुमगन्धमनोहराणि, स्वस्थस्थिताण्डजकुलप्रतिनादितानि।

पर्यन्तसंस्थितमृगीनयनोत्पलानि,प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम्।।

---

१. ऋतुसंहार –३/२, २. – ३/२५

सम्पन्नशालिनिचयावृतभूतलानि स्वस्थस्थितप्रचुरगोकुलशोभितानि।

हंसैः ससारसकुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति नृणां प्रमोदम्।।[१]

शरदृतौ पक्षीवर्गे सर्वाधिकः हंसस्य उल्लेखो वर्तते। हंसानां अनेकशः वर्णनेन तेषां बहुलता दृश्यते। सरोवरे हंसमिथुनस्य विचरणेन सह सरितां जलेषु धमलतमाः हंसाः क्रीडन्ति। हंसेभ्यः सरोवरपेक्षया नदीषु विचरणमधिकं रोचते। साम्प्रतं कारण्डवाख्याः पक्षिणः जलेषु चञ्चुप्रहारं कुर्वन्ति।कादम्बसारसेत्यादिकापक्षिणः नद्यास्तटं सेवन्ते । यथा—

कारण्डवाननविघट्टितवीचिमालाः,कादम्बसारसचयाकुलतीरदेशाः।

कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोरुणितास्तटिन्यः।।ऋतु.३/८।।

"काराण्डवाख्य जलपक्षी उड्डयने अधिककुशलो भवति,अतः जले निवसति, तस्य चञ्चुः सदा जले निमग्नो भवति।।"[२]

महाकविः कालिदासस्य शरदवर्णनप्रसङ्गे, पर्यावरणतत्वानाम् एकत्रवर्णनेन शरत्कालीनविविधपरितन्त्राणां ज्ञानं भवति। एकस्मिन् पद्ये परितन्त्रीय व्यापकतायाः निरुपणस्योदाहरणानि ऋतुसंहारे शरद् वर्णने अनेकशः प्राप्यन्ते। यथा— चन्द्रकिरणैः,हंसैःनद्यः, कुमुदैः सरोवराणि, पुष्पितसप्तच्छदैः वनानि, मालतिभिः उपवनानि, एतेषाम् एकस्मिन् श्लोके वर्णनेन पर्यावरणस्य विविधघटकानां परस्परसाम्यतामुपस्थापयति। (ऋतु.३/२) एवंरित्या वायु—जल—पृथिवी—दिक्—व्योम— चन्द्रतारकादीनाञ्च शरत्कालीनस्वरुपस्य एकस्मिन् पद्ये समावेशेन कवेः काव्यप्रतिभायाः दर्शनं भवतीति।

## (४)पर्यावरणदृष्टिकोणे हेमन्तर्तुपरिचिन्तनम्।

ज्योतिषशास्त्राऽनुसारेण यदा सुर्यः वृश्चिक—धनराश्योपरि परिभ्रमति तदा हेमन्तर्तुः भवति। **"हेमवन्तो वृश्चिकद्वन्दे।।" बालबोधज्योतिषसारसंग्रहः** उद्धृतः —

महाकविः कालिदासो वर्णयति यदस्मिनृतौ गोधूमेत्यादिकानि—सस्यानि अङ्कुरितानि भवन्ति। अत एवास्य रम्यता जायते। शालयोऽपि परिपक्वाः सञ्जाताः। तुषारपतनेन कमलपुष्पाणि सरस्सु नावल्योक्यन्ते। अस्मिन् श्लोके—

१. ऋतुसंहार —३/१४,१६,

२. कालिदास के पक्षी पृ.१६८—हरिदत्त वेदालंकारः,

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्र परिपक्वशालिः।

विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम्।।ऋतु.४/१।।

तृणाग्रेषु लग्नानां तुषारकणानां प्रातः काले पतनशोभां दृष्ट्वा कविः उत्प्रेक्षते यत् हेमन्तर्तौ अश्रुकणा एव तृणाग्रेषु लग्नाः तुषारकणाः प्रातः दृश्यन्ते। यथा–

तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः।।ऋतु.४/७।।

शीतकालीनरात्रिषु प्रातः उषासमयात् प्रागेव तुषारपतनसम्भावना सर्वाधिको भवति। प्रातः सूर्योदये सूर्यकिरणाः तुषारस्योपरि आपतन्ति, तैरुष्माप्राप्य तुषारकणाः विन्दुरुपेण पतन्ति। हेमन्तऋतौ तुषारपातवर्णनं कविः अस्य सर्गस्य प्रथमान्तिमश्लकयोः करोति। अन्तिम श्लोके यथा–

**बहुगुणरमणीयो योषितां चित्तहारी परिणतबहुशालि व्याकुलग्रामसीमः।**

**सततमति मनोज्ञः क्रौञ्चमालापरीतः प्रदिशतु हिमयुक्तः कालः एषः सुखं वः।।ऋतु.४/१९।।[१]**

शैत्याधिक्येन पीतवर्णायाः पियुङ्गुलतायाः वर्णनं कुर्वन् कविः वक्ति येन प्रकारेण काचन प्रोषितपतिका प्रियतमवियोगकृशा पीतवर्णतां याति, तेनैवप्रकारेणेयं लताऽपि पीतता गतेवाभातीति। यथा–

**पाकं ब्रजन्तीहिमजात शीतैराधूयमाना सततं मरुद्भिः।**

**प्रिये प्रियङ्गु प्रियविप्रयुक्ता विपाण्डुतां याति विलसनीव।।[१]**

शीतरात्रौ भूतलीयतापमानः शून्यप्रयन्तं समागच्छति, तदा तुषारकणाः पादपोपरि स्थिरीभूय पादपान् हानिर्प्रापयन्ति। यथा– "Frost can destroy coffee plantations"[२]

हेमन्तर्तौ हीमशीतलवायुप्रवाहः प्रवहति। जनाः शैत्यात् शरीररक्षणार्थं औंर्णवस्त्रं धारयन्ति।

## (अ)हेमन्तर्तौ वनस्पतिवर्णनम्।

अस्मिन् ऋतौ सीमान्तराणि वीक्ष्य जनानामन्तःकरणम् उत्सुकं भवति। तानि च

१.ऋतुसंहार –४/१९, २.'social science' page-117, 8th class(G.S.T.B.)

सीमान्तराणि शालिसमुदायैः परिपूर्णानि सन्ति। यथा–

**प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथ विभूषितानि।**

**मनोहर कौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः।।ऋतु.४/८।।**

परितः प्रचूरधान्यव्याप्तग्रामसीमायारपि वर्णनं प्राप्यते। ग्रीष्मर्तौ बीजवपनं कृत्वा हेमन्तर्तौ क्षेत्रात् धान्य स्वीकरणमस्य तात्पर्योऽस्ति। "शस्य" कथनेन भिन्न–भिन्न प्रकाराणाम् अन्नानां ज्ञानं न भवति, अपितु धान्यानां चतुर्षु रुपेषु शस्य क्षेत्रे विद्यमान धान्यस्य नामोऽस्ति। यथा–

**शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते।**

**निस्तुषं तण्डुलः प्रोक्तः स्विन्नमन्नमुदाहृतम्।। (शब्दार्थ कस्तुभतः)**

## (ब) हेमन्तर्तौ जीव–जन्तुवर्णनम्।

कालिदासः हेमन्तर्तोः सरसं प्राकृतिकं जीव–जन्तूनां नैसर्गिकशोभाविशेषं वर्णयन् वक्ति यत् साम्प्रतं पद्मानि तु सरस्सु नावलोक्यन्ते, किन्तु नीलोत्पलानामयं विकासकालो वर्तते। इदानीं जलपक्षिणः सरस्सु कलरवं कुर्वन्ति। सरसां जलानि शीतलानि च सन्ति। यथा–

**प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि।**

**प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम्।।ऋतु.४/९।।**

हेमन्तकाले सीमान्तप्रदेशे कौञ्चपक्षीणां कलरवध्वनिः श्रुयते। यद्यपि हेमन्तवर्णनप्रसङ्गे कालिदासेन मानवीयकामचेष्टाया श्रृङ्गारिकवर्णनं कृतमस्ति, तथापि प्राकृतिकपर्यावरणस्य संक्षिप्तचित्रणे सूक्ष्मताया वर्णनमपि विद्यते। कविवर्णनानुसारेण हेमन्तकालीन परितन्त्रे ग्राम्यपर्यावरणं साकारचित्रितं प्रतीयते।।

## (५) पर्यावरणदृष्ट्या शिशिरवर्णम्।

ज्योतिषशास्त्रानुसारेण यदा सूर्यः मकर–कुम्भरास्योपरि परिभ्रमति तदा शिशिरर्तुः भवति। यथा –

'शिशिरो मृगकुम्भयोः'[1]

अस्मिनृतौ सर्वत्र शालिसमुह एवावलोक्यते। स्थाने–स्थाने उपविष्टाः क्रौञ्चपक्षिणः कलरवं कुर्वन्ति, अत एवायं प्रमदाजनभ्योऽपि प्रियकालः समागतो वर्तते। यथा–

**प्ररुढशालीक्षु चयावृताक्षिति क्वचित्स्थितक्रौञ्च निनादराजितम्।**

**प्रकामकामं प्रमदाजनप्रियं वरोरुकालं शिशिराह्वयम् शृणु।।ऋतु.५/१।।**

शिशिरर्तौ तुषारपात शीतलवायुः, चन्द्रकिरणैः शिशरीकृतरात्रयः, असह्य शीतात् रक्षणार्थं पिहितगवाक्षं, भवनम्, अग्निः, सूर्यरश्मयः, गुरूणिवस्त्राणि, यूवतयश्च साम्प्रतिकाले जनेभ्यः सेव्यतां गताः सन्ति। एतेषां समेषां वस्तूनां शिशिरे औष्ण्यप्रदत्वात्। यथा–

**निरूद्धवातायनमन्दिरोदरं, हुताशनो भानुमतो गभस्तयः।**

**गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति कालेऽत्र जनस्य सेव्यताम्।।**[2]

शिशिरकालीनरात्रौ भूमितलस्य उष्णता न्यूना भवति। इदानीं रात्रयः तुषारसमुहपातेन– अतीवशीतला भवन्ति। तासां शैत्यं वर्धते। अत एव स्वच्छाकाशे तारागणस्य विपाण्डुता विज्ञानसम्मतं तथ्यंवर्तते। अस्मिन् श्लोके–

**तुषारसङ्घात निपातशीतलाः शशाङ्कभाभिः शिशिरकृताः पुनः।**

**विपाण्डुतारागण जिह्मभूषिताः जनस्य सेव्या न भवन्ति रात्रयः।।**[3]

अतिशैत्यप्रकोके सत्यपि उन्नतशालीक्षुभिराच्छन्नधरा, क्रौञ्चपक्षीनां कलरवध्वनिः, ईक्षु–गुड निर्मित मिष्ठान्नं शीतकाले स्वास्थ्यकरं भवति। अस्मिन् सर्गे प्रकृतिचित्रणमधिकं नास्ति। अस्मिनृतौ कालिदासेन मानवस्य कामभावनामेवलक्षीकृत्य वर्णनं कृतमस्तीति।

## (६) पर्यावरणदृष्ट्या वसन्तर्तोः परिचिन्तनम्।

यदा सूर्यः ज्योतिषशास्त्रानुसारेण मीनराश्योपरि परिभ्रमति तदा वसन्तर्तुर्भवति। यथा–

---

१. बालबोध ज्योतिषसार संग्रहः पृ.–३, २. ऋतुसंहार –५/२, ३. –५/४

**"मीन मेषगते सूर्ये वसन्तः परिकीर्तितः।।"[१]**

वसन्तर्तोः वर्णनं कुर्वन् कविः कथयति यत् अस्य योद्धुः चुताङ्कुरा एव बाणाः, भ्रमणानां पंक्तिरेव प्रत्यञ्चा, ताभि. सुसज्जित् वसन्तः योद्धारूपे भवति। यथा–

**प्रफुल्लचूताङ्कुरतीक्ष्णसायकोः द्विरेफमाला विलसद्धनुर्गुणः।**

**मनांसि भेत्तुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागत प्रिये।।[२]**

ऋतुराजवसन्तस्य प्रभावेण वाप्याः जलानां कामिनीनां मणिखचितानां मेखलानां, ज्योत्स्नायाः, कामिनीनां मञ्जरीसमन्वितानाम् आम्रवृक्षाणाञ्च शोभातिशयं जायते। अर्थात् प्रकृत्यः सर्वे प्राणिनञ्च सौभाग्यसम्पन्नाः भवन्ति। यथा–

**वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम्।**

**चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः।।[३]**

वसन्ते समागते सति वृक्षाः विकसिताः भवन्ति, कमलानि विकसितानि सरस्सु शोभन्ते। सुगन्धिर्वाति वायुः, सायंकालः सुखप्रदः आभाति। दिवसाः प्रकृत्या रमणीयाः जायन्ते। तद्यथा–

**द्रुमाः सुपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः।**

**सुखाः प्रदोषा दिवसाश्च रम्याः सर्वं प्रिये चारुतरं वसन्ते।।[४]**

महाकविः कालिदासाय प्रकृतिः सदा रम्याऽस्ति,किन्तु वसन्ते समागते अस्या शोभा द्विगुणा भवति। अस्मिनृतौ रक्तपुष्पैः अवनतैः पलाशवृक्षाः पलाशवनैः परिपूर्णाः एषा पृथिवी किंशुकरक्तपुष्पपतनात् रक्तांशुकाया नववध्वाः साम्यं धत्ते। अस्मिन् श्लोके–

**आदीप्तवह्निसदृशैर्मरुतावधूतैः, सर्वत्र किंशुकवनैः कुसुमावनम्रैः।**

**सद्यो वसन्तसमयेन हि समाचितेयं रक्तांशुनववधूरिव भाति भूमिः।।ऋतु.६/२१।।**

अत्र वसन्तस्य सौन्दर्यवर्णनप्रसंगे कविः प्रकृतौ मानवीकरणं कुर्वन्नवलोक्यते। तद्यथा–

---

१. बालबोधज्योतिषसारसंग्रहः, पृष्ठ–३, २. ऋतुसंहार–६/१, ३. –६/४, ४. –६/२

पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः।
कूजद् द्विरेफोऽप्ययमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु।।[१]

पिकभ्रमरादौ चुम्बनचाटुकरणादिव्यापाराणामारोपः सहृदयजनानां कृते परमह्लादक आकर्षकश्च प्रतीयते। ऋतुकालमस्य महत्वपूर्णः नियामककारकः तापक्रमो भवति। वसन्तर्तौ सूर्यः विषुवत् रेखायां सरलो भूत्वा द्योतते। अतः सम्प्रति भारते समशीतोष्णता अनुभूयते। एतद् विषयं कालिदासः काव्यरुपेण प्रस्तौति।–'सुखाः प्रदोषाः दिवसाश्च रम्याः।'(ऋतु.६/२) वसन्ते सायंकालः सुखदः दिनश्च रमणीयो भवति, यतः सायंकाले शीतकालस्यैव शैत्यता, तथा दिवसे ग्रीष्मकालस्यैव उष्णता नैव भवति। वसन्ते सर्वत्र लता विटपादीन् कम्पयन् आम्रमञ्जरीभिः सुगन्धितः कोकिलवार्णी चतुर्दिक् प्रसारयन् एतादृशो विहारमुक्तवायोः वर्णनं कृतवान्नस्ति। यथा–

ताम्रप्रवालास्तवकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखा।
कुर्वन्ति कामं पवनावधूताः पर्युतसुकं मानसमङ्गनानाम्।।[२]

मत्तद्विरेफपरिचुम्बितचारुपुष्पाः मन्दानिलाकुलितनम्र मृदुप्रवालाः।
कुर्वन्ति कामि मनसां सहसोत्सुकत्वं बालातिमुक्त लतिकाः समवेक्ष्यमाणाः।।ऋतु.६/१९।।

वसन्तकाले प्रारम्भतः एव उत्तरपश्चिमाभ्यामागन्ता शीतवायुः समाप्तो भवति। सुखदा दक्षिणपश्चिमी वायुः प्रवाहितो भवति। इति।

## (अ) वसन्तर्तौ वानस्पतिकचेतना।

महाकविः कुसुममासं वनस्पतीनां पुष्पकालरूपे निरूपयति। यथा–

रक्ताशोकविकल्पिताधरमधुर्मत्तद्विरेफस्वनः,
कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्माननः।
चूतामोदसुगन्धिमन्दपवनःशृङ्गारदीक्षागुरूः,
कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम्।।६/३६।।

---

१..ऋतुसंहार –६/१६, २. –६/१७

आम्रवृक्षाणां कुसमान्वित–पल्लवितप्रसङ्गयोः सर्वाधिकम् उल्लेखयन् वसन्तस्य प्रतीकरूपे तम् महाकविः कालिदासः प्रस्तौतिः। यथा–

**"चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः।" ऋतु.६/४।।**

आम्रस्य वृक्षेषु नवकिसलयाः– उद्भूतास्सन्ति, तेषां गुच्छेन विनताः, मञ्जरीसनाथिताः पवनकम्पिताश्च आम्रवृक्षाः सुशोभन्ते। यथा–

**ताम्र प्रवालास्तवकावनम्राश्चूतद्रुमाः पुष्पित चारुशारदा।।ऋतु.६/१७।।**

वसन्तवर्णन प्रसङ्गे कालिदासेन आम्रवृक्ष सहकाराणाम् उल्लेखो वारंवारं कृतमस्ति। अनेन प्रकृतिप्रिय कालिदासस्य आम्रवृक्षोपरि अधिकाऽनुरागः दृश्यते। यथा–

**आकम्पयन् कुसुमिताः सहकारशाखाः विस्तारकपरभृतस्य वचांसि दिक्षु।**

**वायुर्विवाति हृदयानि हरन्नराणां नीहारपात विगमात्सुभगे वसन्ते।।**[१]

**दृष्ट्वाध्वगः कुसुमितान्सहकारवृक्षान्।।६/२८।।**[२]

**आकम्पितानि हृदयानि मनस्विनीनां वातैः प्रफुल्ल सहकारकृताधिवासैः।।**[३]

चूत–सहकारौ द्वावेव आम्रवृक्षस्य नामः स्तः। तथाऽपि द्वयोर्मध्ये सूक्ष्म भेदोऽस्ति। यथा–

**आम्रश्चूतो रसालोऽसौ सहकारोऽति सौरभः। (अमरकोशः– २/४/३ पृष्ठ– ६८ व्याख्या. डॉ. ब्रह्मानन्द त्रिपाठी)**

(अति सुगन्धितस्याम्रस्यैकं नाम–सहकारोऽस्ति) वनेषु पलाशवृक्षाः विकसिताः सन्ति, यदा वाति वायुः तदा किंशुकस्य रक्तवर्णानि पुष्पाणि पृथिव्यां पतन्ति। पुष्पैः रचिताभूमिः, रतांशुकाया नववध्वारिव प्रतीयते। यथा– **रतांशुका नवधूरिव भाति भूमिः।।**[४]

वसन्ते समागते आम्रवृक्षास्तु मञ्जरिताः सन्ति। आम्रमञ्जरीणां सततं मदमतं द्विरेफाः चुम्बनं कुर्वन्ति मन्दं मन्दं प्रचलन् वायुः आम्रमञ्जरीं आन्दोलितां करोति। यथा–

**मत्तद्विरेफा परिचुम्बित चारुपुगपाः मन्दानिला कुलितनम्रमृदुप्रवालाः।**
**कुर्वन्ति कामिमनसां सहसोत्सुकत्वं बालातिमुक्तलतिकाःसमवेक्ष्यमाणाः।।**[५]

१.ऋतुसंहार – ६/२४, २. –६/२, ३. –६/३४, ४. – ६/२१, ५. – ६/१९,

शिरोभूषणयोग्यचम्पकपुष्पाणां, पुष्पितकमलादीनां, वसन्तकालीनपुष्पाणां विशेषतायाः वर्णनं दृष्ट्वा कालिदासस्य काव्ये नैसर्गिकचेतनायाः दर्शनं भवतीति।

### (ब) वसन्ततौ जीव–जन्तूवर्णनम्।

वसन्ततौ जीव–जन्तूनां वर्णन प्रसङ्गे मुख्य सप्तविशेषणान्–उपस्थापयति। तद्यथा–

**रक्ताशोकविकल्पिताधरमधुर्मन्तद्विरेफस्वनः,**

**कुन्दापीड विशुद्धदन्तनिकरः प्रोत्फुल्लपद्मानन:।**

**चूतामोद सुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः,**

**कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम्।।**[१]

वसन्तस्याधरमाधुर्यम् रक्ताशोकमाधुर्यमेव, मदमत्तभ्रमरगुञ्जनमेवास्य स्वन, कुन्दपंक्तिरेवास्य दन्तसमूहः, विकसितानिकमलान्येवास्य मुखमण्डलम्, सहकारमञ्जरीसौगन्धा मिश्रितो वायुरेवास्य वायुः,शृङ्गाररसस्यायं दीक्षादानपटुः किञ्वायं कामप्रियो वर्तते। एतादृशोऽयमृतुः सर्वेषां वो मङ्गलं प्रदिशतु। अन्यच्च–

**मलयपवनविद्धः कोकिलालापरम्यः**

**सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः।**

**विविध मधुपयूथैर्वेष्ट्यमानः समन्ताद्**

**भवतु तव वसन्तः श्रेष्ठकालः सुखायः।।**[२]

वसन्ततौ सूर्यः भरणी नक्षेत्रे समागच्छति, तदा सर्वत्र मधुवर्षा भवति। अर्थात् प्रत्येकपदार्थे माधुर्यवृद्धिर्भवति। अत एव वसन्तं मधुमासोऽपि कथ्यसे। पुष्पेषु रसाधिक्यात् भ्रमरादिजन्तवः फलेषु मधुरसाधिक्यात् कोकिलादिपक्षी समुहश्च विशेषतया सक्रियाः भवन्ति। वसन्ते उन्मत्तमधुरगुञ्जायमानाः भ्रमरपंक्तिः कामदेवस्य धनुषप्रत्यञ्चा प्रतीयते। महाकविः कालिदासकृतवसन्तवर्णने ३८ पद्यानि सन्ति। तथाऽपि वसन्तः विशिष्टप्रतीकानाम् आम्र–भ्रमर–कोकिलादीनामेव प्रामुख्यात् वसन्तकालीन परितन्त्रे पर्यावरणीय समग्रवस्तूनां

१.ऋतुसंहार – ६/३६, २. –६/३७,

समावेशो नास्ति। पर्यावरणीय तत्वानामेकपद्येएकत्रचित्रणस्य प्रस्तुतिकरणं कालिदासस्य विशेषता वर्तते। तद्यथा–

**आकम्पयन् कुसुमिताः सहकारशाखाः विस्तारयन् परभृतस्यवचांसि दिक्षु।**

**वायुर्विवाति ह्वदयानि हरन्नराणां नीहारपातविगमात्सुभगे वसन्ते।।**[1]

अन्यच्च– **नानामतोज्ञकुसुमद्रुम भूषितान्तान् ह्वष्टान्यपुष्पनिनदाकुलसानुदेशान्।**

**शैलेजालपरिणद्ध शिलातलन्तान् दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः।।**[2]

## (७) पर्यावरणदृष्ट्या ऋतुसंहारस्य वैशिष्ट्यम्।

यद्यपि ऋतुसंहारनीतिकाव्यं महाकविः कालिदासस्य प्रथमा रचना वर्तते, तथापि पर्यावरणदृष्ट्या प्रौढतापूर्णोऽस्ति। सृष्टिचक्रस्य मूलं जलवायुः अथवा सुनिश्चितऋतुचक्रमैव विद्यते । येन स्थानविशेषस्य सम्पूर्ण पर्यावरणं प्रभावितो भवति ।एतत् ऋतुकाव्यं ऋतूनां पर्यावरणीय महत्वस्य परिचायकोऽस्ति। ऋतुसंहारस्य ऋतुवर्णनं जलवायविक–वानस्पतिक–जीवशास्त्रीय यथातथ्यताभिः परिपूर्णोऽस्ति। महाकविः कालिदासस्य एषा रचना भारतीय ऋतुचक्रस्य महत्वम् उद्बोधनकर्तृ संस्कृतसाहित्यस्याऽसाधारणकृतिरस्ति। अस्मिन् काव्ये वर्णित षड्तवः भारतीय सम्वत्सरेणेव भवन्ति। प्रत्येकवस्तूनां स्व भिन्न–भिन्न रुपं वर्णञ्च तेषां परिचायकोऽस्ति। शरद्–हेमन्त–शिशिरतुर्षु शालीक्षुपूर्ण ग्रामप्रदेशस्य वर्णनेन भारतस्य कृषिप्रधानता सर्वसम्मतैः सिद्धो भवति।

सुसंसकृतनागरीकाणाम् आमोदप्रमोदमयानिचित्राणि, वा ग्राम्यपरिवेशस्य स्वस्थ–शुद्धतायाः चित्रम्, ऋतुकाव्ये वर्णित पृथक्–पृथक् ऋतुभिः साकं निर्विरोधताकवेः कवेः काव्यरचनासु प्रौढतायाः परिचायकोऽस्ति। दिङ्मात्र–उदाहरणानि यथा–

**निशाःशशांकक्षतनीलराजयः कवचिद्विचित्रं जलयन्त्रमन्दिरम्।**

**मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम्।।–ग्रीष्म ऋतुवर्णनम्–१/२।।**

---

१.ऋतुसंहार – ६/२४, २. – ६/२७

**शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः।**

**स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं सञ्जनयन्ति कामिनाम्।।– वर्षर्तोः समृद्धि वर्णनम्–२/१८।।**

**काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या।**

**आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या।।–शरदृतोः वैशिष्ट्यम्–३/१।।**

एवं प्रकारेण अन्य ऋतुनामपि वैशिष्ट्यम् तस्य यथार्थचित्रणम् अस्मिन् काव्ये दृश्यते। प्रत्येक सर्गस्य प्रथमान्तिमपद्योः ऋतोः स्वागत–सत्कारस्य भावना तथा मंगलकामनाञ्च कवेरुदात्त भावना दरीदृश्यते। तद्यथा–

**विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी,विकसितनवकाशश्वेतवासो वसाना।**

**कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं,प्रतिदिशतुशरद्वश्चेतसः प्रीतिमग्ग्राम्।।**[१]

ऋतुसंहारे वर्णित वातावरणे सुखदवायुः, सरोवरे निर्मलजलम्, क्षेत्रेषु प्रचुरधान्यम्, वनोपवने सुविकसित कुसुमानि, वनस्पतयः स्वस्थनिर्भयपशुपक्षिणः, नगरग्रामादिषु सानन्दजनाश्च सर्वे पर्यावरणसन्तुलनं सार्थकं कुर्वन्ति। भारतीय सम्वत्सरे मासगणनायाः प्रारम्भः मधु–माधव अथवा चैत्र–वैशाखमासाभ्यां भवति।

**मधुस्तथा माधवसंज्ञकश्च शुक्रः शुचिश्चाथ नभो नभस्यः।**

**तथेष उर्जश्च सहाः सहस्यस्तपस्तपस्यश्च यथाक्रमेण।।**[२]

तथा ऋतुचक्रस्य प्रारम्भोऽपि वसन्तादेव भवति। महाकविः कालिदासेन गीष्मस्य सर्वप्रथमवर्णनम्–कुर्वन् वसन्तम्–अन्तिमर्तुरुपेण चित्रणं कृतमस्ति। ऋत्वाऽऽधारितकाव्ये कथात्मकक्रमस्य, निर्विघ्नं सुखान्तप्रस्तुतिकरणार्थं मानवीय कार्यक्षमतायाः ऋत्वानुसारेणऽध्ययनदृष्ट्या ऋतुक्रमस्यायं संयोजनम्–अर्थपुर्णम् विद्यते। ग्रीष्मतः ऋतुवर्णनं प्रारम्भ्य कविः ऋतूनां मानवोपरि प्रभावस्य ज्ञानं सर्वान्कारयति। यत् पर्यावरणविज्ञानस्यान्तसम्बन्धात्मकः स्वरुपस्याऽनुकूलो वर्तते। हेमन्त शिशिरयो

---

१. ऋतुसंहार –२/२८,

२. सरलजन्मपत्रिविज्ञानं, पृ. ११

प्रकृतिचित्रणाऽपेक्षा मानवीय कामचेष्टानामधिकवर्णनेनोपरोक्त तथ्यस्य पुष्टीर्भवति।

ऋतुसंहारकाव्यं पर्यावरणघटकेषु कालक्रमस्य प्रभावोऽनेकशः दर्शयति। यथा एकस्मिन् स्थाने वनम्, उपवनम्, गामसीमान्तादीनां भिन्न–भिन्न ऋतुषु भिन्न स्वरुपाणि दर्शनियानि सन्ति। यानि वनानि ग्रीष्मर्तौ दावाग्निना प्रज्वलितानि भवन्ति, तानि वनानि, वर्षर्तौ साम्प्रतं वर्षाजलनिषेकात् विगतसंतापाः सञ्जाताः। तद्यथा–

**मुदितइवकदम्बै जतिपुष्पैः समन्तात् पवनचलितशाखैः शाखिभिर्नृत्यतीव।**

**हसितमिवविधत्तेसूचभिः केतकीनां, नवसलिलनिषेकाच्छिन्नतापो वसन्तः।।ऋतु. २/२४।।**

ऋतुसंहारकाव्यान्तर्गत ऋतुवर्णनस्य प्रभावः महाकविः कालिदासस्य अन्यासु रचनासु अपि दृश्यते।

- कुमारसम्भवे वसन्तवर्णनम्–

**चूताङ्कुरास्वाद कषायण्ठः पुंस्कोकिलो यन्मधुरं चूकूज।**
**मनस्विनी मानवविघातदक्षं तदेव जातं वचनं स्मरस्य।।[१]**

- मेघदूते वर्षावर्णनम्–

**प्रत्यासन्ने नभसि दयिता जीवितालम्बनार्थो, जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।**

**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै, प्रीतः प्रीतिप्रमुखवचनं स्वागतं याजहार।।[२]**

- अभिज्ञानशाकुन्तले ग्रीष्मर्तु वर्णनम्–

**गाहन्तां महिषा निपान सलिलं शृङ्गैर्मुहुस्ताडितम्,**

**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**

**विश्रब्धं कियतां वराहपतिभि मुर्स्ताक्षतिःपल्वलै,**

**विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः।।[३]**

- रघुवंशे वसन्तवर्णनम्–

१.कुमारसम्भव–३/३२, २.मेघदूत–पू.मे. ४, ३.अभिज्ञानशाकुन्तल–२/६,

दक्षिणेन पवनेन सम्भृतं प्रेक्ष्य चूतकुसुमं सपल्लवम्।

अन्बनैषुरवधूत विग्रहास्तं दुरुत्सह वियोगमङ्गना।।[१]

महाकविः कालिदासेन ऋतुसंहारकाव्ये द्विधा पर्यावरणस्यचित्रणं कृतमस्ति। १. वन्य पर्यावरणम्। २-मानव सहित पर्यावरणम्।

एवं द्विविध पर्यावरणे निहितः पर्यावरणीयदृष्टिः कालिदास्स्य काव्यरचनायां व्याप्तपर्यावरणीय चेतना परितः दृश्यते।

- **निष्कर्षः—**

संस्कृतसाहित्यस्य आदिऋतुकाव्य ऋतुसंहारे भारतीय षड् ऋतून् वर्ण्यविषयं विधाय महाकविः भारतीय सम्वत्सरस्य विशिष्टता भारतीयजलवायोः विविधता तथा ऋतुनां पर्यावरणीय महत्वस्य परिचयो दत्तवान्नस्ति।कालिदासस्य ऋतुविषयकज्ञानं वैदिकऋतुविज्ञाने निर्भरोऽस्ति। यत्र सम्बत्सरस्य कालस्वरुपं, षड्तुविभाजनम्, तथा च सम्वत्सरयज्ञस्य सम्यग् निरुपणमस्ति। ऋतुसंहारे दावाग्नि सदृशमहत्वपूर्ण पर्यावरणकारकग्रीष्मस्य वर्णनम्, विभिन्न ऋतुनाम्, विशिष्टवनस्पतेः विकास.विनासयोः निरुपणम्, मेघानांप्रकाराः, जलवायुविज्ञानविषयकतथ्यानां प्रकटीकरणम्, जीव—जन्तूनाम्सहजाचरणस्य चित्रणञ्च प्राप्यते। काव्यात्मकशैल्यां पर्यावरणस्य सर्वे अजैविकतत्वानाम्, ऋत्वानुसारवर्णनं तथा जैविकतत्वानां जैविककारकाणाञ्च विशेषता, पारस्परिकनिर्भरतायाः बहुविधप्रौस्तुत्यात् ऋतुकालीनपरितन्त्रस्य सूक्ष्मसंकेतः प्राप्यते। ग्रीष्मतः वसन्तपर्यन्तम् ऋतूनां पर्यावरणीय प्रभावस्य यथार्थपूर्णविश्लेषणं प्राप्यते। ऋतुसंहारकाव्यं महाकविः कालिदासस्यकलात्मकशैली तथा पर्यावरणीय दृष्टेविकासस्याऽधारभूमिरस्तीति।।

---

१.रघुवंश—१९/४३

# (५) अभिज्ञानशाकुन्तलनाटके पर्यावरणम्।।

सर्वे जानन्त्येव तत्वविदः सहृदया विपश्चितो यदिह संस्कृतसाहित्यसंसदि कविकुलकमलदिवाकरकालिदासस्य लेखनी विगलितमभिज्ञानशाकुन्तलं नाम नाटककाव्येषु प्रथमां भूमिकामुपस्थापयतीति। रुपकमिदं महाकविकालिदासस्य प्रौढे वयसि विरचिता श्रेष्ठाकृतिररस्ति। अभिज्ञानशाकुन्तलस्य सर्वनाटिकातिशायित्वं तस्य सर्वभाषास्वनुवादैः सहृदयसमाजे साधारणै प्रचारै र्बहुविधटीकानिर्माणैश्च विस्पष्टमेव। तथा च प्रसिद्धेयं सूक्तिः—

**काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला।**
**तत्राप्ङ्कस्तुरीयस्तु तत्र श्लोकचतुष्टयम्।।अभि. भूमिका तः।।**

युरोपीय महाकवयोऽपि शाकुन्तलस्यानुवादमात्रमवलोक्यबाढं विमुग्धाः सन्तस्तत् प्रशंसायां गाथां रचयन्ति स्म।

- **अभिज्ञानशाकुन्तलस्योपजीव्य विचारः।**

अस्य विश्वप्रसिद्धनाटकस्य कथायाः उपजीव्यम् किम् वर्तते। पद्मपुराणम् महाभारतं वा यतः अनयोरुभयोरेव प्राचीनसाहित्ययोः दुष्यन्तशकुन्तलयोः प्रणयस्यकथोपवर्णिता वर्तते।

तत्र पद्मपुराणे दुष्यन्तशकुन्तलयोः या कथा समुपलभ्यते तस्याम् कथायां तथाविधं प्राचीनत्वं न हि आयातियादृशो प्राचीनता महाभारतीयायां दुष्यन्तशकुन्तलयोः प्रणय कथायामास्ते।

महाभारतस्य कथा नीरसा वर्तते। पद्मपुराणस्य कथायांतु महाकविः कालिदासस्यापि प्रभावः आयाति, अत एव महाभारतीयैव कथा अभिज्ञानशाकुन्तलस्योपजीव्यं भूतेति विद्वद्भिरनुमीयते।

सर्वाधिकप्रसिद्धे सर्वश्रेष्ठे चास्मिन्नभिज्ञानशाकुन्तलनाटके सप्ताङ्काः सन्ति। तत्र सप्तस्वप्यङ्केषु कण्वाश्रमे शकुन्तलादुष्यन्तयोर्गान्धर्वविवाहः, आश्रमरक्षणार्थं राज्ञोनिवासस् तत्रप्रेमक्रीडा, परावृते राजनि तीर्थयात्रातः समायाते च महर्षिकण्वे शकुन्तलाविदापनं, हस्तिनापुरे दुष्यन्तभवनं गतायाः शकुन्तलायाः दुर्वाससः शापवशात्प्रत्याख्यानं, तस्यामारीचाश्रमे मात्रा सार्द्धं निवासः, अंगुलीयकभिज्ञानाद्राज्ञः पुनः स्मृति लाभः इन्द्रसाहाय्यार्थं स्वर्लोकगमनं चेति क्रमशः षष्ठांकपर्यवसाना कथा। अथ सप्तामाङ्के स्वर्गीयदैत्यविजयानन्तरं भुवमानीयमानस्य राज्ञो मातलिर्नाम इन्द्रसारथिः नानारमणीय स्थानानि तानि दर्शयति,

यत्प्रसङ्गात् स महर्षे मारीचस्य तपोवनमागतस्तत्र शिशुमेकं सिंहकिशोरेण सह मनोविनोदयन्तं पश्यति। नचिराच्च स तस्यैवात्मन सुतः इत्यधिगच्छति। ततस्तपवोनवासिवेषं दधाना शकुन्तलापि तत्रायाति, ससुतौ च द्वौ महर्षि मारीचमुपतिष्ठेते, तदनुमत्या च सपुत्रां शकुन्तलामादाय नृपः सहर्ष राजधानीं प्रत्यागच्छतीति। नाटकीयकथा समाप्तिं गच्छति।

कालिदासस्य प्रकृतिपरायणतायाः चरमोत्कर्षः, संयमशीलतायाः दीव्यता तथा तपोवनसंस्कृतेः, आदर्शः 'अभिज्ञानशाकुन्तलम्' नाटकस्य कणे कणे व्याप्तो दृश्यते। एतादृशी विशेषता कालिदासस्य सर्वातिशायीकृतिः विषये आश्चर्यं नास्ति। एषा कृतिः पर्यावरण विवेचन दृष्ट्याऽपि सर्वथा प्रमाणिकी समाजस्य मार्गद्रष्टा च सिध्यति।

'अभिज्ञानशाकुन्तलम्' नाटके कविः कण्वाश्रम–हस्तिनापुर–मारीचाश्रमान् रङ्गभूमिः कृतवान्नस्ति। अस्मिन् प्राकृतिक परिवेशे–अवस्थितौ कण्वमारीचाश्रमयोर्वर्णनं प्रमुखं स्तः। एतेषां स्थलानां भौगोलिकस्थितिः, स्थानीय–भू–आकृतिः जलवायविक परिस्थितिः, वनस्पतिः, जीव–जन्तवः, तत्रस्थ मानवसमुदायस्य सूक्ष्म निरूपणं तथा पर्यावरणकारकाणम्–अन्तः क्रियात्मकसम्बन्धानां संश्लिष्टचित्रणं कुर्वन् निर्दिष्टस्थलानां सम्पूर्णभूदृश्यं काव्यपटले अङ्कितं कृतमस्तीति।

## (१) पर्यावरणपरिप्रेक्ष्ये कण्वाश्रमस्य महत्त्वम्।

### (क) कण्वाश्रमस्य भौगोलिकस्थितिः।

'अभिज्ञानशाकुन्तलम्' नाटकस्य मुख्यघटनास्थलं कण्वाश्रमः, मालिनीनद्यास्तटे हिमालयस्योपत्यकायां विराजते। यथा– वैखानसः राजानं प्रति कथयति– **'एषः खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते।'**[१]

अन्यच्च–

**"एते खलु हिमगिरेरूपत्यकारण्यवासिनः कण्वस्य संन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः।" (अभि. ५/पृ. २२७)**

मालिन्यास्तटे विस्तृतभूमिः, उभयभागे विस्तृता हिमालयस्य निम्नपर्वतश्रेणी द्वयेव अस्य तपोवनस्य पृष्ठभूम्याः रूपे दृश्यते। यथा–

**"कार्या सैकतलीनहंसमिथुना स्त्रोतोवहा मालिनी पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।"(अभि.६/१७)**

अर्थात्– अत्र चित्रे किमपरं लिखितव्यमवशिष्टमिति विदूषकप्रश्नमुत्तरयता राज्ञा दुष्यन्तेन प्रोच्यते मित्र माधव्य ! हिमालयप्रान्तवाहिन्या मालिन्याः तटेः बालुकामयप्रदेशे सुखोपविष्टहरिणयूथाः हिमालयस्य पवित्राः निम्नभूमयः लेखयितव्या इति। मालिनी नद्याः तटे सुशोभितौ हंसमिथुनौ, हिमगिरेः पादश्रेण्यामुपविष्ठाः मृगयूथैः अनुमीयते यत् तपोवनमयी

१. अभिज्ञानशाकुन्तल –१/पृ. २२,

कण्वाश्रमः मालिनीनद्याः समीपे अस्ति।

मालिनीनदी आश्रमतः सन्निकटैव अस्ति, कारणञ्च शकुन्तला मध्यान्हे स्व सखिभिः सह वेतस–परिक्षिप्त–लतामण्डपे उपविष्य समयं यापयति। यथा–

**"इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति।"अभि. ३/पृ.१२६।।**[२]

अस्या पाण्डु सिकतामयतटप्रदेशः नदीजलस्यकणं वहन् मन्दसञ्चारीपवनः सर्वान् सुखयति। यथा–

**शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्। अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः।।अभि. ३/४।।**

**अभ्युन्नतापुरस्तादवगाढा जघनगौरवात् पश्चात्। द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा।।(३/५)**

अर्थात्– वेतसलतामण्डपे शकुन्तलासद्भावं समर्थयन् राजाब्रवीतिनूनमस्मिन् लतामण्डपे शकुन्तला सद्य एव प्रविष्टेत्यनुमीयते, यतो हि श्वेतसिकताकणमयेऽस्य द्वारभागे अविकला पदपङ्क्तिर्दृश्यते या च अङ्गुल्यादिभागे समुन्नता पार्ष्णिप्रदेशे च गभीराऽस्ति। तस्मात्तर्कये यत्तस्या एव इदं पादादि चिह्नम्।

महाभारताऽनुसारेण हिमालयस्य समीपे, मालिनी नद्याः तीरे विद्यमानकण्वाश्रमः विविधजन्तुभिः समाकीर्णः सघनवनैः परिवेष्टितः नयनारम्य आसीत्। यथा–

**"प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम्।।"**[१]

'कण्वाश्रमस्य स्थितिविषये कतिपयाः विद्वांसः हरिद्वारतः ४५कि. मि. पश्चिमे चूका (सरयूनद्या सहायका नदी) नद्याः तटे स्वीकुर्वन्ति।' [२]

कण्वाश्रमस्य निकटस्थवनप्रदेशः समपिषमास्ति। अस्मिन् गद्ये यथा–**"आयुष्मन् उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः। तेन मृग एषः विप्रकृष्टान्तर संवृतः। संप्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति।" (अभि १./ पृ. १५)**

अन्यच्च–

**उतपक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं, बाष्पं कुरु स्थिरतया विहतानुबन्धम्।**
**अस्मिन्नलक्षितनतोन्नतभूमि भागे, मार्गे पदानि खलु ते विषमी भवन्ति।।**[३]

यात्राकाले स्नेहनुबन्धमवलोक्य रुदत्याः शकुन्तलायाः अश्रुमोचनं न

१. महाभारत आदि पर्व –७२/१०, २. कालिदास का भारत –१/पृ. ३५, ३. अभिज्ञानशाकुन्तल –४/१४

केवलममङ्गलमेवापितु मार्गगमनविरोधित्याशङ्क्य महर्षि कण्वः शकुन्तलां वदति– वत्से धैर्यमवलम्व्य वाष्पं रोधय मार्गस्योच्चावचत्वात्ते पादौ इतस्ततः स्खलतः। अत आश्रमस्नेहवैक्लव्यजन्यदुःखेन प्रसरन्तमश्रुप्रवाहमवरोधय येन गन्तव्यमार्गस्ते स्पष्टं दृश्येत। हिमालयस्य निम्नक्षेत्रे मालिनीनद्याः भिन्ना गिरीनदी अप्यस्ति। यथा अभिज्ञानशाकुन्तलस्य द्वितीयोऽङ्कस्य प्रारम्भे विदूषकः प्रातः काले मृगयासंभावनया शीघ्रं तत्समीपमुपसर्पन् मार्गमध्ये स्वकीयां दुरवस्थां स्वयं विमृशति।–

**"पत्रसंकर कषायाणि कटूनि गिरीनदी जलानि पीयन्ते।"–अभि.२/पृ.५५।।**

अर्थात् दलानां मिश्रणेन तुवराणि स्वादरहितानि उष्णकटुकानि पर्वतसरितां शैलातपवन्ती तोयानि आस्वाद्यन्ते। अनेन स्पष्टं भवति यत् मालिनीनद्या अपरैका पर्वतीया नद्यस्ति। तपोवनपरिसरे ऋषीणाम् अभिषेकक्रियार्थ पावनसरोवराः सन्ति।

## (ख) कण्वाश्रमस्य जलवायुवर्णनम्।

प्रचुरजलसंसाधनसम्पन्नोऽयं पर्वतीयपादप्रदेशे ग्रीष्मकाले आतपो भवति। मृगयाशीलनृपेण सह परिभ्रमन् श्रान्तः विदूषकः स्वयं कथयति यत् ग्रीष्मर्तौ वने मध्याह्नकाले उष्णता असह्यो भवति। तृषा शान्त्यर्थं उष्णजलम् आस्वाद्यन्ते। यथा–

**"अयं मृगः अयं वराहः अयं शार्दूल इति मध्यदिनेऽपि ग्रीष्मे विरलपादपच्छायासु वनराजिषु आहिण्ड्य पत्रसंकरकषायविरसानि उष्णकटुकानि पीयन्ते गिरीनदी सलिलानि।।"अभि.३/पृ. ७६।।**

तपोवनस्य समीपस्थक्षेत्रं मालिनीनद्याः तरङ्गैः शीतलवायुस्पर्शसुखं तस्य प्रदेशस्य वातसुभगत्वं प्रकटयति। यथा–

**शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।**
**अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः।।अभि.३/४।।**

अस्मिन् श्लोके दुष्यन्तः तस्य वनभागस्य सुभगत्वम् प्रतिपादयन् वक्ति यत् वायुरत्र मालिनीतरङ्गशीकरसंयुक्तत्वात् शीतलः कमलसुगन्धिसंयुक्तश्च कामं कामिजनैः सेवनीयः इति। प्रखरसूर्याऽऽतपात् वृक्ष–पादपादिनां संरक्षणार्थं तापसीकन्याः ग्रीष्माऽऽतपकष्टमविगण्य वृक्षपादपादिषु जलसेचनं कुर्वन्ति। यथा–**"अये एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैबलिपादपेभ्यः पयो दातुमित एवाभिवर्तते।।"(अभि.१/पृ.३०)**

अनेन स्पष्टं भवति यत् तदानिन्तनकाले जनाः पर्यावरणसंरक्षणे जागरुकाः आसन्, यथा ऋषिकन्यकाऽपि वृक्ष–पादपसंरक्षणे दत्तचित्ता सन्ति।

यद्यपि अत्र कविना वर्षर्तोल्लेखः नैव कृतं तथाऽपि वनस्पतीनां समृद्धिं दृष्ट्वा वृष्टेरनुमानो भवति। आधुनिक भौगोलिकानामनुसारेण अस्मिन् क्षेत्रे उष्णकटिबन्धी(monsoon) प्रकारस्य जलवायुर्भवतीति।

## (ग) कण्वाश्रमे वनस्पतिसंरक्षणम्।

महाकविः कालिदासः कण्वाश्रमे ग्रीष्मकालाऽनुरूपः आम्रफलयुक्तवृक्षस्य वर्णनं करोति, वृक्षं नवमालिकालता आश्रयार्थं स्वीकरोति। यथा– अनसूया शकुन्तलामाह –

**"हला शकुन्तले! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका एनां विस्मृतासि।" (अभि.१/पृ. ३८)**

अत्र नवमालिकायां वधूत्वारोपः सहकारे वरत्वं भावीशकुन्तलादुष्यन्तयोः गान्धर्वविवाहस्य सूचना विद्यते। अस्मिन् प्रसङ्गे कविः "आश्रमम्" सहकारः कथितवान्नस्ति, परन्तु शकुन्तला पतिगृहप्रयाणसमये तस्मै "चूतः" शब्दस्य प्रयोग कृतवान् अस्ति। यथा–

**संकल्पितं प्रथममेव मया तवार्थे भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।**
**चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च संप्रति वीतचिन्तः।।अभि.४/१२।।**

अत्र महर्षि कण्वः शकुन्तलायाः तपोवनविरहकातरताम् अपाकरिष्यन् स्वस्य कृतकृत्यतां प्रतिपादयन् कथयति– शकुन्तले किमेवं कातरा असि, मया त्वदर्थं चिन्तितं त्रिभुवनभरणपोषणसमर्थं भर्तारं मम प्रयायमन्तरैव स्व सौभाग्यादि पुण्यैस्त्वं प्राप्तवती। इयं वनज्योत्स्ना च सहकारेण संगता। अतस्तव अस्याश्च विषये अहम् इदानीं चिन्तारहितो जातः। अत्र आम्रः, चूतः, तथा सहकारे कविं जातीयभेद प्रदर्शनम् अभिप्रेतो नास्ति। यतः ग्रीष्मर्तौ "सहकार–स्वयंवर वधू" वनज्योत्स्ना कालान्तरे "चूतेन संश्रितवती" कथ्यते। अतः चूतसहकारौ एकवृक्षस्य द्वे अवस्थे स्तः। यथा–अमरकोशे–

**" आम्रश्चूत रसालोऽसौ सहकारोऽति सौरभः।।" अमरकोष.२/४/३३।।**

सहकारम् आम्रस्य अतिसुरभितः एको भेदो कथ्यते। आम्रचूतरेव ग्रीष्मकाले सरससूगन्धितफलयुक्तो भूत्वा सहकारे परिणमति। कालिदासेन अन्यत्राऽपि तस्मिन् सहकारविषये वर्णितमस्ति। यथा कुमारसम्भवे–

"अप्रतर्क्य विधियोगनिर्मितामाम्रतेव सहकारतां ययौ।।"[1]

कण्वाश्रमे कर्णाभूषणप्रयुक्तमाने सुकुमारकेसरपुष्पैः सज्जिताः शिरीषवृक्षाः सन्ति, येषां पुष्पाणां भ्रमराऽपि रसपानं कुर्वन्ति। यथा–

**ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि।**

**अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि।।**[2]

अर्थात्– ग्लानिशंकया दयां कुर्वन्त्यः युवतयः शिरीषसुमनानि कर्णभूषणे कुर्वन्ति। अत्र प्रकृतिं प्रति दयाभावना प्रकृत्याः हानिः न स्यात् एतादृशी उच्चभावना दृश्यते। वायु–प्रकम्पितपल्लवाङ्गुलिभिः शकुन्तलाम् आश्वयतीति उत्प्रेक्षा वर्तते। यथा शकुन्तला वदति–

**"एष वातेति पल्लवाङ्गुलिभिस्त्वरयतीव मां केसरवृक्षकः।।"अभि. १/ पृ. ३६।।**

अत्र शकुन्तला पुरोवर्ती पवनप्रेरिताः पल्लवाङ्गुलिरुपसंज्ञया पयोदानाय शीघं माम् आह्वयतीति विचार्य तं प्रति अतिप्रेमवशात् जलसेचनेन वर्धयामि इत्युक्त्वा केशरान्तिकं गच्छति। पुष्पान्वितः केशरवृक्षोऽस्ति।यस्य पुष्पमाला बहुसमयपर्यन्तं सुगन्धितो तिष्ठति। यथा–शकुन्तलायाः प्रस्थानकौतुकनिवर्तने त्वरमाणाऽनसूयाप्रियम्वदां **वदति। "तेन ह्येतस्मिश्चूतशाखावलम्बिते नालिकेलसमुद्गक एतस्मिन् कालान्तरक्षमा निक्षिप्ता मया केसरमालिका।।"अभि. ४/ पृ.१८१।।**

अर्थात्– वकुलमाला पर्युषितापि सौरभं न मुञ्चतीति प्रसिद्धिः। अतः कालिदासेनापि तस्यकृते 'कालान्तरात्मा' शब्दस्य प्रयोगः कृतमस्ति। अभिज्ञानशाकुन्तले वनस्पतेः संरक्षणस्य अनेकानि उदात्तोदाहरणानि सन्ति, दिङ्मात्रमुदाहरणं दीयतेऽत्र पतिगृहप्रस्थातुमुद्यतां शकुन्तलामुद्दिश्य कुलपतिः कण्वः तपोवनवृक्षान् सम्बोधयन् कथयति– यत् भवन्तः सर्वे शकुन्तलाम् आशिर्वचनं दत्वा पतिगृहगमनाय
स्वस्नेहाऽनुरूपं चानुमोदनं क्रियताम्। तद्यथा–

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।अभि.४/८।।**

अर्थात्– तपोवनवृक्षाः येयं भवद्भगिनी शकुन्तला युष्मासु स्नेहाधिक्यात् युष्मद्भ्यो

१. कुमारसम्भव –८/७८,    २. अभिज्ञानशाकुन्तल –१/४

जलदानात् पूर्वंजलपानं न करोति स्म। पुष्पपल्लवालंकारप्रियापि युष्मासु स्नेहाधिरेकात् एकमपि पल्लवम् न त्रोटयति स्म। प्रत्यहं पयोदानावसरे भवतो निरीक्षमाणायाः यस्याः प्रथमपुष्पोदये महानुत्सवो भवति स्म, सेयं युष्माकं मम च लालनीया वत्सा शकुन्तला पतिगृहं गच्छति। अतः सर्वैर्युष्माभिः सम्भूय अनुमन्यताम्।

प्रच्छायशीतलसप्तपर्णानि सन्ति, यस्य छायासु मान्याऽतिथीनाम् अभ्यर्थनापूर्वकं विष्टरं दीयते। यथा–प्रथमोऽङ्के प्रियम्वदा राजानं वदति। –"**तेन ह्यस्या प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः।" १/ पृ. ४७।।**[१]

कण्वाश्रमपरिसरे कुरबकोप्यस्ति, यस्य शाखायां शकुन्तलायाः उत्तरीयं संसक्तं भवति। तद्यथा–" **अनसूये अभिनवकूशसूच्या परिक्षतं मे चरणम्, कुरबकशाखापरिलग्नं मे वल्कलम्। तावत् परिपालयतां मां यावदेतन् मोचयामि।" अभि.१/पृ. ७३।।**

अत्र मानव–प्रकृत्योरनुरागस्य कविः कालिदासेन पराकाष्ठा प्रदर्शिता। शकुन्तला दर्शनौत्सुक्यात् व्याजमुत्पाद्य प्रियं दुष्यन्तं भूयो भूयः पश्यति। अत्र लताकुञ्जानि सन्ति। अतिमुक्तलतामाधवीलतयोः ग्रीष्मकालीनपुष्पोद्भवस्य सङ्केतोऽपि मिलति। यथा–

**"अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे संनिहतया तथा भवितव्यम्।"**[२]

**"पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी"।।अभि.३/७।।**

ग्रीष्मे नवकुसुमयौवना सफलं सहकारस्य स्वयम्वरवधू नवमालिका लताप्यस्ति, या दुष्यन्तेन सह शकुन्तलायाः साक्षात्कारः कारयितुं भ्रमराः प्रेष्य नायक–नायिकयोः(मानव–प्रकृत्योः)मेलनं कारयति।यथा–

**"अम्भो सलिलसेकसंभ्रमोद्गतो नवमालिकामुज्झित्वावदनं मे मधुकरोऽभि वर्तते।"१/४२।।**

**"न एष धृष्टो विरमति। अन्यतो गमिष्यामि। कथमितोऽप्यागच्छति। हलापरित्रायेथां मामनेन दुर्विनीतेन दुष्टमधुकरेण परिभूयमानाम्।"१/४४।।**

अस्मिन् अवसरे अनसूया प्रियम्वदे ईषद्हास्येन सह कथयतः। तद्यथा–

**"का वयं परित्रातुम्। दुष्यन्दमाकन्द। राजरक्षितव्यानि तपोवनानि नाम।" अभि.१/४४।।**

अभयप्रदानव्याजेन आसां पुरोगमनस्यायमुचितःकालः मत्वा राजा दुष्यन्तः स्वभवतः सरला मुनिकन्यकाः पीडयितुं कोऽयं दुर्विनीतः पृथिवीशाशके मयि सति कुदृष्टिं कर्तुं प्रयतते इति कथयित्वा प्रकटो भवति।

हस्तिनापुरप्रस्थानसमये शाखाबाहुभिरालिङ्गनकर्तृ शकुन्तलायाः निष्कलंकप्रणयसाक्षी तस्या वनज्योत्स्नानाम्नी लता भगिनी वर्तते। लतामुपेत्यालिङ्ग्य शकुन्तला वदति।–"**वनज्योत्स्ने चूतसंगतापि मां प्रत्यालिङ्गेतोगताभि शाखावाहाभिः। अद्य**

१. अभिज्ञानशाकुन्तल–१/ पृ. ४७, २. –३/१२७

प्रभृति दूरपरिवर्तिनी भविष्यामि।४/पृ.१९८।।

शकुन्तला पतिगृहगमनसमये प्रियम्वदां कथयति— सखि आश्रमे स्नेहातिशयवशात् तं त्यक्तुं न प्रभवामीति, तदा प्रियम्वदा वदति— न तु भवति एव, परन्तु आश्रमवासिनजनस्यापि समानैव दशा दृश्यते। यथा—

**उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रुणीव लताः।।अभि.४/११।।**

अर्थात् त्वद्वियोगेन इमे आश्रमस्था सर्वे जीवा अपि कातरा दृश्यन्ते। अवलोकय त्वया दत्ताभिःनीवारममुष्मिभिःसंवर्ध्दिताहरिण्यः चर्वितमपि दर्भाङ्कुरग्रासं मुखादुद्गिरन्त्यः मौनमासते। निजनर्तनैः त्वां विनोदन्तो मयूरा अपि विस्मृतनृत्याः स्तब्धाः सन्ति, इमा पुरोवर्तिन्यो लता अपि गलज्जीर्णपर्णा व्याजेन विरहदुःखजन्यं वाष्पं मुञ्चन्त्य इव दृश्यन्ते। तस्मात् सकलेऽपि आश्रमः त्वद् विरहवेदनया कातरो जातः।

अस्मिन् कण्वाश्रमे पुष्पलतादिभिः साकं क्षीरवृक्षोऽप्यस्ति, यस्मिन् तरुतले कुलपतिकण्वः नृपदुष्यन्ताय सन्देशं कथयति।—

**" तेन हीमां क्षीरवृक्षच्छायामाश्रयामः।" अभि.४/ पृ.२०३।।** अश्वत्थवटवृक्षौ प्रमुखपूज्यौ क्षीरवृक्षौ स्तः। अनयोः वृक्षयोः अश्वत्थः पर्णपाति वृक्षोऽस्ति, यस्य छाया संभवतः वसन्तर्तौ किञ्चित् पत्ररहिता भवति। यथा— " **अपसृतपाण्डुपत्रा."४/१२।।** परन्तु वटवृक्षः सघनछायायुक्तस्तिष्ठति। तत्र आश्रमे सघनाः वृक्षाः सन्ति, तथाऽपि कण्वः क्षीरवृक्षच्छायायाम् उपविश्य दुष्यन्ताय मुनिजनचित्तकर्तव्योपदेशप्रदानशन्देशं कथयति। वटवृक्षक्षायातले उपविश्य सन्देशकथने कदाचित् धार्मिकः आध्यात्मिकश्च पर्यावरणदृष्टयाऽधोलिखितानि कारणानि सन्ति। तद्यथा—

१. वटवृक्षः सघनछायायुक्तः क्षीरवृक्षोऽस्ति, क्षीरे पोषक तत्त्वानि सन्ति। पक्षिणः अनेकप्रदेशतः विश्वासात् तत्राऽगत्य निवयन्ति। मधुराणि वटवृक्षफलान्यपि खादन्ति, तस्मिन् वृक्षैव विष्टाकुर्वन्तिए परन्तु सो वटवृक्षः प्रसन्नतनसा योग्यनृपतुल्यं सर्वं सहते ।सर्वान् किमप्यवदन् पालयति, भवान्नपि प्रजानां पालनं करोत्वीति।

२. वटवृक्षः विश्वासस्य प्रतीकोऽस्ति, सांसारिकदाम्पत्यजीवने परस्परविश्वासस्याऽऽवश्यकता भवतीति सूचयति। श्री रामचरितमानसे श्री तुलसीदासोऽपि वटवृक्षं विश्वासस्य स्वरुपोऽस्तीति स्वीकरोति। यथा—

- **बटु विश्वास अचलनिजधरमा । तीरथराज समाज सुकरमा।। (राम. बा.का. दो.२)**

३. धार्मिकदृश्टयाऽपि महत्वं वर्तते।— श्री रामचरितमानसस्य बालकाण्डस्य मङ्गलाचरणे भक्तकविः तुलसीदासः शिवं विश्वासस्य प्रतीकं मत्वा स्तौति। यथा—

- **भवानी शङ्करौ वन्दे श्रद्धाविश्वासरुपिणौ।।— राम. बा. का.१/२।।**

४.स्वयं शिवोऽपि वटवृक्षस्य महत्वं प्रदर्शयन् तस्य तले तपस्चर्यां करोति । –यथा–

- **तहं पुनि संभु समुझिपन आपन। बैठे वटतरि करि कमलासन्।।–राम. बा.का.५८।।**

प्रयागसंगमे देव–दनुज– किन्नर–नराश्च–सर्वे अक्षयवटं स्पर्श्य धन्यतामनुभवन्ति।यथा–

- **परसि अखयवटु हरषहि गाता।।–राम. बा.का. ४४।।**

उपर्युक्तान् तथ्यान् विचार्य कुलपतिकण्वः क्षीरवृक्षच्छायानीचैरुपविश्य सन्देशं प्रेषयतीति भावः।।बकुलकेसरौ उष्णजलवायुक्षेत्रे सरलतया प्राप्य सदा हरितवृक्षौ स्तः, ययोः शुष्कपुष्पाणि अपि दीर्घकालपर्यन्तं सुगन्धमयं भूत्वा तिष्ठतः।

**"सप्तपर्णः सघनछायायुक्तः विशालवृक्षोस्ति।" (कालिदास का भारत– पृ.५८ –भगवतशरण उपाध्याय)**

तपोवने स्वस्तिवाचनम्, भूतबलौ–उपयोगिः, एवं पक्षीणां खाद्यान्नरूपे वर्णित श्यामाकादिवन्यधान्यानां वर्णनमस्ति। यथा–

➢ **श्यामाकमुष्टिपरिवर्धिततको जहाति।।**[1]

➢ **उटजद्वारविरूढं नीवारबलिं विलोकयतः।।**[2]

➢ **नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः।।**[3]

अत्र इंगुदीफलानि सुलभानि सन्ति, तेषामुपयोगः तपोवनवासिनः केशशरीरादि संशुध्द्यर्थं कुर्वन्ति। यथा–विदुषकः कथयति–

**" तेन हि लघु परित्रायतामेनां भवान्। मां कस्यापि तपस्विन इंगुदीतैलमिश्रितचिक्कणशीर्षस्य हस्ते पतिष्यति।।"**[4]

तापसजनोपयोगी इंगुदी वन्यपादपोऽस्ति, तपोवने सरलतया सुलभत्वाद् 'तापसतरुः' अपि कथ्यते।

मालिनीतटीय लताकुञ्जेषु परितः व्याप्तः वेतससमूहानां वर्णनेन अस्य वनस्पतेरुत्पत्ति नद्याः समीपे भवतीति अनुमीयते। जलीयवनस्पतिवर्णनप्रसंगे कुमुद्वती, नीलोत्पलं विहाय कमलस्यापि बहुशः वर्णनं प्राप्यते। शकुन्तलायाः श्रृंगारप्रसाधने मृणालतन्तुः मुख्यालंकारोऽस्ति। अत्र राजा दुष्यन्तः शकुन्तलायाः श्रृंगारप्रसाधनविषये विदुषकं श्रावयति। यथा–

**कृतं न कर्णार्पितबन्धनंसखे शिरीषमागण्डविलम्बिकेसरम्।**
**न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे।।अभि.६/१८।।**

अर्थात् हे मित्र मयास्मिन् शकुन्तलायाः चित्रे कर्णयोरुपरि शिरीषपुष्पस्य वृन्तं नोपन्यस्तं, यस्या किञ्जल्काः कपोलप्रदेशपर्यन्तं विलत्बमानाः कर्णयोः कपोलयोश्च

१. अभिज्ञानशाकुन्तल –४/१३, २. –४/२०, ३. – १/१४, ४. –२/पृ. १००

कामप्यपूर्वशोभां जनयन्ति, तथा पीवरयोरपि स्तनयोर्मध्ये शारदशशाङ्कधवला अतिकोमला विससूत्रमालिकापि नोपन्यस्ता, या परस्परसंलग्नयोःपीवरयोः पयोधरयोः शोभां वर्धयति। इदमेवात्र मम प्रियायाः शकुन्तलायाः प्रसाधनमवशिष्टम्।

अनेन श्लोकेन स्पष्टं भवति यत् शकुन्तला शृंगारार्थ स्नेहेन पालिताः वनस्पति–पुष्पलतादीन् एव स्वीकरोति स्म। मृणालयुक्तकमलपत्रैः व्यजनानि निर्मीयन्ते। नलिनीदलं वस्त्ररुपे धार्यन्ते, अर्थात् तपोवनवासिनः नलिनीदलनिर्मितवस्त्राणि धारयन्ति। जलपानार्थ नलिनीदलं पात्ररुपेणापि स्वीकियन्ते। राजा शकुन्तलां कथयति यथा–

**किं शीतलैः क्लमविनोदिभिराद्रवातान्,संचारयामि नलिनीदलतालवृन्तैः।।३/१८।।**

अन्यच्च –

**कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः।।३/१९।।**

अत्र प्रथमश्लोके पद्मिनीपत्रविरतव्यजनस्योल्लेखो वर्तते, द्वितीयपद्यांशे कमलिनीदलपत्रकल्पितवस्त्रस्योल्लेखोऽस्ति। उपर्युक्तकथनेन स्पष्टं भवति यत् कण्वाश्रमे शिरीषादि विविधाः पर्णपातीवृक्षाः सन्ति, येषां शुष्कपत्राणि अत्यधिकपतनात् समीपे प्रवाहिता नद्याः जलमपि कषायं भवति। विदुषकः यथा– " **ग्रीष्मे विरलपादपच्छायासु वनराजिषु आहिण्ड्य पत्र संकरकषायविरसानि उष्णकटुकानि पीयन्तेगिरिनदी सलिलानि। २/७६।।** अत्र बकुलः आम्रः वटवृक्षादि सदाहरितवृक्षाणाम् आधिक्येन तपोवनवासीनां, वनस्पतीनां संरक्षणं सम्वर्धनञ्च प्रति जागरुकता दरीदृश्यते। उपर्युक्तानुसारेण एतत् वनम् उष्णकटिबन्धी उपपर्णपाती वनं कथयितुं शक्यते।

कण्वाश्रमवासीमुनयः वनस्पतिशास्त्रमर्मज्ञारासन्, अतः इंगुदीतैलैः मृगशावकानां मुखवर्णानामुपचारः क्रियन्ते स्म। कण्वः शकुन्तलामनुसरन्तं मृगपोतकम् अवलोक्य सकरुणं तस्य प्रवृत्तिं वर्णयति–

**यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यतमुखेकुशसूचिविद्धे।**
**श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।**[1]

अर्थात् दयाद्रहृदया त्वया दर्भाङ्कुरभक्षणक्षतमुखस्य यस्य मृगशावकस्य मुखाभ्यन्तरे इंगुदीतैलं निक्षिप्य व्रणः शोषितः स्वयमत्तुमसमर्थस्य तन्मुखे मुष्टिपरिमितं श्यामकं प्रक्षिप्य पुत्रवत् पालितश्च सोऽयं मृगशिशुः त्वद्विरहदुःखितं ते वसनं न त्यजति। अन्यच्च–

आतपजन्य वेदनायानिवारणं उशीराऽनुलेपेन, तथा शीतलतादायककमलपत्र–पुष्प–दण्डादिभिः क्रियते स्म। यथा–

" **प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ती च नलिनीपत्राणिनीयन्ते।।" अभि. ३/पृ.१२**

१. अभिज्ञानशाकुन्तल –४/१३

अन्यच्च–

"हला शकुन्तले अपि सुखयति ते नलिनीपत्रवातः।।"[१]

अत्र कण्वाश्रमे सर्वसन्तापहारी यज्ञाः भवन्ति स्म। तृतीयोऽङ्के मुनीनां यज्ञशालासु सायंकालीनहोमावसरे हव्यद्रव्यगन्धमाघ्राय समागतानां राक्षसानां बद्धपंक्तिच्छाया अवलोक्य मुनयः ससंभ्रमराजानं निवेदयन्ति।

**सायंतने सवनकर्मणिसंप्रवृत्ते वेदीं हुताशनवतीं परितः प्रयस्ताः।**
**छायाश्चरन्ति बहुधा भयमादधानाः संध्यापयोदकपिशाः पिशिताशनानाम्।।**[२]

अर्थात् राजन् अस्माकं संरक्षको भवान् सन्निहित एवास्तीति मत्वा अस्माभिः सन्ध्याकालीनोहोमः समारब्धः, तत्र हुताज्यचारुगन्धमाघ्राय उपस्थिता भयंकराराक्षसाः यज्ञवेदीसमन्तात् गतागतं कुर्वप्ति। यज्ञोऽपि पर्यावरणसन्तुलने मुख्यस्थानं भजते। अतः पर्यावरणसंरक्षकाः तपस्विनः यज्ञकार्ये रताः सन्ति।

महाकविः कालिदासवर्णितकण्वाश्रमस्य वानस्पतिकचेतनायाः वर्णनप्रसंगे नवमालिकलता विशेषमहत्वं धारयति। इदं विज्ञान–सम्मततथ्यमस्ति, यत्वृक्ष–वनस्पतिषु, अन्य प्राणिनामिव शारीरिक संरचनया सह सुविकसित तन्त्रिकातन्त्रमपि भवति। अतः ते सजीवसंवेदनशीलाः सन्ति।

वनस्पतिषु सर्वाधिकज्ञानचेतना वृक्ष. वंशादीनामवलम्बनेन–उपरिगमनशीललतादिषु भवति। वैज्ञानिकैः संशोधनशालायां प्रयोगैःसिद्धं कृतमस्ति यत् लता शुष्ककाष्ठाऽवलम्बनं विहाय अन्य हरितवृक्षाऽवलम्बनं अन्वेषति। (TRUPET CREEPER; CAMPSIS) इत्याख्या लतायां दक्षिण अमेरिकादेशे प्रयोगो कृतः इति ।(प्राचीन भारत मे पर्यावरण चिन्तन पृ. ३१७)

एवंप्रकारेण लतासु चयनस्य विलक्षणतां दृष्ट्वा 'नवमालिका' सहकार–स्वयम्वरवधूकथनं कालिदासस्य वैज्ञानिकचेतनापि संकेतयति।

वनज्योत्स्ना नामाख्या नवमालिका लता शकुन्तलायाः मनोभावं ज्ञात्वा दुष्यन्तेन सह सम्मेलयितुं भ्रमणसम्प्रेषणप्रसंगः केवलं नाट्यगत कौशलमात्रं नास्ति, वस्तुतः लतायाःप्रतानेषु संवेदी– तन्त्रिका भवन्ति। ताभिः प्राप्तसंदेशानुसारेण लताः स्वगतिविधिषु निर्णयं कुर्वन्ति।

वनस्पतयः लता–वृक्षादीनां समीपे जायमान वार्तालापश्रवणसामर्थ्येन सह स्वपालनकर्ता, रक्षकाणाञ्च प्रत्यपि आत्मीयता दर्शयन्ति। अतः वनज्योत्स्नां लताभगिनिमन्यमाना प्रेम्णा सह सेचनकर्तु शकुन्तलायाः मनोकामनापूत्यर्थं लतायाः सक्रियता वैज्ञानिकदृष्ट्या तथ्यपूर्णेऽस्ति। शकुन्तलायाः शुभप्रयाणसमये भावी अनिष्टशङ्कया वनज्योत्स्नायाः वेदनानुभूतिपूर्ण–रालिङ्गनंकेवलं कल्पना नास्तीति।

१.अभिज्ञानशाकुन्तल –३/१२९, २. –३/२४

(घ) कण्वाश्रमे जीव–जन्तुसंरक्षणम् ।

हिमालयोपत्यकावर्तीकण्वाश्रमे, तत्सम्बन्धीवनप्रदेशेषु च प्राप्यमाणः जीवजन्तूनां यथार्थवर्णनं कालिदासः कृतवान्नस्ति। जीवजन्तुषु सर्वाधिकः आश्रममृगाणामुल्लेखो वर्तते। आश्रमसीमायां परिरक्षितमृगाः सर्वत्र निःशंकभावेन विचरन्ति। तद्यथा–

**कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला, भिन्नो रागः किशलयरुचामाज्यधूमोद्गमेन।**
**एते चार्वागुपवनभूविच्छिन्नदर्भाङ्कुरायां, नष्टाशंका हरिणशिशवः मन्द मन्दं चरन्ति।।**[1]

आश्रमे मृगशावकाः असावधानीवशात् तीष्णकुशांकुरैः आहताः न स्युः तदर्थं तापसकन्याः ध्यानं ददति। आश्रमस्य सन्निटकस्य पर्वतस्याऽधो भागे मृगसमूहः तिष्ठति।

**पादास्तामभितोनिषण्णहरिणा गौरीमुखो पावनाः।।**[2]

कण्वाश्रमस्य समीपे मृगया विहारी राजा दुष्यन्तः मृगान् दृष्ट्वा मृगयार्थसमुत्सुको भवति। मृगमनुसरन् राजानं दृष्ट्वा सूतः ब्रूते। आयुष्मन्–

**कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।**
**मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्।। अभि.१/६।।**

अर्थात् पुरो धावमाने चित्रांगे हरिणे भवति च लोचनं निक्षिपन् अहं मृगरुपधरं दक्षप्रजापतियज्ञमनुसरन्तं साक्षाद् धनुष्पाणिं भगवन्तं सदाशिवं तर्कयामि। निम्न श्लोके भयत्रस्तः हरिणस्य दशायाः सूक्ष्मस्वाभाविकचित्रणं करोति कालिदासः। तद्यथा– शाकुन्तले–

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः,**
**पश्चार्धेन प्रविष्टः शरपतन भयात् भूयसा पूर्वकायम्।**
**दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,**
**पश्योदग्रप्लुतत्वाद्वियतिबहुतरं स्तोकमुर्व्यांप्रयाति।।**[3]

स्व शृंगेण प्रियायाः लोचनं निघर्षन्तीं हण्यिाः चित्रणं मृगमिथुनयोः दाम्पत्यजीवनस्याऽनुपमस्नेहस्य स्वाभाविकचित्रणम् अत्र दृश्यते।–

**शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्।।६/१७।।**

ग्रीष्मतापसन्तप्तानां वन्यजन्तूनां विश्रान्तेः वर्णनं कुर्वन् कालिदासः मृगाणां यूथबद्धोभूत्वा विचरणं तथा रोमन्थनस्य यथार्थचित्रणं प्रस्तौति।–शाकुन्तले–

**गाहन्तां महिषा निपानसलिलं शृंगैर्मुहुस्ताडितं,**

**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**

---

१. अभिज्ञानशाकुन्तल – १/१५, २. –६/ १७ ३. – १/७

विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले,

विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ।।अभि.२/६ ।।

प्राक् मृगया प्रसंगेन वनकोलाहलेन विक्षुब्धा महिषा जलाशयेषु विषणैः जलोत्फालनात् दंशादीन् निवारयन्तो निःशंकं जले क्रीडन्तु। मदीयशरपातशंकया उत्प्लुत्योत्प्लुत्यपलायमानाः मृगाः छायाशीतलेषु तरुतलेषु निर्भयमवस्थिताः रोमन्थं कुर्वन्तु, सुकरा अपि खातजलेषु अवगाहमवगाहं मुस्तमूलखनने प्रवर्तन्ताम्, चिरमारोपितमौर्वीकमस्मदीयं धनुरपि गुणावरोपणात् विश्रामं लभताम्। अत्र वन्यजन्तूनां नैसर्गिक क्रियाकलापानां वर्णनमस्ति।

कण्वाश्रमपरिसरः तरु–कोटरवासी शुक–परभृत–मयूर–चक्रवाकयूगलैः तथा मालिनीसैकततटे स्थिताः हंसमिथुनादि पक्षिभिश्च सुशोभितोऽस्ति।

**"हिमालयस्य पादप्रदेशे इमे पक्षिणः सुलभाः सन्ति, तथाऽपि ग्रीष्मकाले भूभागस्य निम्नप्रदेशे चक्रवाकयुगलस्य प्रापणमसन्दिग्धं प्रतीयते।"[१] " शुकाः कुलायनिर्माणं नैव कुर्वन्ति, ते भीतिकायां वृक्षकोटरे वा निवसन्ति।" ( भारतीय पक्षी– सुरेश सिंह )** पुष्परससंग्रहणे संलग्नान् भ्रमरान् कविना महत्वं दत्तमस्ति। तापसकन्याभिः जलसेचनैर्संभ्रमितभ्रमराः नवमालिकालतेभ्यः निःश्रित्य शकुन्तला–दुष्यन्तयोः प्रथममेलनं कारयन्ति ।

**" अम्मो सलिलसेकसंभ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभि वर्तते।।"१/४२।।[२]**

वृक्ष–पुष्पबहुलाश्रमे भ्रमराधिक्यं समुचितमेवास्ति। उपरोक्त विवेचनेन स्पष्टं भवति यत् कालिदासः जीव–जन्तूनां वासस्थानैः सह तेषां नैसर्गिकगतिविधिनामपि ज्ञाताऽऽसीत्। कण्वाश्रमस्याऽखिलपर्यावरणचित्रणप्रसंगे कालिदासः तपोवनस्य पृष्ठभूमिः तथा आश्रमपरिसरस्य च संश्लिष्टनिरुपणं कृतवान्नस्ति। तपोवनस्य पृष्ठभूमौ मालिनी नद्यस्ति, यस्याः सिकतामयतटे हिमालयस्य पवित्रनिम्नपर्वताः सन्ति, यत्र हरिणाः विद्यन्ते। तत्रैव वृक्षस्यधोभागे कृष्णमृगस्य शृङ्गे स्ववामनयनां कण्डूयमाना मृग्यपि– अस्ति, तस्मिन् वृक्षे वृक्षशाखासु वल्कलवस्त्राणि लम्बितानि सन्ति। एवं प्रकारेण हिमालयस्य निम्नपर्वताः तेषां तलप्रदेशे प्रवाहिता मालिनीनद्याः सैकततटानि, हंसमृगौ, वृक्षशाखालम्बितवस्त्राण्यपि कण्वाश्रमस्य अविभाज्य अङ्गानि सन्ति। एतेषां सर्वेषां परस्परसम्बद्धता पर्यावरणदृष्ट्या

---

१. कालिदास के पक्षी– हरिदत्त वेदालंकारः, २. अभिज्ञानशाकुन्तल– १/४२

सर्वभूतहिताय च सर्वथाऽनुरुपोऽस्ति। वल्कलवस्त्राणामुपस्थितिः तपावनवासीमानवानां समीपता, तथा अस्मिन् क्षेत्रे वृक्षबाहुल्यतामपि संकेतयति।

अतो वल्कल–मृगाणामुल्लेखेन, वृक्ष–पादपतृणादि–संकुलवनप्रान्तस्य संकेतेन च कवेरपूर्वकौशलतायाः दर्शनं भवति। कृष्णमृगयुगलयोः स्नेहव्यापारः प्राणी जगति संवेगाऽनुभूतेः प्रमाणं ददाति। वल्कलरुपे मानवानां भौतिकाऽवश्यकतानां पूर्तिरपि प्रकृतिः करोति। कविः ताम् मानव– आदर्शाय, अनुकरणीयमस्तीति सर्वान् कथयितुमिच्छति। अतोऽनेन पर्यावरणसंरक्षणमस्माकंदायित्वमस्तीति सिध्यति।

## (२) पर्यावरणदृष्ट्या हस्तिनापुरस्थ प्रमदवनस्य महत्वम्।

पौरवराजदुष्यन्तस्य राजधान्यां शकुन्तलायाः प्रताख्यानं तथा दुष्यनतस्य पश्चात्तापस्य प्रसङ्गाः घटितारभूवन्। चतुर्थोऽङ्के प्रियंवदा कर्णं दत्वा वदति।–

**"अनसूये त्वरस्व, एते खलु हस्तिनापुरगामिन ऋषय आकार्यन्ते।"[१]**

कण्वाश्रमतः एषा नगरी अधिकं दूर नैवाऽस्ति, यतः आपन्नसत्वा शकुन्तला पादाभ्यां गतवती – आसीत्। "प्राचीनहस्तिनापुरं कण्वाश्रमतः ९० कि.मि.दूरं ज्ञायते।" (प्राचीन भारत में पर्यावरणचिन्तन पृ. ३२३) कण्वाश्रम–हस्तिनापुरयोर्मार्गे शक्रावतार शचीतीर्थस्योल्लेखो प्राप्यते। यथा– षष्ठोङ्के–

**"श्रुणुतेदानीम्। अहं शक्रावताराभ्यन्तरालवासी धीवरः।"[२]**

यत्र दुष्यन्तप्रदत्त अभिज्ञानमुद्रिका पुनः प्राप्ता भवति। शचीतीर्थस्य गङ्गाप्रवाहे मुद्रिकायाः शकुन्तलायाः करशाखातः स्खलनस्योल्लेखेन एतत् पवित्रस्थलं गङ्गातटे अस्तीति सिध्यति। पञ्चमोऽङ्के अङ्गुलीकशून्या अङ्गुलिं दृष्ट्वा सखेदं शकुन्तला गौतमीम् अवलोकयति। तदा गौतमी वदति **"नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमंगुलीयकम् ।"५/२५८**।। शकुन्तलायाः विस्मृतेः अपनयनानन्तरम् अनुतापमग्नदुष्यन्तः स्वसमयं प्रमदवने यापयति।

**"एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहाररमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति। तत्प्रविश्यनिषीदतु भवान्।।"[३]**

वसन्तारम्भस्य मंगलवेलायामुपवने आताम्र–हरित– पाण्डु सुगन्धमय –आम्रमञ्जरी तथा कुरबककोरकस्य वर्णनं प्राप्यते। यथा–

१. अभिज्ञानशाकुन्तल – ४/पृ. १८२, २. – ६/पृ. २८२, ३. ६/३१२,

आताम्र हरितपाण्डुर जीवीतसर्वस्व वसन्तमासस्य।

दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि।।अभि.४/१।।

SMT. HANSA MEHTA LIBRARY
THE MAHARAJA SAYAJIRAO UNIVERSITY
The M.S. University of Baroda

अर्थात् ताम्रश्यामलशुभ्रेति वर्णत्रयमिश्रितमधुमासस्य जीवनसारतमः, वसन्तश्रेयस्कर आम्रमुकुल त्वमद्य दैवात् अवलोकितोऽस्ति। भवन्तं स्वागतं व्याहरामि। पर्यावरणसन्तूलने ऋतूनामधिकं महत्वं वर्तते, अर्थात् ऋतुः मुख्यस्थानं भजति। अतोऽत्र महाकविः कालिदासः वसन्तस्यागमनसूचकं चूतकोरकं आम्रवृक्षे दृष्ट्वा दासीमाध्यमेन तस्य स्वागतंकरोति। अन्यच्च–

**चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः,**

**संनद्धं यदपि स्थितं कुरबकं तत्कोरकावस्थया।**

**कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतम्,**

**शंके संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ।।अभि.६/४।।**[१]

वसन्तागमने विरहवेदनाविगलितदुष्यन्तस्य निषेधाज्ञया ऋतूत्सवं नैव आचर्यते। वनस्पतिविकासस्य स्वर्णकालेऽपि वसन्तोत्सवनिषेधस्य राजाज्ञायाः पालनं आम्र–कुरबककलिकाः पालयन्तीति उत्प्रेक्षा वर्तते। कारणञ्च शिशिरकालापगते समुपस्थिते च वसन्तसमये चिरकालोद्गता अपि आम्रमञ्जर्यआवश्यकमपि परागयोगं न दधते, कुरबकः कलिकावस्थैव तिष्ठति, अनुरक्ताऽपि कोकिलयुवानः कण्ठाद् बहिः स्वकाकलिं न प्रकटयन्ति। इत्थमचेतनैः सचेतनैरपि महाराजस्यानुशासनं स्वीकृतं दृश्यते।

प्रस्तुतप्रसङ्गे तरूणां राजाज्ञापालनं वानस्पतिकतथ्येषु आधारितोऽस्ति। आत्मीयतया वृक्षपादाद्यपि स्व रक्षकस्य प्रसन्नतायां प्रसन्नाः, अप्रसन्नतायाम् उद्विग्नाः भवन्ति। यथा– **"वनस्पतिविज्ञः वैक्टर मतेन – प्रयोगशालायां कार्यं कुर्वन् तम् क्षतं जाते सति तेषां पादपाः शोकग्रस्ताः जाताः।" ( वैक्टर की Secretlife of plants नामक पुस्तक से संग्रहीत)**

वसन्तोत्सवेन वानस्पतिकवैभवस्य स्वागतकर्ता दुष्यन्तस्य अप्रसन्नतायाम् उपवनस्य वासन्तीपुष्पवृक्षाणाम् अपि अप्रसन्नता असम्भवं नास्ति। वृक्ष–वनस्पतिनां पुष्पविकासावरोधः राजाज्ञा नास्ति, परन्तु वृक्ष–पादपानां संवेदनशीलतायाः परिचायकोऽस्ति।

एवं प्रकारेण वसन्तकालीनप्रकृतेः विकासं प्रति नृपस्य अवहेलनभावनां दृष्ट्वा प्रमदवने कालिदासः केवलं कोकिलस्योल्लेखः करोति। यथा–

**"कण्ठेषु सखलितं गतेऽपि शिशिरे पुंस्कोकिलानां रूतम्।।अभि.६/४।।**

योत्सवरहिते उपवने कूजनेऽपि असमर्थो दृश्यते। नगरपरितन्त्रे मनुष्यः सर्वप्रधानघटकोऽस्ति, तदनुसारः हस्तिनापुरेऽपि मानवऽन्य जैविकाऽजैविकघटकानाम् अपेक्षा पर्यावरणस्य साक्षात् नियन्ताऽस्ति किन्तु सः यथेष्टमर्यादापालकोऽप्यस्ति, न तु विलासी यतः मर्यादापालने पर्यावरणस्यहितं भवति। पञ्चमोऽङ्के कञ्चुकी वदति। कर्तव्यविषये–

**भानुः सकृद्युक्ततुरंग एव रात्रिन्दिवं गन्धवहः प्रयाति।**
**शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः।।अभि–५/४।।**

अर्थात् पर्यावरणस्य मुख्यतत्व सूर्यः लोकरक्षायै युगादावेकवारमेव स्वरथे नियुक्ततुरङ्गमोऽद्य यावत् भ्रमत्येव। न तदश्वाः कदापि रथाद् वियुज्यन्ते , विश्वप्राणधारको वायुः अहोरात्रं प्रवहत्येव, न कदापि विश्राम्यति, एवं शेषनागोऽपि सर्वदैव शिरोधृतधरित्रीमण्डलः तिष्ठति, न कदापि स्वाधिकारात् क्षणमपि विरमति।प्रजोप्रार्जितधनादितः षष्ठभागाधिकारिणो राज्ञोऽपि प्रजापालने अविश्रामः आवश्यककर्तव्यो विद्यते। महाराजो दुष्यन्तः धर्मासनादुत्थिताय विश्रामं करोति। अन्यच्च–जीव–जन्तवोऽपि स्व स्व कर्तव्ये रताः सन्ति। यथा–

**प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम्।**

**यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः।।[१]**

अस्मिन् श्लोके दुष्यन्तस्य तूलना परोपकारी वृक्षेण सह करोति। तद्यथा–

**स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः, प्रतिदिनमथवा ते वृत्तिरेवं विधैव।**

**ह्यनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं, शमयति परितापं छायया संश्रितानाम्।।[२]**

अर्थात् पादपस्य पथिकानां छायादानेनातपसन्तापदूरीकरणमिव स्वसुखनिरपेक्षः परमसुखसम्पादकस्य भवतोऽपि स्वराज्ये निवसतां प्राणिनां सर्वाङ्गीणसुखसम्पादनमेवधर्मः।

---

१. अभिज्ञानशाकुन्तल –५/५, २. –५/७,

## (३)पर्यावरणपरिप्रेक्ष्ये मारीचाश्रमस्य महत्वम्।

### (क)मारीचाश्रमस्य भौगोलिकस्थितिः ।

राजादुष्यन्तः देवासुरसंग्रामानन्तरं इन्द्ररथेन स्वगर्तः पृथिव्यां परावर्तनसमये पथि हेमकूटस्य दर्शनं करोति, यः पूर्व पश्चिमयोः दिशावर्तीसमुद्रपर्यन्तं विस्तृतस्वर्णिमधारां प्रवाहयन् सन्ध्याकालीनमेघशृङ्खलैव सुशोभित आसीत्। राजा मातलिम्–पृच्छति– "**मातले! कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दः सान्ध्य इव मेघपरिघः सानुमानालोक्यते।**"[१]

हेमकूटस्य महिमा महाभारतस्य भीष्म पर्वणि–

**हेमकूटस्तु महान् कैलासो नाम पर्वतः।**

**यत्र वैश्रवणो राजा गुह्यकैः सह मोदते।।**[२]

अस्मिन् तपसिद्धिदायकः किंपुरुषपर्वते मारीचाश्रमः विराजते। यत्र रत्नशीला–समूह, मंदार–अशोक–लता–शकुन्त–सर्पसिहानां वर्णनं प्राप्यते। यथा मातलि–हस्तेन दर्शयन्–

**बल्मीकाग्रनिमग्नभूतिरुरसा संदष्टसर्पत्वचा,**

**कण्ठे जीर्णलता प्रतानवलयेनात्यर्थसंपीडितः।**

**अंसव्यापिशकुन्तनीडनिचितं बिभ्रज्जटामण्डलम्,**

**यत्र स्थाणुरिवाचलोमुनिरसावभ्यर्क बिम्बं स्थितः।।(अभि.७/११ )**

अर्थात् यत्र वल्मीकनिमग्नशरीरः स्कन्धोपरि लम्बमानं जटाजूटं विभ्राणः कश्यपमुनिः स्थाणुरिव सूर्यबिम्बं लक्षीकृत्य तिष्ठति, स एव मारीचाश्रमो भवताऽवगन्तव्य इति मातलिः राजानं कथयति। अन्यच्च– तस्य आश्रमस्य प्राकृतिकसमृद्धिः परितः दृश्यते। तद्यथा–**प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने,**

**तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकः क्रिया:।**

---

१. अभिज्ञानशाकुन्तल–७/पृ. ३७१, २.– ६/४१

ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंन्निधौ संयमो,

यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।।[१]

राजर्षिदुष्यन्तः महर्षेः कश्यपस्य आश्रमं दृष्ट्वा विस्मयमनुभवति– यथा अस्मिन् कल्पवृक्षकानने इच्छामात्रैव सर्वविधं स्वादुभोजनं लब्धुं शक्यते, परमत्र स्थिता एते तपस्विनो वायुमात्रमेव भक्षयित्वा तपश्चरन्ति। एते पर्यावरणपोषकाः सन्ति। काञ्चनकमलकिञ्जल्कसदृशानि स्वच्छानि जलानि समीक्ष्य समेषां समुदेति स्नातुं विहर्तुं चाभिलाषा, किन्त्वेते नियमनिवर्तस्नानमात्रं कुर्वन्ति। कारणञ्च ते पुनः पुनः जले स्नानं कृत्वा जलं प्रदुषितं कर्तुं नैव इच्छन्ति, ते जलस्य महत्वं जानन्ति, मर्यादापूर्वकं धर्माचरणार्थमेव जलस्योपयोगं कुर्वन्तीति। रत्नमयशिलातले उपविश्य विहर्तुं भवति समेषां वाञ्छा, परमेते तत्रोपविश्य ध्यानधारणादीन्येव योगाङ्गानि समनुतिष्ठन्ति। किञ्चात्र–इतस्ततोऽतिसुन्दर्यः देवाङ्गना विहरन्ति, परमेते तासां सुरसुन्दरीणां सन्निधावपि निगृहितेन्द्रियाः सन्तस्तपस्चरन्ति। किं बहुना भूतलवर्तिनःतापसाः तपश्चरफलत्वेन स्वर्गादिभुवं प्राप्तुं प्रयतन्ते, तत्रस्थिता एते तपश्चरन्तीति विस्मयातिरेकजनकोऽयं कश्यपाश्रमः। अभिज्ञानशाकुन्तले वर्णित हेमकुटस्य स्थूलतया तूलना कुमारसम्भवे वर्णित नगाधिराजहिमालयेन सह कर्तु शक्यते। यथा–

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्याः इव मानदण्डः।।** [२]

"विक्रमोर्वशीयम्" नाटकानुसासारेण कैलासवर्तीकुबेरभवनात् परावर्तनकाले दैत्यापहृतम् उर्वशीं मोचयितुं गतः पुरूरवसः प्रतीक्षां अप्सराः तत्रैव हेमकुटपर्वतसमीपे कुर्वन्ति स्म। यदा राजा पृच्छति–

**पुनर्मां भवत्यः प्रतिपालयन्ति?तदा सर्वाः अप्सराः"एतस्मिन् हेमकूट शिखरे" ।।विक्रम.१/११।।**

अनेन ज्ञायते यत् हेमकूटपर्वतः कैलासस्य समीपे वर्तते। महाभारतोऽपि हेमकूटपर्वतं कैलासादभिन्नं स्वीकरोति। यथा–

**"हेमकूटस्तु सुमहान् कैलासो नाम पर्वतः।।**[३]

---

१. अभिज्ञानशाकुन्तल –७/१२ , २. कुमारसम्भव –१/१, ३. महाभारत भीष्मपर्व – ६/४१,

"वराहपुराणानुसारेण एतत् अलकनन्दा – भागीरथी–यमुनानाम् उद्गमक्षेत्रमस्तीति।।"–कालिदास का भारत पृ. २१।।

कालिदासस्य कैलासोत्संगे स्थापित अलकापुरी हेमकूटनाम्ना निर्दिष्टक्षेत्रे समागच्छति। यथा– पूर्वमेघे कनकरसनिष्यन्दी हेमकूटः हिमावृतः पर्वतमालाऽस्ति। यस्या श्वेतहिमावरणे सायंकालिकसूर्यस्यरक्तकिरणाःपरावर्तितो भूत्वा स्वर्णमिवा भासते, येन विस्तृतापर्वतश्रेणी स्वर्णिमधारा प्रवाहयन्,सन्ध्याकालीनरक्तिमयायुक्तो मेघपंक्तिरिव प्रतीयते।। विशालहेमकूटपर्वतमालायां मारीचाश्रमस्य सुनिश्चितस्थितेः सङ्केतः कविना नैव दत्तम्। मानवसामर्थ्यदृष्ट्या अगम्य स्वर्गाधिक सुखदायी मारीचाश्रमः दुर्गमपर्वतमध्ये स्थितः तपोवनं ज्ञायते। सप्तमोङ्के दिङ्मात्रसङ्केतः प्राप्यतेराजा दुष्यन्तः आश्रमपरिसरं दृष्ट्वा स्वभावतः सत्त्विको राजा प्रहृण्यन्नाह–

**"स्वर्गादधिकतरं निवृतिस्थानम्। अमृत ह्रदमिवावगाढोऽस्मि।" (अभि.७/ पृ. ३७६)**

यत्रस्थ जलवायुः सुखदोऽस्ति। अतः मारीचाश्रमः स्वर्गापेक्षयाप्यधिकसौभाग्यास्पदं विद्यते। मारीचाश्रमस्य जलवायुः कष्टप्रदः शीतो नास्ति। सिंह–सर्प–जीव–जन्तवः, तथा अशोकवृक्षाः, नग्नप्रायः तपश्वीनाञ्च वर्णनेन मारीचाश्रमस्य स्थितिः प्रायः(६००० फीट) उच्चपर्वतीय स्थाने अनुमीयते।

## (ख) मारीचाश्रमे वनस्पतिसंरक्षणम्।

मारीचाश्रमे विद्यमानवृक्ष–जतादीनां संवर्द्धनं – संरक्षणञ्च प्रेम्णा स्वयं देवमाता अदिति करोति। देवमात्रा संवर्द्धितमन्दारवृक्षस्योल्लेखो प्राप्यते सप्तमोङ्के – यथा– मातालिः–

**"महाराजः! एतावदिति परिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।"**[1]

आश्रमे अशोकतरुतले कश्यपऋषेः दर्शनार्थं प्रतिक्षां कुर्वाणः राजा दुष्यन्तः सर्वदमनस्य बाललीलां पश्यति। कल्पवृक्षाणां वनानि सन्ति यत्र तपस्विनः वायुभक्षणं कृत्वा साधनां कुर्वन्ति। काञ्चनपद्मानि सन्ति येषां परागकणैः रञ्जितजले तपस्विनः धर्माभिषेकं कुर्वन्ति। यथा– सप्तमोङ्के–

---

१. अभिज्ञानशाकुन्तल –७/पृ. ३७६,

"प्राणनामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने।

तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।।"[१]

अर्थात्– कल्पतरुकानने तपश्चरणयोग्या जीवनधारणं वायुना भवति। सुवर्णकमलानां परागैः पिङ्गलवर्णे जले पुण्याय स्नानस्य विधिः निर्वर्त्यते। सर्वदमनस्य बाहौ रक्षासूत्ररूपेणबद्धः अपराजिता–ओषधिः विद्यते, स एव अन्ततो गत्वा दुष्यन्त–शकुन्तलयोर्पुनर्मिलनार्थं साधनं भवति। यथा–

'श्रुणोतु महाराजः एषाऽपराजितानामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्त्वाऽपरो भूमिपतितां न गृह्णाति।"[२]

अत्र कल्पवृक्षोऽपि दिव्यवृक्षस्य स्थाने बहूपयोगी पर्वतीयवृक्षस्य प्रतीकात्मकाभिधानं प्रतीयते। अयं वनस्पीतनां सर्वदानक्षमता तथा लोकोपयोगिया अनरूपा एवाऽस्ति। यथा– महाकविः कालिदासः वृक्षान् कल्पवृक्षरूपेणैव स्वीकरोति।–

क्षौमं केनचिदिन्दु पाण्डुतरुणा माङ्गल्यमाविष्कृतं

निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।

अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–

र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।[३]

अर्थात्– केनापि वृक्षेण चन्द्रधवलं शुभकर्मयोग्यं अंशुकम् आविष्कृतम्। केनापि तरुणा चरणलेपनमनोहरः आलक्तकद्रवः अविष्कृतो दत्तः। अन्यतरुभ्यः तत्पल्लवशोभानुकारिभिः मणिबन्धपर्यन्तं वनदेवतापाणितलैः मुक्तारत्नाद्यलङ्काराणि,समर्पितानि। वनस्पतिः मानवशरीरे भिन्ना भिन्ना शक्तिप्रदानं करोति। एतद्रहस्यं यो वेत्ति स वनस्पतेः मित्रं भवति। कालिदासः एतद्रहस्यं जानाति, अतः सर्वान् वृक्षान् कल्पवृक्षरुपेण दुष्ट्वा, तैः सह सौहाद्रपूर्णयवहारं करोति।

काञ्चनपद्मं संभवतः पीताभकमलमस्ति, यत् स्वर्णिमं दृश्यते। कविवर्णित

---

१.अभिज्ञानशाकुन्तल –७/१२, २. – ७/३९५, ३. –४/४

अशोकवृक्षः सघनतायाः परिचायकोऽस्ति तथाऽयं वृक्षः हिमालयस्य उष्ण – उपोष्ण जलवायुक्षेत्रेषु प्रचुरतया प्राप्यते। मारीचाश्रमे परितः सुशोभितानाम् अनेकानेकवृक्षेषु प्रतीक्षार्थं दुष्यन्तस्य अशोकवृक्षचयनं भाविशोकनिवारणं सूचयति।

## (ग) मारीचाश्रमे जीवजन्तुसंरक्षणम्–

हिमालयस्य निम्नप्रदेशस्थाऽरण्येषु विशालाः वल्मीकाः दृश्यन्ते, अत्र सर्पाणां बाहुल्योऽपि वर्तते। महाकविः कालिदासः मारीचाश्रमे तपस्यारतमुनेः वल्मीकावृतशरीरे आवृतलतासु नीड–निर्माणं कुर्वन् 'शकुन्त' पक्षीणामुल्लेखः करोति।

**"अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलम्।।अभि.७/११।।**

मातापितृभ्यां परित्यक्तबालिका शकुन्तलायाः रक्षा अनेक पक्षिणाकृतमासीत्। यथा महाभारते–

**"परिरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम्।।" (म.भा. आदिपर्व)**

मारीचाश्रमे शकुन्तलायाः उपस्थितेः ज्ञानार्थं कदाचित् 'शकुन्त' शब्दस्य प्रयोगो विहगार्थे कृतमस्ति। मारीचाश्रमे सिंहशावकस्योल्लेखोऽस्ति यस्य सटान् आकृष्य दन्तान् गणयन् सर्वदमनः क्रीडति। यथा–

**अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।**

**प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति।।अभि. ७/१।।**

अर्थात्– क्रीडां कर्तुं स्वकृताकर्षणवेगविकीर्णगलसटम्, असमग्रपीतपयोधरं केसरकिशोरं प्रसह्य जनन्याः सिंह्याः सकाशात् अपनयति। तथापि तपोवनप्रभावेण सिंहशिशुरिवआश्रमवासीनां प्रति हिंसा रहितोऽस्ति।

मारीचाश्रमे वन्यजीवान्–स्वसन्तानमिव तापस्य पालयन्ति स्म। अस्योदाहरण सप्तमोङ्के एका तापसी–सर्वदमनं वदति–

**"अविनीत किंनोऽपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि। हन्त वर्धते तव संरंभः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।" अभि.७/३२।**

अर्थात्– रे उच्छृङ्खल ! किमर्थम् अस्माकं सन्तानेभ्य पुत्रवत्पालितानि सिंहव्याघ्रादिजीवान् उत्पीडसि। हा ते धाष्टर्यं एधते। उचितमेवास्ति यत् मुनीगणेन सर्वदमन इति नामधेय विहितमसि। आश्रमे अन्य–जीव–जन्तूनां नामोल्लेखं न कृत्वा केवलं सिंहस्य विद्यमानतायाः वर्णनम् अत्यन्त अर्थपूर्णोऽस्ति। वस्तुतः सिंहः प्रचुरवनसम्पदायाः परिचायकोऽस्ति।

वनपर्यावरणे सर्वोच्च उपभोक्तायाः सुरक्षा समृद्धयर्थं तस्य भोजनस्वरूपविद्यमान द्वितीयप्रार्थमिकोपभोक्तानाम् शाकाहारी जीवेभ्यः भोज्यवनस्पतीनां संवर्द्धनं तथा वनस्पतिप्राचुर्याथम् सर्वे जैविकाजैविककारकतत्त्वानां सन्तूलनमावश्यकमस्ति। वनस्पतिं विना शाकाहारी, शाकाहारीं विना मांसाहारी, तौ विना सिंह–व्याधादीनां जीवनमसम्भवोऽस्ति। उपभोक्तायाः विद्यमानता उत्पादके नियन्त्रणार्थम् अनिवार्योऽस्ति। अन्यथा उपभोक्तायारभावे उत्पादकस्याऽनावस्यकाधिक्यः पर्यावरणसन्तूलनं विखण्डयिष्यति।

अतोऽत्र सिंहस्य वर्णनं समस्त अजैविकपर्यावरणकारकाणां, जैविकभोजनश्रृङ्खलाया सुचारुसन्तूलनस्य तथा सुसमृद्ध वन्य जीवनां संसूचकोऽस्ति।

## (घ) मारीचाश्रमस्य– आध्यात्मिकदृष्ट्या चिन्तनम्।

मारीचाश्रमस्य पर्यावरणीयतत्त्वाऽवलोकेन स्पष्टं भवति यत् एतत् तपोवनं काल्पनिकं नास्ति आश्रमस्य परितः सर्वत्र सर्ववस्तुषु–आध्यात्मिकता–परिशुद्धताश्च दृश्येते। यतोऽत्र स्वयम्भूः ब्रह्मणः पुत्र मरीचस्यात्मजः कश्यपोऽस्मिन् आश्रमे सपत्नीक वानप्रस्थजीवनं यापयतः। दिव्यदाम्पत्यतपपूतोऽयं तपोवनम् अस्यां धरायां विद्यमानोऽस्ति। अत्र निवासिनः सर्वे दिव्याऽलौकिकाश्च सन्ति। यथा– अप्सारपुत्री–शकुन्तला। पार्थिव तपोवनमिव अत्रापि तपस्विनः तपरता सन्ति। यथा अस्मिन् श्लोकांशे–

**यत्र स्थाणुरिवाचलोमुनिरसावभ्यर्कबिम्बं स्थितः।।**[१]

अत्राश्रमे धर्मपरकसदुपदेशाः दीयन्ते। यथा–"**अये वृद्धशाकल्य किमनुतिष्ठति भगवान् मारीचः? किं ब्रवीषि?दाक्षायण्या पतिव्रताधर्मकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति।**"[२]

तथापि कविः अत्र नाविन्यंकर्तुमिच्छति। अतोऽत्र मन्दारकल्पसदृशदिव्यवृक्षाणां वर्णनं करोति, स्वर्णकमलान् निर्माति तेन अन्यान्यतपोवनतः अस्य दिव्याश्रमस्य विलक्षणता

---

१. अभिज्ञानशाकुन्तल . –७/११,    २. –७/पृ.३७९

द्योतते। अत्र परिवेशेन अलौकिकतया सह तपश्चर्यामपि अलौकिकता दृश्यते। यथाऽस्मिन् श्लोके–

**प्राणानामनिलेनवृत्तिरुचिता सत्कल्पवृक्षे वने,**

**तोये काञ्चनपद्मरेणुकपिशेधर्माभिषेकक्रिया।**

**ध्यानं रत्नशिलातलेषु विबुध स्त्रीसंनिधौ संयमो,**

**सत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिन् तपस्यन्त्यमी।।अभि.७/१२।।**

एतादृशलोकोत्तरवातावरणस्योत्सृजनार्थं कामपि–अनिर्वचनीयकल्पनाया समावेश आवश्यक्यस्ति, परन्तु कालिदाससदृशानां प्रकृतिवर्णनदक्षाणाञ्कृते कपोलकल्पनायाः स्थानं नास्ति। देवमाता–अदति–परिवर्द्धितमन्दारवृक्षस्योल्लेखः कविः कुर्वन् तत्रस्थवनवर्णने कल्पवृक्षस्य वर्णनं वर्तते। महाकविः केवलं दिव्यतायाः पक्षपाती नास्ति, अतः सः तान् वृक्षान् सूचयति येषां वृक्षाणां हेमकूट प्रस्तावित परिवेशे संवर्द्धनं शक्योऽस्ति।

तपोवनवासनः सर्वे आवश्यकतापूर्त्यर्थं पर्यावरणोऽपरि निर्भरा सन्ति, परन्तु ते पर्यावरणस्य हानिर्न स्यात् ध्यानं दत्वा जीव–जन्तूनां वृक्षाणाञ्च अपत्यवत् रक्षन्ति। यथा– प्रथमा तापसी– कथयति– **"नोऽपत्यनिर्विशेषाणि सत्वानि।" (अभि.७/पृ. ३८२)**

आश्रमवासीनां पर्यावरणीयअवधारणाया चित्रणं कालिदासेन अस्मिन् श्लोके अत्यन्तसूक्ष्मतया कृतमस्ति।तद्यथा–

**वल्मीकाग्रनिमग्नमूर्तिरुरसा संदष्टसर्पत्वचा,**

**कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः।**

**अंसव्यापिशकुन्तनीडनिचितं बिभ्रज्जटामण्डलं,**

**यत्र स्थाणुरिवाचलो मुनिरसावर्भ्यर्कबिम्बं स्थितः।।अभि.७/११।।**

अत्र तपस्यालीनमुनीनां तथा सर्प – लता – शकुन्तादीनां पूर्णरुपेण एकाकारता मानवपर्यावरणयोरविच्छिन्ननैसर्गिकसम्बन्धं सूचयति । जीवाऽजीवप्रकृतीनां कल्याणाय पूर्णसंयमितजीवनस्य आवस्यकता भवति। मानवः यदा इन्द्रीयवशी भूत्वा चञ्चलतया भोगवादं

स्वीकरोति, तदैव पर्यावरणे असन्तूलता समागच्छति। अतः पर्यावरणस्य संरक्षण–संवर्द्धनाय च। "**तेन त्यक्तेन भूञ्जीथा-**"(ई.उप.–१) इदं मन्त्रं जीवनमन्त्रं मत्वा संयमपूर्वकं प्रकृत्याः दोहनं कूर्यात्, तदा पर्यावरणसन्तूलने स्थिरता आगमिष्यति। अस्य पर्यावरणहितकारी कार्यस्य पूर्तता कालिदासस्य मारीचाश्रमे सर्वतोभावेन भवति स्म।

## (४) अभिज्ञानशाकुन्मले निर्दिष्ट सम्पूर्णकथानकस्य पर्यावरणदृष्ट्या सूक्ष्मचिन्तनम्।

अभिज्ञानशाकुन्तलकथायारध्ययनेन स्पष्टं भवति यत् सम्पूर्णकथायां प्रकृतेः मानवेन सह पारस्परिकसम्बन्धानां प्रतीकात्मकं वर्णनं विद्यते। प्रकृतिपालिता शकुन्तला केवलं प्रकृतिपुत्री नास्ति, अपितु साक्षात् प्रकृतेर्साकारमूर्तिरस्ति। वृक्ष– पादप– पशु – पक्षिभिः सह शकुन्तलायाः मन अनन्य घनिष्ठता कारणात् प्राकृतिकश्रिया सह तदाकारो भवति। एषा प्रकृति–मानवयोः संसर्गरहिता केवलं वन्यप्रकृतिर्नास्ति, अपितु त्यागतपसाधनेनिरताः निःसंगमनीषिगणानां संरक्षणे निःशंकरुपेण विकसिता तेषां साहचर्यात् स्वाभविकरुपेण सुसंस्कृता प्रकृतिर्विद्यते। तपोवनवासी अपि स्वाऽऽवश्यकतापूत्यर्थं प्रकृतौ निर्भराः सन्ति। यथा शकुन्तलायाः वृक्षसेचनम्, अतिथिसन्कारः, दुर्दैवप्रशमनार्थं सोमतीर्थयात्रादि। एवं प्रकारेण मानव–प्रकृत्योः परस्परोपकारभावना परितः दृश्यते।

उदारमनाप्रकृतिः भोगत्यागवादयोर्भेदं विना सर्वेषां सत्कारः व्याहरति। यथा– दुष्यन्तस्य सत्कारं मुक्तभावनया कृत्वा स्व नैसर्गिकसौन्दयमर्पयति। राजादुष्यन्तरैश्वर्ययुक्तोनगरसभ्यतायाः प्रतीकः भौतिकवादीसंस्कृतेः प्रतिनिधिरस्ति। सः प्रकृतेर्निव्याजमनोहरतायाः प्रशंसकः प्रणयी च अस्ति। यदा प्रकृतिं प्रति स्वकर्तव्यपालनस्य समय आगच्छति, तदा मिथ्यादोषारोपणं कृत्वा प्रकृतेरपमानं करोति। अधुना पर्यावरणस्य या दशा वर्तते तत्र स्वयं मानवः कारणमस्ति। मानवेन तिरस्कृताप्रकृतेः संरक्षणं मारीचाश्रमे भवति। अतुलसम्पदसम्पन्नाप्रकृतिः मानवं तदा सुलभो भवति, यदा सः तां प्रति स्वदृष्टिकोणं परिवर्तयति। स्वत्रुटिं ज्ञात्वा मानवोऽपि प्रकृतिं महत्वं ददाति, तदा तं पुत्ररत्नस्य प्राप्तिर्भवति। अन्ततः नागरसभ्यता तथा तापससंस्कृतेः सामंजस्य पूर्णव्यवहारैव प्रकृतेः हितं निहितोऽस्ति। यथा सप्तमाङ्कस्य–अन्तिमश्लोके–

**प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयसाम्।**

**ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगत शक्ति रात्मभुः।।अभि.७/३५।।**

अर्थात्– दयासिन्धो! महर्षे, भवदीयानुग्रहादहं सफलाभिलाषसम्पन्नः नातः परं किमपि प्रार्थनीयमस्ति। तथापि यदिभवान् प्रियं चिकीर्षति तर्हीदमस्तु–समस्ताः पृथ्वीपतयः स्वसुखनिरपेक्षाः सन्तः प्रजानामेव श्रेयसे सर्वदाप्रवर्तन्ताम्, महाकवीनां सरसाः कविताश्च सहृदयानां–हृदयेषु चमत्कारं जनयित्वा विशिष्टसम्मानं लभन्ताम्, सर्वशक्तिशाली पार्वतीपतिः परमेश्वरश्च जन्मान्तरं निरस्य शाश्वतं पदं दिशत्विति।

महाभारते शकुन्तलोपाख्यानस्य नितान्तनिरसकथां सरससजीवपूर्णं कारयितुं कालिदासेन कथायां परिवर्तनं कृत्वा नवीनोद्भावनानां समावेशः कृतमस्ति, येन अपूर्वनाट्यकलया सह गहनं पर्यावरणदृष्टेः परिचयो भवति। कालिदासो वेत्ति यत् पर्यावरणं मानवस्य सामर्थ्यं प्रभावयितुं सर्वाधिकं समर्थोऽस्ति। अत एव मानवं दण्डयितुं प्रकृतिं शापः श्रावयति। एवं प्रकारेण एषः प्रसङ्गः मानव–प्रकृत्योः परस्पराश्रयत्वं दृढं करोति। दिव्य–दम्पत्योर्तपोवने, दुष्यन्त–शकुन्तलयोः मेलनस्य संयोजनं कृत्वा कालिदासः मानव–प्रकृत्यो सम्बन्धं भौतिकसंयोजनं कृत्वा कालिदासः मानवप्रकृत्योः सम्बन्धं भौतिकआदानप्रदानेनाऽपि उन्नतं सर्वेभ्यरनुकरणीयादर्शं प्रस्तौति। अस्यनाटकस्याऽन्य विशिष्टता इदंमस्ति यत् कालिदासः अस्य नाटकस्य मङ्गलाचरणे प्रकृतेः (पर्यावरणस्य) प्रत्येकरूपौ साक्षात् अष्टमूर्तिः शिवस्य दर्शनं करोति। नाटकस्यान्ते भरतवाक्येऽपि महाकविः "नीललोहितः" इति साम्बसदाशिवस्य दर्शनं करोति। अस्य इदं तात्पर्यं यत् अस्मिन् नाटकमध्ये यत् किमपि अस्ति तत् सर्वं पर्यावरणीय विशिष्टवैभवंमस्ति, यत् सर्वजनसुखाय हिताय च वर्तते।।इति।।

## (६) विक्रमोर्वशीयनाटके पर्यावरणम्।

महाकविः कालिदासविरचितम् "विक्रमोर्वशीयम्" इत्यस्य नाटकस्य कथाविषयः पृथिवीतः स्वर्गपर्यन्तं विस्तीर्णा वर्तते। यथा महाभारते आदिपर्वे– इदमेवोक्तं यत् पुरुरवाः ब्राह्मणैर्युद्ध्वा गन्धर्वलोकादग्नित्रयमानीतवान्। तस्य च षट् पुत्रा आसन् ज्येष्ठस्तावदुर्वशीतनयः आयुः। न किञ्चदुक्तं तत्र पुरुरवस उर्वस्या सह विप्रयोगो जातो न वेति। तत्र पुरुवंशवर्णने "अदित्यां कश्यापाद्विवस्वान्" विवस्वतोमनुर्मनोरिला। इलायाः पुरुरवाः। पुरुरवसः आयुः। आयुषो नहुषः। नहुषस्य ययातीति। यथा–

**पुरुरवास्तत्र विद्वान् इलायां समपद्य।**

**सा वै तस्या भवन्माता पिता चैवेति नः श्रुतम्।।**

**त्रयोदशसमुद्रस्य द्वीपानश्नन् पुरुरवाः।**

**अमानुषैर्वृत्तः सत्वै मनुषिः सन्महायशाः।।**

**षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः।**

**दृढायुश्च वनायुश्च शतायुश्चोर्वशी सुता।।**[१]

विष्णुपुराणे– इयं कथा स्पष्टतया प्रतिपादिता, दिङ्मात्रोल्लेखोऽत्र क्रियते।–

**पुरुरवास्त्वादिदानशीलोऽति यज्वातितेजस्वी। यं सत्यवादिनमतिरुपवन्तं मनस्विनं मित्रावरुणशापान्मानुषेलोके मया वस्तव्यमिति कृतमतिरुर्वशी ददर्श।**[२]

**तया सह स चावनिवतेरलकायां चैत्ररथादिवने पद्मखण्डेषु मानसादि सरस्वति रमणीयेषु रममाणः षष्टिवर्षसहस्राण्यनुदिन प्रवर्द्धमान् प्रमोदोऽनयत्।**

**उर्वशी च तदुपभोगात्प्रतिदिनप्रवर्द्धमानानुरागा अमरलोकवासेऽपि न स्पृहां चकार।।**[३]

एवं च पद्मपुराणेः–

**लक्ष्मी स्वयंवरं नाम भरतेन प्रवर्तितम्। मेनकां चोर्वसीं रम्भां नृत्यध्वमितिचाऽऽदिशत्।।**

---

१. महाभारत आदिपर्व –६३,६४,६९, २. विष्णुपुराण –४/६/३५, ३. –४/६/४८,४९

ननर्त सलयं तत्र लक्ष्मीरूपेण चोर्वशी।

सा पुरूरवसं दृष्ट्वा नृत्यन्ती कादपीडिता।।

विस्मृताऽभिनयं सर्वं यत्पुरातन चोदितम्।

शशाप भरतः कोपात् वियोगात्तस्य भूतले।।

पञ्चपञ्चाशदब्दानि लताभूता भविष्यति।

पुरूरवाः पिशाचत्वं तत्रैवाऽऽप्तो भविष्यति।।

ततस्तमुर्वशीगत्वा भर्तारमकरोच्चिरम्।

शापानुभवनान्ते तु उर्वशी बुधसूनुना।।

अजीजनत् सुतानष्टौ नामतस्तान्निबोधत।

आयुर्दृढायुर्वश्यायुर्धनायुवृतिमान्वसुः।—पद्मपुराणे —प्रथमे सृष्टिखण्डे द्वादशध्याये।

मत्स्यपूराणे— मात्स्ये पुरुरवसः पूर्वजन्मवृत्तान्तमपि लभ्यते।—"स मद्रदेशाधिपतिरासीत्, राज्यभरं च सचिवेषु समारोप्य तपसे हिमाद्रिं जगाम तत्रैरावतीं नाम नदीं ददर्श। तत्र च तस्य अप्सरसां गणैः सम्मेलनं जातम्। एवं प्रकारेण एकादश अध्यायतः विंशत्यधिकशततमाध्यायपर्यन्तं पुरुरवसः आख्यानं दत्तमस्ति।

कथासरित्सागरस्य सप्तदशतरंगे—

आसीत् पुरुरवा नाम राजा परमवैष्णवः।

अभूद्भूवीव नाकेऽपि यस्याऽप्रतिहतागतिः।।( तत्र विस्तरेण दत्तमस्ति)

सरविलियम विलसन महोदयानांमते तु सर्वमिदं नाटकीयं वस्तु अन्योक्तिपरमेवास्तीति कल्पितम्। तद्यथा—

"नायकः सूर्यः नायिका च उषा विद्यते। कलिकालम् उभौ संयुक्तौ भवतः पश्चाच्च वियुज्येते। केवलं रविरेव नदी—कूप—तडाग—वृक्ष—पर्वतेषु एकाकी परिभ्रमति पश्चाच्च

दिनावसाने उषसा संयुक्तो भव तीति।।"

एवञ्च पद्म–विष्णु–मत्स्यपुराण बृहत्कथादि विविधाना ग्रन्थानामालोचनेन स्फुटतयेदमवभासते यत् अस्य त्रोटकस्य कथाप्रबन्धः पुरातनः सन् विद्वत्सु प्रसिद्ध एवासते। कवि कालिदासस्य "विक्रमोर्वशीयम्" नाटके कथा सन्दर्भादि काव्यवैभवमतिमात्रं रमणीयम्। नाटकेऽस्मिन् सहृदयहृदद्रावीणि सन्ति प्रभूतानि ललितमधुराणि पद्यानि। विशेषतश्च तुरीयाङ्के विरहविधुरस्य राज्ञः असन्निहितप्रेयसी समन्वेषणप्रकारस्तु सचेतसां मनसां सम्मोहनमेव। स्वभाविक वर्णनापटवं तु कवि वरेण्यस्य सुतरां श्लाध्यम्। यथा हि प्रियप्रसादनार्थमेष्यन्त्यां तत्र भवत्यामौशीनर्यां विदूषकवचनं निशम्य दिशमैन्द्रीं विलोक्य राज्ञः उक्तिः–

**उदयगूढशशाङ्कमरीचिभिस्तमसि दूरतरं प्रतिसारीते।**

**अलकसंयमनादिव लोचने हरति मे हरिवाहनदिङ्मुखम्।।वि.३/६।।**[१]

अत्र हि उदयगिरिं समारुरुक्षोः शीतकिरणस्याभिख्यां वीक्ष्य संयमितालकजालाया अनवद्याङ्गनायाः मुखसुषुमां मनोहरायाः दिशः उपरि नायिकात्वेनारोपयतः सुकवेरुक्तिः प्रत्यक्षमेव कविताविलाससमास्वादसमुल्लसितानां मनांसि प्रीणयति, एतद्धि एतादृशकल्पना कुञ्जकोकिलस्य कवयितुर्लेखनीमृते नान्यत्र सुलभम्। "विक्रमोर्वशीयम्" नाटके दिव्यभूम्याः स्वर्गिकशोभायाऽपेक्षा पार्थिवपरिवेशस्य नैसर्गिकवैभवमेव कालिदासस्य प्रधानविषयोऽस्ति। यथा– नन्दनवने पारिजातः, सुखदवायोश्च वर्णनम्–

**अनन्तरं च मे ललितपारिजातशयनीये।**

**भवन्ति सुखा नन्दनवनवाता अपि शिखीव शरीरे।।**[२]

अत्र कुशुमशयनीयत्वप्रदानेन च शरीरस्य शिरीषप्रसूनाधिकसौकुमार्यत्वं व्यक्तम्। नन्दनवनवाता अपि शिखीव भवन्ति विरहीणां कृते, नायक–नायिकयोः विरहवर्णनव्याजेन कविः शिरीषकुसुमानि, नन्दनवायुश्च शरीराय स्वास्थ्यप्रदो भवतः। अस्मिन् नाटके कल्पनात्मकदिव्यचमत्कारपूर्णकथानकं भूते सत्यपि पृथिव्याः पर्यावरणचित्रणे वास्तविकतायाः परिरक्षणं कृतवान्नस्ति। अस्यां कृतौ प्रतिष्ठानपुरस्य मानवनिर्मितपर्यावरणचित्रणेन सह गन्धमादनवनस्य उनमुक्त प्राकृतिकपरिवेशस्यापि वर्णनं विद्यते।

**(१) पर्यावरणदृष्ट्या विक्रमोर्वशीय प्रमदवनमहत्वम् ।**

एतत् प्रमदवनं पुरुरवशः राजधान्यां प्रतिष्ठाने वर्तते। यः गंगायमुनयोः संगमेऽस्ति। तत्रस्थभवनानि गंगायमुनयोः जले प्रतिबिम्वितानि भवन्ति। फलं विशिष्टपर्वादिषु गंगा स्नानस्य लाभो वर्तते। धार्मिकदृष्ट्यागंगाजलस्पर्शफलं श्रीमद्भागवते–

---

१.विक्रमोर्वशीयम् ३/६, २. –२/१२

**यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि।**

**सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः।।**

**भस्मीभूताङ्गसंङ्गेन स्वर्याताः सगरात्मजाः।**

**किं पुनः श्रद्धयादेवीं ये सेवनते धृतवर्ताः।।**[1]

प्रमदवनस्य वसन्तकालीनवर्णनान्तर्गतः ऋतोः विशिष्टतास्वरुपमलयवायोः वर्णनं यथास्मिन् श्लोके–

**इदमसुलभवस्तु प्रार्थनादुर्निवारं,**

**प्रथममपि मनो मे पञ्चवाणः क्षिणोति।**

**किमुत मलयवातोन्मूलितापाण्डुपत्रै,**

**रुपवनसहकारैर्दशितेष्वङ्कुरेषु।।विक्रम.२/६।।**

अर्थात् प्रथमं सहकारदर्शनमेवोद्दीपनम्। पुनश्च तेषु अंकुरोद्गमः समुद्दीपनम्, तथा च आपाण्डुपत्राणामभावेन नितान्तसौन्दर्यशालित्वेन सहकारस्य विशेषोद्दीपकत्वं तथा च मलयवातोन्मूलित्वात्तस्य मलयाचलतो वहत अत एव सुगन्धिनः वायोस्तत्र सद्भावात् अत्यन्तमेवोद्दीपकत्वमिति गम्यते।

अत्र कवेः प्रकृत्याः गूढतत्तज्ञानस्य दर्शनं भवति। मध्यान्हकालस्य उष्णतायाः वर्णनं कुर्वन् मानवनिर्मितपरितन्त्रस्याऽनुरुपक्रीडापर्वतस्य वर्णनं तथा क्रीडागृहस्य च वर्णम्। यथा–

**उष्णार्तः शिशिरे निषीदति तरोर्मूलालवालेशिखी,**

**निर्भिद्योपरि कर्णिकारमुकुलान्याशेरते षट्पदाः।**

**तप्तवारि विहाय तीरनलिनीं कारण्डवः सेवते,**

**क्रीडा वेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते।।**[2]

अर्थात्– उष्णेन पीडितः मयूरः वृक्षस्य शीतले मूले कृतजलधारायाम् उपविशति। अनेन दिनेबलवती उष्मा जाता इति गम्यमानत्वात् मध्यान्हवेलेयमिति अनुमीयते।

---

१. श्रीमद्भागवत् –९/९/१२,१३,

२. विक्रमोर्वशीयम् –२/२

उष्णत्वात् भ्रमरा अपि निद्रां लभन्ते इत्यनेन मध्यान्हकालोऽनुमीयते। कारण्डवः पक्षिविशेषः सूर्यतपादुष्णंजल परित्यज्य तीरस्थां कमलिनीं सेवते, नलिन्याः शीतलत्वात् तत्र सुखम्। अनेनाऽपि मध्यान्हसमयोऽनुमीयते। एषः तृषयोद्विग्नः पञ्जरस्थः कीरः लीलागृहे जलं याचते। मध्यान्हकाले तृषबलवत्तरं बाधते, अत एव जलं याचते। मध्यान्हवेलेयमिति निश्चयार्थम् एकएव चिन्हं प्रयाप्तमासीत्। अत्र बहुचिन्हप्रदानेन कवेः प्रकृतिं प्रति स्वभावतः स्नेहभावना दृश्यते। रमणीयः खलु दिवसावसानवृत्तान्तो राजप्रासादे—

**उत्कीर्णा इव वासयष्टिषु निशा निद्रालसा बर्हिणो,**

**धूपैर्जालविनिःसृतैर्वलभयः सन्दिग्धपारावताः।**

**आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मती,**

**सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः।।**[1]

संध्याकालिकनैसर्गिकवर्णनेन सह सरोवरादीनाम् उल्लेखोऽपि प्राप्यते। वासन्ती पुष्पसम्पदाभिः युक्तः कुरबकः,रक्ताशोकः, चूतद्रुमः, कर्णिकारः, अतिमुक्तलता, नलिन्या सह मलयवायुना कृतपाण्डुवर्णः सहकार—अङ्कुरितस्य चर्चाऽपि प्राप्यते। यथा—

**किमुत मलयवातोन्मूलितापाण्डुपत्रै, रुपवनसहकारैर्दर्शितेष्वांकुरेषु।।**[2]

उष्णार्तक्लान्ताः मयूराः, कारण्डवः, शुकाः, संध्यासमये वासयष्टिषु— उपविष्टाः मयूराः,भवनोऽपरि— उपविष्टाः कपोताः, अतिमुक्लता, पुष्पोऽपरिसंलग्नाः भ्रमराः अस्योपवनस्य जन्तुवर्गे सम्मिलिताः सन्ति। यथा— **"एष कृष्णमणिशिलापट्टसनाथः अतिमुक्तलतामण्डपो भ्रमरसंघविघटितैः कुसुमैः कृतोपचार इवात्र भवतो वर्तते, तदनुगृह्यतामेषः।।"२/ पृ.५७।।**

विदुषकः पुरुरवसं सम्बोध्य – अत्र प्रमदवनस्य सम्परायाः वर्णनं करोति यत् प्रमदवने माधवीलतामण्डपे एकः सुन्दरः उपवेशार्हः प्रस्तर आसीत्तदुपरि वायुवेगेन कानिचित् कुसुमान्यपि अधः पातितानि आसन्। तेनोत्प्रेक्ष्येते यदिदं वासन्तीलतावितानम् विकसितैः कुसुमैः पूजार्हस्य भवतः स्वागतं करोति। इदं स्थलं सुवासितं सुन्दरं च सूच्यते।

---

१. विक्रमोर्वशीयम्— ३/२, २. —२/६

प्रमदवनेन सह मानवस्य सम्बद्धता, पालितपक्षीणाञ्चकृते क्रीडापर्वताः वासयष्ट्यादिरूपे प्राकृतिकपरिवेशस्य स्थापनप्रयासैः उन्नतोपवनलताभिः प्रकटी भवति।एतत् – अखिलपर्यावरणवर्णनं भारतस्य समतलभागानां सर्वथाऽऽनुरूपं दृश्यते। वसन्ततौं उपवने कोकिलस्यऽभावो भवति। अस्मिन् उपवन–परितन्त्रे उत्पादकोपभोक्तासम्बन्धः भ्रमर–अतिमुक्तलता–षटपद–कर्णिकारमुकुलेषु एव दृश्यते तथापि अस्याः वानस्पतिकशोभायाऽऽधारेण प्रमदवनं मानवनिर्मितपरितन्त्रमिति कथयितुं शक्यते।

(२) गन्धमादनवनस्याऽध्ययनम्।

उर्वशी राजर्षि पुरुरवसं गृहीत्वा गन्धमादनाख्यवनं प्रियेण सहोपवन विहारविह्वतमनस्का गता। यथा–"**उर्वशी किल लक्ष्मीसनाथं अमात्येषु निहितकार्यधुरं राजर्षि गृहीत्वा कैलासशिखरोद्देशं गन्धमादनवनं विहर्तुं गता।**"[१]

अनेन तत्स्थानमाहात्म्यं प्रकाशयता कविना राज्ञः विलासित्वं, उर्वश्याः संभोगभाग्यभाक्त्वं विवेचकत्वं चोभयोः विहरणक्षमत्वं तस्य प्रदेशस्य निर्जनत्वादिति ध्वनितम्। तत्र गङ्गायास्तटे सिकतानिर्मितैः पर्वतैः क्रीडमाना विद्याधरस्य कस्यचन उदयवती नाम्नी दारिका–राज्ञानिर्निमेषलोचनैः बहुविलोकिता यतः परनारी मानमसहमानया उर्वश्या सत्यैकोपकृतः। यथा–

**"ततस्तत्र मन्दाकिनीतीरे सिकतापर्वतैः क्रीडमानोदयवती नाम विद्याधरदारिका तेन राजर्षिणा चिरं निध्यातेति कृत्वाकुपिता मे प्रियसखी उर्वशी।"(४/पृ.१५१–५२)**

प्रियेण वारंवारं कृतायामपि प्रार्थनायाम् गुरोः गुरुतरशापेन स्वात्मानमपि अजानती प्रमदाभिः यत्र न गन्तव्यं तादृशं कुमाराख्यं वनं देवतानां नियमं विस्मरन्ती प्रविष्टा। प्रवेशानन्तरं काननस्य उपान्ते वर्तमाना या लता तद्भावेन सा देवता नियमोल्लङ्घनात् लतात्वं सपदि प्राप्ता। यथा–

**"ततो भर्तुरननुयमप्रतिपद्यमाना गुरुशापसंमूढह्रदया विस्मृतदेवतानियमा स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा। प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम्।"** [२]

उर्वश्याः वियुक्तः सोऽपि राजा तस्मिन्नेव कुमाराख्यवने प्रियतमाम् अन्विष्यन्विगतप्रज्ञः उन्मादग्रस्तो भूत्वा गहनवने इतस्ततः परिभ्रमति। अन्ततः "पार्वतीचरणसरसिजसमुत्पन्नोऽयं संगमनीयमणिः, एनं गृहाण, धारीते ह्यस्मिन्दयितजनेन

१. विक्रमोर्वशीयम् –४/पृ. १५१, २. –४/पृ.१५२

सत्वरमेव संगमो भवतीति अस्य गुण.। त्वच्च विरही, गृहाणैतत्।" इति नेपथ्यभाषितम्। अस्य मणेः संयोगेन नायको नायिकया संगमिष्यते। तद्यथा–

**सङ्गमनीयो मणिरिह शैलसुताचरणरागयोनिरयम्।**

**आवहति धार्यमाणः सङ्गममाशु प्रियजनेन।।**[१]

एवं प्रकारेण संगमनीयमणि द्वारा द्वयोः नायक–नायिकयोः पुनर्मेलनं भवतीति।

## (३) नाटके आगतानां भौगोलिकस्थानां पर्यावरणीयाऽध्ययनम्।

अस्मिन्नाटके वर्णितमन्दाकिनीतटवर्ती एतत् वनप्रान्तं हिमालये केदारनाथ–बद्रीनाथक्षेत्रेषु विद्यते इत्यनुमीयते। केदारनाथतरुद्भूता मन्दाकिनी रुद्रप्रयागे–अलकनन्दयासह सम्मिलित्वा देवप्रयागे भागीरथी गङ्गया मिलति। गन्धमादनवनस्य भूभागस्य सिञ्चनमपि अनया भवति। सुरसरितीर–समुत्सुका–गिरिनदी अस्मिन् क्षेत्रे गङ्गायारनेकाः सहायकप्रवाहान् संकेतयति। नदीं विलोक्य पुरूरवा वदति। यथा–

**तरङ्गभ्रूभङ्गा सुभितविहगश्रेणिरशना**

**विकर्षन्ती फेनं वसनमिव संरम्भशिथिम्।**

**पदाविद्धं यान्ती स्खलितमभिसन्धाय बहुशो**

**नदीभावेनेयं ध्रुवमसहना सा परिणता।।**[२]

अत्र कविः नायिकायाः वर्णनव्याजेन गङ्गायाः चित्रणं कुर्वन् वक्ति यत् – उभयेषां कुटिलत्वात् नदीतरङ्गा एव कोपनायाः तस्या भ्रूभङ्ग इति निरूप्यते। नदीसान्निध्ये विहगानां प्रायशो दर्शनात् स्त्रियां च काञ्चीदर्शनात् विहगपङ्क्तिः क्रोधनायास्तस्याः काञ्चीति रूप्यते। उभयोः श्वेतत्वात् विकर्षणरूपसाधर्म्यात् फेनवसनयोः साधर्म्यनिरूपणपूर्वकं नदीनायिकस्योस्तादात्म्यं रूप्यते। कुपिता स्त्री कुटिलया गत्या चलति। तथैवेयं नदी

---

१. विक्रमोर्वशीयम् –४/६४, २. –४/५२,

अपि वक्रेण प्रवाहेण गच्छति इति उभयो साम्यम्।

प्रतिष्ठानपुरतः ग्रीष्मर्तौ विहारार्थ हिमालयप्रदेशे–आगमनं तत्रस्थ सुखदशीतलजलवायोः सूचकोऽस्ति। अत्र वर्णितधारासारवृष्टिः हिमालयपर्वतमालायाः दक्षिणे निम्नभूतस्थाने अस्य वनस्यावस्थितिः सूच्यते। यथा–

**नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः,**

**सुरधनुरिदं दूराकृष्टं न नामशरासनम।**

**अयमपि पटुर्धारासारो न बाण परम्परा,**

**कनक–निकषस्निग्धा विद्युत्प्रिया मम नोर्वशी।।**[१]

अन्यच्च–

**विद्युल्लेखाकनकरुचिरं श्री वितानं ममाभ्रं,**

**व्याधूयन्ते निचुलतरुभिर्मञ्जरी चामराणि।**

**घर्मच्छेदात्पटुतरगिरो बन्दिनो नीलकण्ठा,**

**धारासारोपनयनपरा नैगमाश्चाम्बुवाहाः।।**[२]

प्रथमश्लोके पूर्वभ्रान्तो मेघादिकं सर्व राक्षसादिकममन्यत, किन्तु जातायां विभावनायां स यथार्थमीक्षते– अयं वारिधरः, न तु योद्धुकामोऽतिगर्वितो राक्षसः। उभयोः श्यामत्वात् भ्रमावकाशः। इदमिन्द्रधनुः न तु राक्षसस्य शरासनम्। अत्राकृतिसाम्यं भ्रमकारकम्। अयं जलसम्पातो न तु शरवर्षः।उभयोस्तीव्रत्वं नादकारकत्वं च भ्रमहेतुः। इयं दीप्तिमती सौदामिनी न तु प्रियोर्वशी। अत्रोज्ज्वलतैव भ्रान्तिजननी।

द्वितीयश्लोके– सौदामिनीलेखया कनकसदृशद्युतिर्मेघः एव स्वर्णवितानम्, तरुभिर्व्याधूयमानानि मञ्जरीरूपाणि चामराणि, मयूराणां केकाएव बन्दिवाचः, तथा च अम्बुवाहा एव वाणिज्यपटवो जना सन्ति। अनया सामग्र्या प्रावृषा राजोपचारः क्रियते।

---

१. विक्रमोर्वशीयम् –४/७, २. –४/१३

अनेन च तस्याः राज्ञः उपस्कारकत्वात् राज्ञा रक्षणीयत्वं व्यज्यते।

विविधवृक्ष–वनस्पति–जीव–जन्तुभिः समाकीर्णमेतत्वनम् अत्यधिकोच्चशीखरे स्थितं न भवितव्यम्। कारणञ्च एतादृशी वनसम्पदा हिमालयस्य पर्वतमालायाः नीचभूभागेषु मिलन्ति। कालिदासवर्णित गन्धमादनस्य सुरभिकन्दरनामक उपत्यकायाः उल्लेखेन एतत् वनम् उपत्यकायाः सन्निकटेऽस्तीति। यथा–"**अये सुरभिकन्दरो नाम विशेषरमणीयः सानुमानावलोक्यते। यश्चायमप्सरसाम्। अपि नाम सुतनुरस्योपत्यकायामुपलभ्येत।।**"४/ पृ. १९०।। एतत् पर्वतीयक्षेत्रं मई मासतः सितम्बरमासपर्यन्तं विशेषरमणीयं भवति। कालिदासोऽपि वनस्यवर्षाकालीनसुषमां वर्ण्यविषयः कृतवान्नस्ति।।

## (४) वानस्पतिक चेतना ।

महाकविः कालिदासेन गन्धमादनवने हिमालयस्य निम्नपर्वतीय प्रदेशस्य वर्षाकालीन वनस्पतीनां सुक्ष्मतया चित्रणं कृतमस्ति। वर्षासमयोद्भवहरिततृर्णं सर्वतः व्याप्तोऽस्ति। यत्र बालतृर्णप्रचुराभूमिः इन्द्रगोपाख्य कश्चन वर्षासमयोद्भवकीट विशेषः तेन सहितं लक्ष्यते। यथा– "**कथं सेन्द्रगोपं नवशाद्वलम्।**"४/१७३।।

अत्र मृदुबालतृणशोभाप्रेक्षणाय वन श्रीः समुत्सुका दृश्यते। अस्मिन् श्लोके–
**कृष्णसारच्छविर्योऽयं दृश्यते काननश्रिया।**

**नवशष्पावलोकाय कटाक्ष इव पातितः।।**[१]

कविनामिदं सम्मतं यत् वने वनाधिष्ठात्रीवनदेवता निवसति। तस्यां नायिकात्वारोपः। तथा च कटाक्षः पातितः किमर्थमिति वर्षासमये नूतनं बालतृणं वर्धते, तत् सौन्दर्यविलोकनप्रवणचेतसा तया पातितः कटाक्षः इव कृष्णसारोऽयं सारंगो दृश्यते। गन्धमादनवने पुरुरवसः राजोचितसत्कारार्थं वर्षर्तौ निचुलतःभिः, तेषां मञ्जरीरूप चामराणि व्याधूयन्ते। यथा–

**विद्युल्लेखाकनकरुचिरं श्री वितानं ममाभ्रं,**

**व्याधूयन्ते निचुलतरुभिर्मञ्जरी चामराणि।।**[२]

रक्तरेखायुक्तनूतनोपन्ना कन्दली वर्षाजलकणात् मध्यभागे धारयन्ति। यथा–

---

१. विक्रमोर्वशीयम् –४/५७, २. – ४/१

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः।

कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः।।विक्रम.४/१५।।

"कन्दली भूकदल्यपि" इति शब्दार्णववचनेन कदली तथा च मुक्तावलीकृतां मते "कलध्वनौ चापि तरौ मृगभेदेऽपि कन्दली" इति वाक्यात् शिलीन्ध्रापरपर्यायःकन्दलीनामावृक्षविशेषः।। निचुल तथा कन्दली कुसुमानि वर्षाकाले अधिकविकसितानि भवन्ति। यथा मेघदूते–

- स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखःखम्।।
- राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।।[१]

वर्षर्तौ प्रारम्भिकदिवसेषु गन्धमादनवने नवपल्लवितपर्णगुच्छमञ्जरिभिः युक्तजलवेतसरक्ताभछत्रकानामुपस्थितिः सर्वथा सम्भवोऽस्ति। राजजम्बूवृक्षे उपविश्य मदान्धाः कोकिलाः नूतनपरिपक्वजम्बूफलानां रसपाने प्रवृत्ताः सन्ति। अत्र रसपानस्य वर्णनं गन्धमादनवने जम्बूवृक्षस्य विद्यमानता तथा वर्षारम्भे जम्बूफलानि परिपक्वानि भवन्तीति सूचयति। यथा–

**महदपि परदुःखंशीतलं सम्यगाहुः,**

**प्रणयमगणयित्वा यन्ममापद्गतस्य।**

**अधरमिवमदान्धा पातुमेषा प्रवृता,**

**फलमभिनवपाकं राजजम्बूद्रुमस्य।।**[२]

इयं कोकिला राजजम्बूद्रुमस्य नूतनमेव पक्वं फलं सुमधुरं पातुं प्रवृत्ता यथा मदान्धाः कामदर्पखिलीकृतविवेकप्रसरा जनाः अधरम् अन्यत् सर्वं अनादृत्य पातुं व्यवस्यन्ति, तथैव मम पीडार्द्रनादमनादृत्य अधरमिव मधुरमिदं फलमास्वादयितुं प्रवृत्ताः, अतः साधु उक्तं लोके यत् परदुःखस्य व्यथाऽजनकत्वात् शीतलत्वमेव। यथा–

**" राजजम्बूः जम्बूवृक्षस्येकोप्रकारो विद्यते, यस्य विशालसघनवृक्षे दीर्घकायपत्राणि सुमधुराणि फलानि भवन्ति।।" वनौषधी चन्द्रोदय ४/८५।।**

१. मेघदूत पू.मे. –१४,२१,

२. विक्रमोर्वशीयम् –४/२७

गजस्त्रियः स्वप्रियं गजं सल्लकीं वृक्षशाखां खादयन्तीति वर्णनेन गन्धमादनवनेस्थितवृक्षाणां गजैः भक्षणं सूचयति। यथा–

**अयमचिरोद्गतपल्लवमुपनीतं प्रियतमाग्रहस्तेन।**

**अभिलेढु तादवासवसुरभिरसं शल्लकी भङ्गम्।।विक्रम.४/४४।।**

सल्लकीवृक्षशाखायाः विच्छेदने सति तत्र तः विशेषः गन्धः निस्सरति। कुमारसम्भवे–

**"स्थानमाह्निकमपास्यदन्तिनः सल्लकीविटपभङ्गवासितम्।।"[१]**

"गजानां प्रियभोजनकारणात् – अस्य "गजभक्ष" नामोऽपि प्रसिद्धोऽस्ति।"(कालिदास का भारत।– भगवतशरण उपाध्याय)

अत्रैव–उल्लेखो प्राप्यते यत् स्वप्रियतमासमेतः गजेन्द्रः नीपवृक्षस्कन्धे समासीनः तिष्ठति। यथा–

**"अये! करेणुसहायः नागाधिराजो नीपस्कन्धविषण्णस्तिष्ठति।" (विक्रम. १५२)**

अनेनाऽनुमीयते यत् नीपवृक्षाः विशालाः भवन्ति। ग्रीष्मान्तसूचकः रक्तकदम्बस्य अर्धविकसितपुष्पाणि उर्वशी केशभूषणत्वेन धारयति। यथा–

**रक्तकदम्बः सोऽयं प्रियया धर्मान्तशंसि यस्येदम्।**

**कुसुममसमग्रकेसरविषममपि कृतं शिखाभरणम्।।[२]**

अयं स एव रक्तकदम्बस्तरुः यस्य वर्षासमयप्रारम्भबोधकं किञ्चितदुन्नतकेसरत्वान्नतोन्नतं अपि कुसुमं मम प्रियया केशाऽभूषणत्वेनस्वीकृतमिति।

**"शब्दकोशानुसारेण नीपकदम्बौ समानार्थकौ स्तः।" (संस्कृत–हिन्दी कोश, पृ.५५० –वामन आप्टे)**

---

१. कुमारसम्भव –८/३३,

२. विक्रमोर्वशीयम् –४/६०

परन्तु कालिदासेन ऋतुसंहारे द्वयोः शब्दयोरेकस्मिन् पद्ये–उल्लेखेन भीन्नतायाऽऽभासो भवति। ऋतुसंहारे–

"मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्, सप्तच्छदानुपगताकुसुमोद्गम श्रीः।।"ऋतु.३/१३।।

पवनधूयमानं वर्षर्तौ पुष्पितरक्ताऽशोकस्य वर्णनम्–अस्वाभाविको प्रतीयते। यतोऽशोकस्य पुष्पकालो वसन्तो वर्तते। अस्य असामान्यतायाः स्पष्टीकरणं स्वयं कालिदासः पुष्पवृक्षाणां दोहदपूर्तिविषयकः कविसमयाधारेण करोति। प्रमदया पादप्रहारं विना अशोकस्य – अकालपुष्पोद्गमम् असम्भवं मत्वा पुरूरवा अशोकवृक्षः कदाचित् उर्वशीं दृष्ट्वान्नासीत् तथा सैव दोहदपूर्तिरपि–अकरोदिति– अनुमानं करोति। यथा–

रक्ताशोक कृशोदरी क्व नु गता त्यक्तानुरक्तं जनं,

नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः।

उत्कण्ठाघटमानषट्पदघटासङ्घट्टदष्टच्छद–

स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कृतः।।विक्रम.४/६२।।

गन्धमादनवनस्य सरोवरे कमलतन्तुः, नलिनीपत्रम्, पुण्डरीकः, पद्मादीनामुल्लेखः कृतमस्ति। यथा–

पश्चात् सरः प्रतिगमिष्यति मानसं तत्,

पाथेयमुत्सृजविसं ग्रहणाय भूयः।।विक्रम.४/३१।।

सरसि नलिनीपत्रेणापित्वमावृतविग्रहां ननु,

सहचरीं दूरे मत्वा विरोषि समुत्सुकः।।[१]

इदं रुणद्धि मां पद्ममन्तः कूजित षट्पदम्।।विक्रम.४/४०।।

तवरतिरभविष्यत् पुण्डरीके किमस्मिन्।।[२]

कुमारवने लतारुपे परिणतउर्वश्या आन्तरिकेन्द्रियैः पुरुरवसः विरहकातरतायाः

१. विक्रमोर्वशीयम् –४/३९, २. – ४/४२

प्रत्यक्षीकरणप्रसंग·अप्सराया·दिव्यशक्तेः परिणामो नास्ति, अपितु कालिदासस्यवनस्पतिविषयकज्ञानस्य परिचायकोऽस्ति।।

वृक्ष–पादप–तृणादिविविधवनस्पतिषुमध्ये लतासु विशेषज्ञानं भवति।ताः लताः काचन संवेदीतन्त्रिक (sensory–nerves) माध्यमेन सन्देशाः गृह्णन्ति। "वैज्ञानिकाः लतासु स्मरण–विचार–निर्णयात्मिकाशक्तिर्भवतीति स्वीकुर्वन्ति । (विश्व प्रसिद्ध मांसाहारी तथा अन्य विचित्र पेडपौधे–पृ.६२।–जगदीप सक्सेना)

लतासु निहितान्त– प्रत्यक्षीकरणसामर्थ्यं ज्ञात्वा कालिदासः कदाचित् उर्वशीं लतारुपे परिणीतवान्नासीत्। अनेन निश्चीयते यत् मानवः अप्सरा– वृक्ष – पादपादिषु विद्यमानः अन्तश्चेतना,संवेदनशीलता, ग्रहणशीलतेभ्यश्च परिचितोऽस्तीति।

## (५) जीव–जन्तूनां संरक्षणम्।

गन्धमादने गजस्योल्लेखः सर्वाधिकः कृतमस्ति। यथा दिङ्गमात्रमुदाहरणानि–विक्रम.

- **गहनं गजेन्द्रनाथः।।४/५।।**
- **गजयूथपतिर्बहुक्षीणगतिः।।४/१४।।**
- **गजवरो विस्मितमानसः।।४/१९।।**
- **अम्बरमानेन भ्रमति गजेन्द्रः।।४/२३।।**
- **कानेन परिभ्रमति गजेन्द्रः।।४/२८।।**
- **नागाधिराजो भवान्।।४/४७।।**

वने स्वप्रियाम्–अन्वेषयन् विरहकातरोन्मत्तगजस्य भ्रमणोल्लेखः कविः वारं वारं करोति। पुरुरवसः मनः स्थितेः प्रकटीकरणार्थं वर्णितगजस्याऽवस्था पशोः संवेदनशीलतायाः प्रमाणमस्ति। यथा–

**प्रियतमाविरहक्लान्तवदनः अविरलबाष्पजलाकुलनयनः।**

**दुःसहदुःखविसंष्ठुलगमनः प्रसुतगुरुतापदीप्ताङ्गः।**

**अधिकं दूणमानसो दरीं गतः कानने परिभ्रमति गजेन्द्रः।।विक्रम. ४/२८।।**

गजागजयोः भावपूर्णदाम्पत्यं प्रदर्शयन् अत्र कविः सल्लकीवृक्षस्य कोमलसुगन्धित

सरसपल्लवान् अस्य दम्पतेः भोजनं दर्शयति। यथा–

**अयमचिरोदात्पल्लवमुपनीतं प्रियतमाग्रहस्तेन।**

**अभिलेढु तावदासवसुरभिरसं शल्लकी भङ्गम्।।विक्रम. ४/४४।।**

तस्य – अनवरतमदजलदानम्, यूथरूपे निवासप्रवृत्तिः तथा स्निग्ध–मन्दगर्जनस्योल्लेखोऽपि वर्तते। हिमालयस्य उष्ण–उपोष्ण कटिबन्धीवनप्रदेशेऽयं बुद्धिमान पशुः प्रमुखवन्यजीवरूपे मिलति।

गन्धमादनवने कृष्णसारमृगः मृगीशावकः सम्पूर्णपरिवारस्य चित्रणं कुर्वन् कविना अस्य वात्सल्य–दाम्पत्यभावयोः सहज चित्रणं कृतमस्ति।यथा–

**कृष्णसारच्छविर्योऽयं दृश्यते काननश्रिया।**

**नवशष्पावलोकाय कटाक्ष इव पातितः।।विक्रम.४/५७।।**

मृगोऽयं कृष्णसारः कवीनामिदं सम्मतं यत् वने वनाधिष्ठात्रीवनदेवता निवसति। वर्षासमये नूतनं बालतृणं वर्धतेतत्सौन्दर्यविलोकनप्रवणचेतसातयापातितः कटाक्षइवकृष्णसारोऽयंसारङ्गोदृश्यते।हिमालयशुष्कपर्णपातीवनेषुप्राप्तवन्यशूकरैःगहनवनस्वतीक्ष्ण द्रंष्टैः, पृथिवीखनस्यवर्णनंपर्यावरणवर्णनप्रसंगेनितान्त स्वाभाविको वर्तते। गन्धमादनवनस्य वर्षकालीन शोभान्तर्गतः कालिदासेन अनेकपक्षीणां यथार्थसुन्दरचित्रणंकृतमस्ति।

धारासम्पातसमुच्छलितशैलतटे शोभमानानां स्थल्यां सोत्कण्ठेन मेघान् पश्यन् गायति। यथा–

**आलोकयति पयोदान्प्रबलपुरोवातनर्तितशिखण्डः।**

**केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन।।[१]**

ग्रीष्मावसाने सति मयूरस्य वाणी पटुतरो भवति।यथा–

**" घर्मच्छेदात्पटुतरगिरो बन्दिनो नीलकण्ठा।।"४/१३।।**

---

१.विक्रमोर्वशीयम् – ४/१२

वर्षर्तौ हर्षितो भूत्वा नृत्यति।— वर्षाप्रेमी मयूरस्यायं व्यवहारः कामोन्मादकालाऽनुरुपो वर्तते। कालिदासेन दत्तानि नीलकण्ठः,बर्हिणः, बर्ही, शिखी,शुक्लापाङ्गः, शिवापाङ्गः एतादृशानि विशेषणानि सर्वथा सार्थकानि सन्ति। **"मयूराः वै उपवेष्टुम् उच्चस्थानस्य चयनं कुर्वन्ति, यत्रतः दूरपर्यन्तं द्रष्टुं शूकरं स्यात्।।" मोर हमारा राष्ट्रीय पक्षी पृ. ७६—रमेश बेदी।।**

अतः शैलतटस्थलीषु—उपविश्य कण्ठोन्नतं तेषाम् अवलोकनस्य चित्रोपवर्णनम् अति स्वाभाविकोऽस्ति। **"हिमालये मयूराः" पक्षिणश्च ५000—६000 फीट पर्यन्तं सुलभाः सन्ति।" — (भारत के पक्षी — सालिम अली)**

कोकिला जम्बूवृक्षमध्ये—उपविश्य मदमत्ता जम्बूपक्वफलानां रसपानं करोति। यथा—

**महदपि परदुःखं शीतलं सम्यगाहुः,**

**प्रणयमगणयित्वा यन्ममापद्गतस्य।**

**अधरमिव मदान्धा पातुमेषा प्रवृत्ता,**

**फलमभिनवपाकं राजजम्बूद्रुमस्य।।**[१]

अस्याः सुविख्यातमधुवण्याः कारणात् कविः कोकिलां मधुरप्रलापिनि कलभाषिणि मंजुस्वना कथयति। वायुना कम्पितैः कल्पतरोः नृत्यसमयेकोकिला स्वरवेन वाद्यसंगीतं पूरयन्ति। यथा—

**गन्धोन्मादितमधुकरगीतै—**

**र्वाद्यमानैः परभृततूर्यैः।**

**प्रसृतपवनोद्वेलितपल्लवनिकरः,**

**सुललितविविधप्रकारैर्नृत्यति कल्पतरुः।।**[२]

नर्तकः कल्पतरुः। भ्रमरगुञ्जनमेव गीतम्। कोकिलानां रवो वाद्यम्। वायुना

१. विक्रमोर्वशीयम् —४/२७, २. — ४/१२

दोलायमानानि पल्लवानि एव अभिनयार्थं हस्तः। एभिः सर्वैःउपकरणैः सयुतः कल्पद्रुमोनृत्यति। वसन्ते कोकिलाः कूजन्ति सर्वसामान्योऽस्ति, परन्तु कालिदासः आतपान्तेऽपि अस्या कूजनवर्णनं करोति।

पुरुरवसः मनोदशां प्रदर्शयितुं विरहव्यथितो भूत्वा सरोवरे पक्षचालनम्, निरन्तरं पर्द्धमानः कामोन्मादेन–उत्प्रेरितः सहचरीं प्राप्य पुलकितवदनः,स्वेच्छया–गगने विहरन् हंसयुवारूपे तथा उर्वश्याः चिन्तया व्यथिता चित्रलेखा सहजन्या सख्योः मनोदशा दर्शयितुं सखी वियोगेन दुःखिता अश्रुप्रस्रविणी हंसिनीयुगलरूपे जलपक्षिणः परोक्षवर्णनं कवेः संवेदनशीलता, स्वभावगतकोमलता, तथा करुणायाश्च ज्ञानं कारयति। उर्वशीम्अन्वेषयन् पुरुरवसः साक्षात्कारः गन्धमादनवनस्य सरोवरे स्थितराजहंसेन भवति। यथा–

**मेघश्यामा दिशो दृष्ट्वा मानस्योत्सुकचेतसा। कूजितं राजहंसेन नेदं नूपुरसिञ्जितम्।।**[१]

नूपुरसदृशस्वनश्रवणेन राज्ञस्ततः प्रवृतिपूर्वकं किञ्चित् समाश्वासनमभवत्, किन्तु मानसाय लालायितमानसो–हंसःकूजितवान् तेन भृशं हतधैर्योराजा कष्टत्वामाप्तः। इयं तु राजहंसानां प्रकृतिर्यत्ते प्रारब्धासु वर्षासु मानसकासारं प्रति गच्छन्ति। उर्वश्या इव राजहंसस्य गतिः उर्वश्याः किंकिणरव इव मधुरवाण्याः वर्णनं कुर्वन् कविः श्याममेघाच्छन्नदिशः विलोक्यवर्षारम्भकालेमानसोत्काः मार्गे भोज्यमृणालतन्तून् ग्रहणप्रवृत्तेरपि परिचयः कालिदासेनाऽत्र दत्तमस्ति। यथा–विक्रम.

- **पश्चात् सरः प्रतिगमिष्यति मानसं तत्, पाथेयमुत्सृजविसं ग्रहणायभूयः।।४/३१।।**
- **रे रे हंस किं गोप्यते गत्यनुसारेण मया लक्ष्यते।**
  **केन तव शिक्षिता एषा गतिर्लालसा सा त्वया दृष्टा जघनभरालसा।।४/३२।।**
- **हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता।**
  **विभावितैकदेशेन देयं यदभियुज्यते।।४/३४।।**

सरोवरे पुरुरवा चक्रवाकयुगलं पश्यति सरसि कमलिनीदलेन समाच्छादितचक्रवाक्याः उल्लेखः तस्याः जलपक्षीभवितुं सिध्द्यति। यथा–

**सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां ननु, सहचरीं दूरे मत्वा विरौषि समुत्सुकः।**
**इति च भवतो जायास्नेहात्पृथक्स्थितिभीरुता मयि, च विधुरे भावः कोऽयं प्रवृत्तिपराङ्मुखः।।**[२]

१. विक्रमोर्वशीयम् – ४/३०, २. –४/३९,

स्वप्रियां आसन्नामपि परं विप्रकृष्टां मत्वा विलक्षणामुत्कण्ठां भजमानो दरीदृश्यते। वनानां विभिन्नवासस्थानानानि,तृणम्, भूमिः, इन्द्रगोपः, सघनवृक्ष – परभृत – मयूर – सरोवर – हंस – चक्रवाकादीनां समावेशः जीववैविध्यं तथा तज्जन्यपर्यावरणसन्तुलनं संकेतयति।

## (६) पर्यावरणे मानवीकरणम्।

विक्रमोर्वशीये नाटके मानवीकरणरुपात्मकप्रकृतिचित्रणस्य बाहुल्यं दृश्यते। एतादृशं पर्यावरणस्य वर्णनं कालिलदासेन नाटकस्यास्य प्रायः सर्वेष्वंकेषु कृतमस्ति। उदाहरणरूपेण सर्वप्रथमं नाटकस्य द्वितीयांकेऽस्माभिरिदं दृश्यते। वसन्तागमनप्रसंगे प्रमदवने वसन्तशोभाया शैशवयौवनयोः निदर्शनक्रमे राजा विदूषकम्प्रति कथयति–

**अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयो,**

**बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति।**

**इषद्बद्धरजः कणाग्रकपिशा चूते नवा मंजरी,**

**मुग्धत्वस्य च यौवनस्य च सखे मधुश्रीः स्थिता।।**[१]

पुनरग्रे वसन्तमित्रं मलयानिलं सम्बोधयन् राजा ब्रवीति–

**वासार्थं हरसंभृतं सुरभि यत्पौष्पं रजो नीरुधां,**

**किं मिथ्या भवतो हृतेन दयितास्नेहस्वहस्तेन मे।**

**जानीते हि भवान्विनोदनशतैरेवं – विधैर्धारितं,**

**कामार्तं जनमंजनांप्रतिभवानालक्षिताप्रार्थना।।**[२]

चतुर्थांके मेघं सम्बोधयन् राजा कथयति–

**जलधर संहरात्र कोपमाज्ञप्तः, अविरलधारासारदिशामुखकान्तः।**

**अहं पृथ्वीं भ्रमयन्यदि प्रिये, प्रेक्षिष्ये तदा यद्यत्करिष्यसि तत्तत्साहिष्ये।।विक्रम.४/११।।**

---

१. विक्रमोर्वशीयम् – २/७, २. –२/१९

पुनश्चाग्रे परभृतामुद्दिश्य राजा प्रियावियोगाकुलो वदति–

परभृते मधुरप्रलापिनि कान्ते नन्दनवने स्वच्छन्दं भ्रमन्ती।

यदि परं प्रियतमा सा मम दृष्टा तद्द्याचक्ष्व मम परपुष्टे।।

त्वां कामिनो मदनदूतिमुदाहरन्ति, मानावभंगनिपुणं त्वममोघमस्त्रम्।

तामानय प्रियतमां मम वा समीपं, मां वा नयाशु कलभाषिणि यत्र कान्ता।।[१]

पर्वतं सम्बोधयन्नुन्मनो राजा पुनर्वक्ति–

स्फटिकशिलातलनिर्मलनिर्झर बहुविधकुसुमैर्विविरचितशेखर।

किन्नरमधुरोद्गीतमनोहर दर्शय मम प्रियतमां महीधर।।[२]

अत्र प्रथमश्लोके नायिकायां मुग्धत्वयौवनमध्यस्थास्थितिः मधुश्रियां मानवोचितशैशवयौवनयोरारोपः, द्वितीय श्लोके 'मलयानिले' आत्मसुगन्धीकरणप्रीतिभाववाहकत्वस्य, तृतीयस्थले 'जलधरे' आज्ञावहनकोपकरणयोः, चतुर्थे कोकिलायां प्रत्युत्तरदानक्षमत्वस्य मानवनयनानयनक्रियायाश्च, पञ्चमे च श्लोके –'महीधरे' उर्वशीदर्शनकारयितृत्वसामर्थ्यस्य चमत्कारधायकाऽऽरोपः सुष्ठु प्रतीयते।

## (७) कथानकस्य स्वरसः।

अस्मिन् नाटके कालिदासः प्रतीकात्मकरूपे पर्यावरणविषयाऽवधारणानां कलापूर्णनिरूपणं कृतवान्– अस्ति। अत्र पुरुषार्थो तथा प्रेमोन्मादी पुरुरवा श्रमशीलः संवेदनशीलो मानवस्य प्रतीकोऽस्ति। अप्सरा–उर्वशीं प्राकृतिकशोभया सह एकाकारं कृत्वा कविः प्रकृतिं स्वर्गिकविभूत्याः रूपे प्रस्तौति।

विनाशात् प्रकृत्याः रक्षाः, निःस्वार्थकर्तव्यभावेन कृत्वा मानवः प्राकृतिकसौन्दर्यं प्रति–आसक्तो भवति, प्रकृतिरपि रक्षकं प्रति स्वं समर्पयति। मानवः स्व पराक्रमेण प्रकृत्यारधिष्ठाता इन्द्रस्य कृपादृष्टिं प्राप्य स्वर्गिकसुखं प्राप्नोति। प्रकृत्याः नैसर्गिकशुद्धतायाः लुण्ठनं पर्यावरणाय शापवत् प्रतीयते, परन्तु मानवस्य साहचर्यात् शापोऽपि वरदाने परिणमति प्रकृतिः मानवस्य कार्यक्षेत्रे आत्मानं समर्पयति।

१.विक्रमोर्वशीयम् –४/२४,२५, २.–४/५

प्रकृतिं प्रति अस्य – अनवधानकारणात्–प्राकृतिकसुख–संसाधनानि मानवतः दूरं गच्छन्ति। तदा मानवः विरहः दुःखं विना–अन्यत् किमपि नैव प्राप्नोति। उत्कटभावावेगस्य वशीभूत्वा निरन्तरं प्राकृतिकसंसाधनानि पुनः प्राप्त्यर्थं प्रयत्नं करोति, मानवप्रयत्नं विना प्रकृतिरपि जड़वत जायते। परिश्रमीमानवः स्वप्रयासेन, प्रेम्णाश्च प्रकृतिम्–अपि सर्वतः किकाशयति। मानवाय परिणामप्रदानानन्तरं प्रकृतिरपि विश्रान्तिमिच्छति। तस्याऽभावे मानवोऽपि वानप्रस्थं स्वीकरोति। मानवस्य कार्यशीलतायाः कारणात् पुनः मानवप्रकृत्योः पुनर्मेलनं भवति। एवं प्रकारेणाऽत्र कविः प्रकृत्यां दिव्यतायाः दर्शनं कुर्वन् तस्याः स्नेहयोग्यं संरक्षणयोग्यञ्च चित्रणं कृतवान्–अस्ति।

## (७) मालविकाग्निमित्रं नाटके पर्यावरणम्।

समस्तमिदं भूतलं पर्यावरणं विना कान्तिरहितमुत्साहीनं वा मन्यते। कविकुलगुरुकालिदासः स्वरचितकाव्येषु नाटकेषु च अतुलां ख्यातिं संस्कृतजगति लब्धवानस्ति। कालिदासस्य त्रिषु नाटकेषु " मालविकाग्निमित्रम्" नाम नाटकं प्रथमं विद्यते। कलाकौशलदृष्ट्या यद्यपि अस्मिन् नाटके क्वापि अन्यनाटकवत् भावार्थबोधप्रसंगे तादृशी विलक्षणता गंभीरता वा न लक्ष्यते, तथापि प्रथमेऽपि अस्मिन् नाटकग्रन्थे कवेः कालिदासस्य कल्पना कोमलता प्रकृतिपर्यवेक्षणशीलता भावरसललितपदरचनादयः सर्वदैव श्लाघनीयाः प्रतीयन्ते। संस्कतसाहित्याकाशे पर्यावरणवर्णनसंबन्धे कालिदासस्य महती ख्यातिः विद्यते। निश्चयमिदं यत् महाकविः कालिदासः पर्यावरणवर्णने सिद्धहस्तः।

निखिलनिसर्गसर्गः स्थूलरुपेण पञ्चमहाभूतात्मकोऽस्ति। पञ्चमहाभूतेषु भूमिजलवायुगगनाग्नीनां गणना भवति। पर्यापरणघटकेषु पञ्चमहाभूतानां प्रमुखं स्थानं विद्यते। अधुना पर्यावरणविषयमधिकृत्य चित्रणं विधीयते तदा पञ्चमहाभूतानां प्रसंगः प्राथम्येनोपस्थितो भवति। "परितः आवृणोति" अर्थात् पृथिवीजलमाकाशवाय्वग्नयः एतानि पञ्चतत्वानि प्राणिजगतः परितः आच्छादितत्वात् "पर्यावरणम्" कथ्यते। श्री मद् भागवद् गीतायां श्री कृष्णः पर्यावरणभूतानि प्रकृतेः अष्टाऽङ्गैः समग्रब्रह्माण्ड आच्छादितोऽस्ति स्वीकरोति। यथा–

**भूमिरापोनलोवायुः खं मनो बुद्धिरेवच।**
**अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा।। गीता ७/४।।**

महाकविः कालिदासोऽपि "मालविकाग्निमित्रम्" नाटकस्य मंगलाचरणे अष्टमूर्तिधरः (पृथिवीजलाग्निवायुवियद्यजमानेन्दुसूर्यरूपाः) एतादृशं शिवं स्तौति। यथा–

**एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः,**
**कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद् यतीनाम्।**
**अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः,**
**सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः।।**[१]

अस्मिन् मंगलाचरणश्लोकस्य तृतीयचरणे अष्टाभिर्मूर्तिभिः संसारस्य पालनं कुर्वन्नपि स्व मनसि न धारयत्यभिमानम्, इति वर्णनं कृत्वा महाकविकालिदासेन पर्यावरणस्योत्तमं चिन्तनं कृतमस्ति। एवं प्रकारेण सर्वत्र नाटके पर्यावरणचेतना दरीदृश्यते।।

---

१.मालविकाग्निमित्रम् –१/१

❖ जलवायुसंरक्षणम्।

मालविकाग्निमित्रे वसन्तकालस्य वर्णनम् अनेकप्रकारेण कृतमस्ति। सः वासन्ती दक्षिणपवनस्य शीतल – मन्द – सुगन्धितस्य च प्रवाहस्य कथनेन पाठकस्य हृदयं वशी करोति। निम्नश्लोके सुखस्पर्शी मलयाचलपवनस्य मनोहारि चित्रणं दर्शनीयमस्ति। यथा–

**उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां,**

**सानुक्रोशंमनसिजरुजः सह्यतां पृच्छतेव।**

**अंगे चूतप्रसवसुरभिदक्षिणो मारुतो मे,**

**सान्द्रस्पर्शः करतल इव व्यपृतो माधवेन।।[१]**

चूतांकुरास्वादकषायकण्ठानां पिकानां कलरवैः कामोत्पन्नसन्तापस्य सहनयोग्यतां सानुकम्पं ज्ञातुमिच्छता इववसन्तसमयेनचूतांकुरसदक्षिणदिशातः आगतः। वायुः कोमलस्पर्शः करपल्लव इव मम देहे आसञ्जितः।। अधो लिखितपद्ये कविः वसन्तर्तोः मानवीकरणं कृतमस्ति। अत्र महाकवेःपर्यावरणं प्रति उदात्तचेतना दृश्यते। वसन्तारम्भे वर्णिततप्तमध्यान्हकालस्य प्रभावोन्पादकं चित्रणमपि संश्लिष्टरुपेण वर्णनं प्राप्यते। यथा–

**पत्रच्छायासु हंसा मुकुलितनयना दीर्धिकापद्मिनीनां,**

**सौधन्यव्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि।**

**बिन्दूत्क्षेपात्पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रम्,**

**सर्वैरुस्त्रैः समग्रस्त्वमिव नृपगुणैर्दीव्यते सप्तसप्तिः। ।माल.२/१२।।**

विन्ध्यक्षेत्रे धाराप्रवाह जलवर्षणशीला विद्युन्मयी मेघमालाया आलङ्कारिकवर्णनं यथा–

**बाष्पासारा हेमकाञ्चीगुणेन श्रोणीबिम्बादप्युपेक्षा च्युतेन।**

**चण्डी चण्डं हन्तुमभ्युद्यता मां विद्युद्दाम्ना मेघराजीव–विन्ध्यम्।।[२]**

अनेनवर्णनेन नर्मदा–तटीयविदिशाराज्ये मेघगर्जनतडित्दर्शनपूर्वकं धारासारवृष्टेरनुमानं कर्तुं शक्यते।

---

१. मालविकाग्निमित्रम् – ३/४, २. –३/२१

• वनस्पतिः – विदिशा–तीरोद्यानं तथा प्रमदवनस्योल्लेखेन अत्रस्थ उद्यानस्य वानस्पातिकशोभायाः परिचयः मिलति। एतत् राज्यं कृषिप्रधानंप्रतीयते यतः कृष्यर्थं हानिप्रदजीवजन्तूतः सुाक्षा कल्याणस्य कामना
कृतमस्ति। यथा–

त्वं मे प्रसादसुमुखी भवदेवि नित्य–

मेतावदेव हृदये प्रतिपालनीयम्।

आसास्यमीति विगमप्रभृति प्रजानां,

संपत्स्यते न खलुगोप्तरिनाग्निमित्रे।।[१]

उपर्युक्तः"भरतवाक्यम्" पञ्चमोङ्कस्यान्तिम श्लोके राजा 'अग्निमित्रः' स्वयं कथयति यत् मम राजत्वकाले प्रजानाम् आशास्यं पूर्णाः भवेयुः,अतिवृष्ट्यादयः षट् प्रजोपद्रवानाम् अभावः स्युरिति कथनेन स्पष्टं भवति यत् अस्माकं कृषिप्रधानदेशे यदि कृषिः समिचीनं भविष्यति तर्हि अस्माकंअर्थतन्त्रमपि वृद्धिपथे गमिष्यति इति राजा सम्यक् जानाति स्म।। मानवनिर्मितवनस्पतिभिः सह एतत् क्षेत्रं कदाचित् वनसंकुलमासीत्, यत्र निवीडारण्ये प्रायः लुण्ठनाऽपहरणादिकार्य भवन्ति स्म। यथा परिव्राजिका वदति–

"स चाटव्यन्तरे निविष्टो गताध्वा वणिग्गणः।।"[२]

अन्यच्च–

तूणीरपट्टपरिणद्धभुजान्तराल,

मापार्ष्णिलम्बिशिखिबर्हकलापधारि।

कोदण्डपाणि विनदत्प्रतिरोधकाना,

मापातदुष्प्रसहमाविरभूदकीनम्।।[३]

---

१. मालविकाग्निमित्रम् – ५/२०, २. –५/पृ. ६६, ३. –५/१०

उपर्युक्तवर्णनेन स्पष्टं भवति यत् तदानिन्तनकाले अरण्यसंरक्षणव्यवस्था समिचीनाऽऽसीत्। अतः वृक्षोच्छेदनं केऽपि नैव कुर्वन्ति स्म। तेन अरण्यानि सघनगुल्मवृक्षयुक्तानि आसन्, येन तत्र दस्युदलानि निर्भयो भूत्वा निवसन्ति स्म।

- मानवः–

नगरे राज्यपरितन्त्रे मनुष्यस्य प्रमुखता स्वाभाविकोऽस्ति। राजभवनेऽपि कविः पुष्पविकासं प्रति पट्टमहिषीधारिण्याः यत्नशीलता वसन्तोत्सवस्य उल्लासपूर्णाऽऽयोजनादि प्रतीकानां माध्यमेन मानवस्य पर्यापरणं प्रति स्नेहं पर्यावरणसंरक्षण–संवर्द्धनस्य च निरुपणं विहीतवान्नस्ति।

## ❖ मालविकाग्निमित्रे वर्णित प्रमदवनस्य पर्यावरणदृष्ट्या चिन्तनम्।

विदिशास्थितप्रमदवने महाकविकालिदासः स्थानीयपर्यावरणचित्रणं कृतमस्ति। मालविकाग्निमित्रे वसन्तकालिकप्रमदवनस्य वर्णनं विद्यते। वसन्तर्तौ मध्यान्हकाले सूर्यकिरणाः कीदृशाः प्रचण्डाः भवन्ति । तस्य वर्णनम् अस्मिन् श्लोके यथा–

**सर्वैरुस्रैः समग्रैस्त्वमिव नृपगुणैर्दीव्यते सप्तसप्तिः।।**[१]

वसन्तर्तौ कुरबकरजैः सुशोभितः किसलयपुटस्थजलकणैः शीतलमलयवायुकम्पितः उपवनवृक्षाः सन्तापनिवारणार्थम् आमन्त्रिता इव प्रतीयन्ते। यथा–

**बोढा कुरबकरजसां किसलयपुटभेदशीकरानुगतः।**

**अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः।।**[२]

अत्र वसन्ते प्रवर्धमानः सूर्यातपः, नवपल्लवैः ग्रीष्मकाले अधिकवाष्पोत्सर्जनादि तथ्यं महाकविकालिदासः अतीव सहजतया वर्णनं करोति।

## • वनस्पतीनां पर्यावरणदृष्ट्या चिन्तनम्।

प्रमदवनमुपवनमस्ति,अतः प्रमदवने वनस्पतिवर्णनं प्रमुखं विद्यते। वसन्तागमने वसन्तसर्वस्वभूताःचूतांकूराःवसन्तागमनंसूचयन्ति। यथा–

---

१. मालविकाग्निमित्रम्–२/१२, २. –३/९

अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे,

सान्द्रस्पर्शः करपल्लव इव व्यापृतो माधवेन।।माल.३/४।।

अर्थात्– वसन्तागमने सति वसन्तसमयेन चूतांकुरसुगन्धिः दक्षिणादागतवायुः कोमलसपर्शः करपल्लव इव मम देहे आसञ्जितः। अत्र प्रमदवने आह्वानक्रियायाः वसन्ते च प्रश्नकर्तृकत्वहस्तक्रियाव्यापारयोरारोपः सुष्पष्टं लक्ष्यते यतः उपरिचर्चितावुभौमानवोचितौ मानवेष्वेव शक्यौ स्तः, नेतरेषु। परन्तु अत्र महाकवेः वैशिष्ट्यं यत् मानवीकरणरूपेण वनस्पतिपर्यावरणस्य चित्रणं कृतमस्ति।

वसन्तर्तौ जायमाना किञ्चत श्याम–श्वेतारुणभाग्निपुष्पाणि, कुरबकं पुष्पविशेषं संशक्तमधुपकज्जलैः पुन्नागपुष्पैः, रक्तिमपुष्पगुच्छैः, सुशोभिता अशोकवृक्षाः कीदृशाः दर्शनीयाः सन्ति। यथा–

**रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः,**

**प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम्।**

**आक्रान्तातिलकक्रियाचतिलकैर्लग्नद्विरेफाञ्जनैः,**

**सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम्।।माल.३/५।।**

एषः पद्यः कालिदासस्य सूक्ष्म–प्रकृतिनिरीक्षणं प्रकाशयति। अशोकशिलापट्टकं श्यामारण्यलतया परिवेष्टितं लतामण्डपानि सन्ति। यथा– निपुणिका वदति– **"आवामपि प्रियंगुलतापरिक्षितमशोकशिलापट्टकं प्रविशावः।।"**[१] इमे वृक्षाः उद्याने रोपणयोग्याः सन्ति। मध्यभारतस्यविन्ध्यक्षेत्रे प्रचुरतया प्राप्यन्ते।।

**वसन्तारम्भे मञ्जरीयुक्तः"चूतम्"(३/४)** वसन्तावसाने **"सहकारम्" (५/४)** नाम्ना सम्बोधनम् (फलजालकभिद्यमानसहकारम्) द्वयोः सूक्ष्मान्तरविषये कालिदासस्य विशेषता दृश्यते। कविः भगवती कौशिकीद्वारा देवीधारिणीम् उपहाररुपेण बीजपूरकफलार्पणस्योल्लेखः करोति। यथा तृतीयोऽङ्कस्य प्रारम्भे समाहितिका वदति– **"आज्ञप्तास्मि भगवत्या समाहितिके ,देवस्योपवनस्थं बीजपूरकं गृहित्वा गच्छेति।"**[२]

१. मालविकाग्निमित्रम् –३/पृ. ८४, २. –३/पृ.५०,

अनेन स्पष्टं भवति यत् 'बीजपूरक फलम्' राजपरिवारस्य माननीयोच्चपदस्थजनेभ्यः दातुं योग्योऽस्तीति। एतत् बीजपूरकफलम् शुभसूचक. अर्घ्ययोग्यो मन्यते स्म। " **मथुरासंग्रहालये कतिपयमूर्तीनां हस्ते शुभसूचकरुपेण बीजपूरकम् फलानि दृश्यन्ते।।" – कालिदास का भारत–१ पृ.६२।।**

एतत् वसन्तर्तोः विशेषफलं भवितव्यम् अतः तं भगवती उपहाररूपेण स्वीकरोति। प्रतीयते यत् एतत् फलं कदाचित् अल्पाकारं न स्यात्। अस्य वृक्षः मध्यमाकारः भवेत्। यथा–मधुरिका वदति–"**एतच्छाखावलम्बि बीजपूरकं गृहाण।"३/ पृ.६२।।** अनेन कथनेन स्पष्टं भवति। प्रस्तूतनाटके महाकविकालिदासः वसन्तेपुष्पित अशोकस्य महत्वं दत्तमस्ति। अस्य कोमलकिसलयाः कर्णाभूषणरुपेण स्त्रीयः धारणं कुर्वन्ति। यथा– (मालविका रचितपल्लवावतंसापादमशोकाय प्रहिणोति।) राजा वयस्य,

**आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति।**

**उभयोः सदृश विनिमयात्मानं वञ्चितं मन्ये।।**[1]

प्रमदवने अनेकाः अशोकवृक्षाः सुशोभिताः आसन्।यथा– अस्मिन् श्लोके–

**सर्वाशोकतरूणां प्रथमं सूचितवसन्त विभवानाम्।**

**निवृत्तदोहदेऽस्मिन्संक्रान्तानीव कुसुमानि।।**[2]

## ❖ अशोकदोहदप्रसंगस्य पर्यावरणदृष्ट्या चिन्तनम्।

मालविकाग्निमित्रे कालिदासः अशोकदोहदस्य विस्तृतरुपेण वर्णनं कृतमस्ति। संस्कृतसाहित्ये प्रचलितमान्यतानुसारेण यदा समुचितरुपेण वृक्षलतादीनां विकासो न भवति, तदा योग्यव्यक्तिद्वारा विहित तेषां विकासयितृककार्यं "दोहदम्" कथ्यते। यथा–

**तरु–गुल्म–लतादीनामकाले कुशलैःकृतम्।**

**पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया।। –शब्दार्णव ।।**

कस्यापि वृक्षस्य विकासार्थं कृतोपाय विशेषकार्यमेव वृक्षस्यदोहदमस्ति, येन विना

---

१. मालविकाग्निमित्रम् –३/१६, २. – ५/५

सम्यक्प्रकारेण वृक्षः पुष्पफलान्वितो न भवति। प्राचीनविद्वांसः सूक्ष्माध्ययन कृत्वा पृथक्–पृथक् वृक्षाणां कृते पृथक्– पृथक् क्रियाः पुष्पोत्पादने सहायकाः भवन्तीति स्वीकुर्वन्ति। तस्याः क्रियायाः क्रियान्वयनं स्त्रीभिः कार्यते, एतत् "दोहदविधानम्" कथ्यते। अस्मिन् विषये उत्तरमेघे मल्लिनाथटीकायामुल्लेखो वर्तते। यथा–

**स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलः सीधुगण्डूषसेकात्,**

**पादाघातादशोकस्तिलककुरबकौ वीक्षणाऽऽलिङ्गनाभ्याम्।**

**मन्दारो नर्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवाता,**

**च्युतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः।।**

–मेघ. २/१५–व्या. आचार्य शेषराज शर्मा रेग्मी।।

अर्थात्–सुन्दर्याः स्पर्शेन प्रियङ्गुवृक्षः, मुखस्थितमद्यसेचनात् बकुलः, चरणाघातादशोकः वीक्षणात् तिलकः, आलिङ्गनात् कुरबकः, मन्दारनर्मवाक्यात्, चम्पकःपटु–मृदु–हसनात्,चूतःवदनवातात्, गीतान्नमेरुः, यथा नृत्यात् कर्णिकारः विकसति। अत्र स्त्रीयाः पादप्रहार–वीक्षणाऽऽलिंगन–स्पर्श–प्रेमसम्भाष–मृदुहास–नृत्यगीतादिद्वारा वृक्षस्य विकासः नितान्तासम्बद्धो प्रतीयते, तथापि वृक्षदोहदस्य कल्पना काव्यात्मकमस्ति एव, वैज्ञानिकदृष्ट्याऽपि निराधारो नास्ति।

वस्तुतः वृक्ष–दोहदस्य साहित्यिकपरिकल्पना वनस्पतिविकासं प्रति प्रयत्नशीलः, प्राचीनवनस्पतिविज्ञानम्, उत्कृष्ट उपवनकलायाः परिचायकोऽस्ति। वृक्षलतादीनां रोपणम्, संवर्धनम्, संरक्षणम्, तैः सह सुखानन्दकरणम्, सर्वक्रियाः कलायाः अंगानि सन्ति।

भारतीयसंस्कृतिः वृक्षपादपान् सजीव–संवेदशीलान् मत्वा तदनुरूपव्यवहारो कर्तुं पक्षधरोऽस्ति। "भारतीयविश्वविख्यातः वैज्ञानिकः **'जगदीशचन्द्र बसुः'** वृक्षपादपानां प्राणवत्तां प्रमाणितवान्नस्ति।" तस्यमतानुसारेण **"पादपेषु प्राणिनामिव तन्त्रिकातन्त्रम् [Nervous system] भवति,येन पादपेषु तरङ्गानां सञ्चारो भवति।"– विश्वप्रसिद्ध मांसाहारी तथा अन्यविचित्र पेड पौधे पृ.५७.–जगदीप सक्सेना।।**

वृक्षपादपानां विषये वैज्ञानिकप्रयोगान् विक्ष्य भारतीयवृक्षदोहदस्य परिकल्पना वैज्ञानिकं प्रतीयते। वृक्ष–लता– गुल्मादयः प्राकृतिकव्यवस्थानुसारेण स्वतः पुष्पित–पल्लविताः

भवन्ति,चेत् तेषां कोऽपि कारणवसात् विकासः अवरुध्यते तर्हि मानवप्रयासस्य अपेक्षा भवति। एतामपेक्षामेव वृक्षस्य 'दोहदम्' कथ्यते। ध्यातव्योऽस्ति येषां वृक्षाणां दोहदविधानं क्रियते तेषां उपवनवृक्षरुपेण उद्यानप्रमदवनेषु रोपणं भवति स्म। स्त्रीणां चित्तं स्वाभाविकरूपेण कोमलं भवति, यस्याः वृक्षाणामुपरि अनुकूल–प्रभावो निपतति। वस्तुतः वृक्ष–विकासार्थ, सद्भावनापूर्वकचिन्तनमात्रेण वृक्षाः दूरबोधः (telepathy) द्वारा ज्ञात्वा पुष्प–फलान्विताः भवन्ति।

अशोकोऽपरि पादाघातः तस्मिन् स्थानैव क्रियते, यत्र पादपानाम् आवेगी–उर्मीनां केन्द्रस्थानं भवति। यथा–

**"नृत्यगीतादि द्वारा वृक्ष–पादपानां संवर्धनम् आधुनिक वैज्ञानिकाऽपि स्वीकुर्वन्ति।" ('विश्वप्रसिद्ध मासांहारी विचित्र पेड़–पौधें' – जगदीप सक्सेना)**

उपर्युक्तपरिप्रेक्ष्ये मालविकाग्निमित्रे महाकविः कालिदासवर्णितः ष्अशोकदोहदस्यश्श ललितप्रसङ्गस्य वैज्ञानिकता स्पष्टं भवति।

वसन्तर्तौ रक्ताशोकवृक्षाः पुष्पैः सुशोभिताः सन्ति। एकः अशोकवृक्षरेव पुष्परहितोऽस्ति। तस्य पुष्प–प्रसूत्यर्थं देवी धारिणी एका योजना निर्माति। ष्वृक्षदोदस्यश्श पूर्तिः सामन्या स्त्री नैव कर्तुं शक्नोति। योग्यतासम्पन्नस्त्रियाः एवः नियुक्तिः अस्मिन् कार्ये क्रियते। यथा– बकुलावलिका–मालविकां सम्बोध्य कथयति–ष्सखिए त्वमिदानीं योग्यतया नियुक्ता। (माल.३/पृ. ७९) अत्र देवी धारिणी सुकुमारचित्तां मुग्धां मालविकां योग्या मत्वा अशोकतरुदोहदपूरणे व्यापारिता।

अस्मिन् दोहदकार्ये मालविकां रुचिः वर्धेत् तदर्थं धारिणी पञ्चरात्रौ पुष्पोद्गमने सति मनोवाञ्छितपुरस्कारप्रदानस्य घोषणा करोति। यथा–तृतीयोऽङ्के स्वमुखेन मालविका कथयति–

**"आदिष्टामिदेव्या–"मालविके गौतमचापलाद्दोलापरिभ्रष्टायाः सरुजौ मम चरणौ। त्वं तावद् गत्वा तपनीयाशोकस्य दोहदं निर्वर्तये। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति, ततोऽहमभिलाषपूरयितृकं प्रसादं दापयिष्यामीति।"** [१]

कालिदासः महती कुशलतया दोहदापेक्षी वृक्षस्य समीपे मालविकां उपाविश्य तस्याः शृङ्गारं कारयति, ताम् अग्निमित्रस्य प्रणय–संदेशं

१. मालविकाग्निमित्रम् –३/पृ.७२,

श्रावयति येन तस्याः मनोदशा परिवर्तति, सा वृक्षस्य सपुष्पतां प्रति आत्मीयता प्रदर्शयति च। यथा– स्वयं मालविका वक्ति–

"अपि नाम अस्माकं सम्भावना सफला भवेत्।"[१]

तपनीयाऽशोकस्य सामीप्ये समस्तप्रेमवार्तालापः मालविकायाः खिन्नहृदये शीघ्रातिशीघ्र पुष्पिता अभवत्। तस्याः सत्यकामनाऽपि अशोकस्य शीघ्रपुष्पविकासे अत्यधिकः सहायको वर्तते। चरणसज्जायाऽऽयोजनं उल्लासपूर्वककृतं क्रियान्वयनस्य प्रतीकोऽस्ति, नूपुराणि वृक्षान् प्रभावयितुं सुमधुरसाधनानि सन्ति। यथा–

**चरणान्तनिवेशितां प्रियायाः सरसां पश्य वयस्य रागलेखाम्।**
**प्रथमामिव पल्लवप्रसूतिं हरदग्धस्य मनोभव द्रुमस्य।।**[२]

अत्र जिज्ञासा जायते यत् पादप्रहारः तिरस्कारपूर्णव्यवहारो मन्यते, तर्हि कथम् अशोकवृक्षस्य दोहदसंस्कारे पादप्रहार? विदुषकः अशोकोऽपरि मालविककया कृत पादप्रहारस्य विरोधः करोति। यथा– तृतीयोऽङ्के विदुषकः इरावतीं सम्बोध्य कथयति–

**" भवति, युक्तं नाम अत्र भवति प्रियवयस्येऽयमशोको ननु वामपादेनताडयितुम्?"**[३]

वैक्टर महोदयस्येकप्रयोगः अस्य प्रश्नस्य समाधाने सहायको भवितुं शक्नोति। वृक्षपादपाः कोऽपि अदृश्य चमत्कारी–आश्चर्यजनकरूपेण मानवस्य चित्ते स्थितरहस्यं ज्ञात्वा तदनुरूपा प्रतिक्रिया दर्शयन्ति।

**"यदा प्रयोगकर्ता पादपं प्रज्वालयति तदा पादपः भयभीतो भवति, यदा प्रयोगकर्ता पादपनाशस्य विचारं विना अग्निपेटिका प्रज्वालयित्वा पादपसमीपे गच्छति, तदा पादपः शान्तोऽतिष्ठत्।" (विश्वप्रसिद्ध मासांहारी तथा अन्य विचित्र पेड़ पौधे – जगदीप सक्सेना)**

**निष्कर्षः –** अतः एव अशोकवृक्षं चरणाघातेस्थितशुभकामनायाः ज्ञानं सर्वथा सम्भवमस्ति। एतदरिक्तं वनस्पतिशास्त्रसम्मततथ्यमिदमपि अस्ति, यदि वृक्षोऽपरि शनैः कुठाराधातेन स्वविनाशाऽशङ्कात् मरणात्पूर्णं यथा शीघ्रं पुष्पफलानि दत्वा स्वकर्तव्यपूर्त्यर्थं तत्परो भवति। एवं प्रकारेण अशोकदोहदस्य सम्पूर्णप्रसङ्गं प्रकृतेः संरक्षणसंवर्द्धनार्थं मानवचिन्ता हित–साधनस्यद्योतकोऽस्ति। उद्यानकला वनस्पति विज्ञाने महाकविः कालिदासस्य सिद्धहस्तताऽनेन प्रसङ्गेन स्पष्टो भवति। इति।

१.मालविकाग्निमित्रम् – ३/पृ. ९४, २.–३/११, ३. – ३/पृ. ९५